CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीः ॥

विद्याभवन प्राच्यविद्या ग्रन्थमाला

२०

श्रीमदमरसिंहविरचितः

अमरकोशः

'राधा'-संक्षिप्तभाषाटीकासहितः

व्याख्याकार—

स्व० श्रीरामतेज पाण्डेय

चौखम्बा विद्याभवन

(चौक बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

विद्याभवन प्राच्यविद्या ग्रन्थमाला
२०

श्रीमदमरसिंहविरचित:—

अमरकोष: ।

साहित्य-शास्त्रि-

पं० रामतेजपाण्डेयकृतया 'राधा'भिधया

संक्षिप्तभाषाटीकयाऽऽटीकित: ।

चौखम्बा विद्याभवन, वाराणसी

संस्करण १९९३

मूल्य २०-००

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

प्रकाशक

चौखम्बा विद्याभवन

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ३२०४०४

सर्वाधिकार सुरक्षित

अन्य प्राप्तिस्थान

चौखम्बा सुरभारती प्रकाशन

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

दूरभाष : ३३३४३१

*

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., जवाहरनगर, बंगलो रोड

दिल्ली ११०००७

दूरध्वनि : २३६३९१

मुद्रक — श्रीजी मुद्रणालय वाराणसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमरकोषवर्गानुक्रमणिका ।

प्रथमकाण्डे—

वर्गनामानि			पृष्ठाङ्काः
परिभाषा	...	...	१
स्वर्गवर्गः	...	...	२
व्योमवर्गः	...	...	१३
दिग्वर्गः	...	...	१३
कालवर्गः	...	...	१९
धीवर्गः	...	...	२५
शब्दादिवर्गः	...	...	२८
नाट्यवर्गः	...	...	३३
पातालभोगिवर्गः	...	...	४१
नरकवर्गः	...	...	४३
वारिवर्गः	...	...	४४

द्वितीयकाण्डे —

भूमिवर्गः	...	...	५३
पुरवर्गः	...	...	५७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्गनामानि			पृष्ठाङ्काः
शैलवर्गः	...	...	६१
वनौषधिवर्गः	...	...	६३
सिंहादिवर्गः	...	...	६१
मनुष्यवर्गः	...	...	६६
ब्रह्मवर्गः	...	...	१२६
क्षत्रियवर्गः	...	...	१३६
वैश्यवर्गः	...	...	१६१
शूद्रवर्गः	...	...	१८२

तृतीयकाण्डे—

विशेष्यनिघ्नवर्गः	...	...	१६२
सङ्कीर्णवर्गः	...	...	२१४
नानार्थवर्गः	...	...	२२३
अव्ययवर्गः	...	...	२७२
लिङ्गादिसंग्रहवर्गः	...	...	२७८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीः ॥

नामलिङ्गानुशासनं नाम

अमरकोषः

प्रथमं काण्डम् ।

मङ्गलाचरणम् ।

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥१॥

प्रस्तावना ।

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥२॥

परिभाषा ।

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥४॥
त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥५॥

१. अथ स्वर्गवर्गः ।

[१]स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ।
सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥६॥
[२]अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥७॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥८॥
बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥९॥
[३]आदित्यविश्वसवस्तुषिता भास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥१०॥
[४]विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः ।

१—स्वर्गके ९ नाम । २ देवताओंके २६ नाम
३ गणदेवोंके ९ नाम । ४ देवयोनिके १० भेद ।

Dharmika Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥११॥
[1]असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ॥१२॥
[2]सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥१३॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः[3] शाक्यमुनिस्तु यः ॥१४॥
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ॥
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥१५॥
[4]ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥१६॥
धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः ॥१७॥
नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः ॥१८॥
[5]विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥१९॥

---

१ दैत्योंके १० नाम । २ बुद्धके १८ नाम । ३ शाक्यमुनिके ७ नाम । ४ ब्रह्माके २० नाम । ५ विष्णुके ४६ नाम ।

Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥२०॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥२१॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥२२॥
विश्वंभरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।
पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ॥२३॥
जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः ।
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥२४॥
बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः ।
रेवतीरमणो रामः कामपालो हलायुधः ॥२५॥
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः ॥२६॥
मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥२७॥
शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः ॥

---

१ वसुदेवके २ नाम । २ बलदेवके १७ नाम । ३ कामदेवके २१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥२८॥
(अरविन्दमशोकं च चूतं च नवमल्लिका ।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥२९॥
उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा ।
संमोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः) ॥३०॥
ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उषापतिः ।
लक्ष्मी पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥३१॥
इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।
(भार्गवी लोकजननी क्षीरसागरकन्यका) ॥३२॥
शंखो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः ।
कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥३३॥
चापः शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम् ।
(अश्वाश्च शैव्यसुग्रीवमेघपुष्पबलाहकाः ॥३४॥

---

१ अनिरुद्धके २ नाम । २ लक्ष्मीके ११ नाम । ३ विष्णुके शंखका १ नाम । ४ विष्णुके चक्रका १ नाम । ५ विष्णुकी गदाका १ नाम । ६ विष्णुके खड्गका १ नाम । विष्णुकी मणिका १ नाम । ७ विष्णुके धनुषका १ नाम । ८ विष्णुके वक्षचिह्नका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

सारथिर्दारुको मन्त्री ह्युद्धवंश्चानुजो गदः) ।
¹गरुत्मान्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ॥३५॥
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ।
²शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः ॥३६॥
ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः ।
भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ॥३७॥
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ।
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ॥३८॥
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ।
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ॥३९॥
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ।
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ॥४०॥
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ।
अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः ॥४१॥
³कपर्दोऽस्य जटाजूटः ⁴पिनाकोऽजगवं धनुः ।
⁵प्रमथाः स्युः पारिषदा ⁶ब्राह्मीत्याद्यास्तु मातरः ॥४२॥

---

१ गरुडके ६ नाम। २ शिवजीके ४८ नाम। ३ शिवजटाका १ नाम। ४ शिवधनुषके २ नाम। ५ शिवगणका १ नाम। ६ महामातृकाओंका सामान्य १ नाम।

Digitized by Sarayu Trust Foundation, Varanasi / Jangamwadi Math Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

(ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः) ॥४३॥
[1]विभूतिर्भूतिरैश्वर्यम[2]णिमादिकमष्टधा ।
(अणिमा महिमा चैव गरिमा लघिमा तथा ॥४४॥
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः) ।
[3]उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥४५॥
शिवा भवानी रुद्राणी शर्वाणी सर्वमंगला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥४६॥
(आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा)
[4]विनायको विघ्नराजद्वैमातुरगणाधिपाः ॥४७॥
अप्येकदन्तहेरम्बलम्बोदरगजाननाः ।
[5]कार्तिकेयो महासेनः शरजन्मा षडाननः ॥४८॥
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ।
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ॥४९॥
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।
[6]शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः ॥५०॥

---

१ ऐश्वर्यके ३ नाम । २ ऐश्वर्यके भेदका १ नाम ।
३ पार्वतीके २१ नाम । ४ गणपतिके ८ नाम । ५ कार्तिकेयके १७ नाम । ६ नन्दीके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

(कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका)
इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः ॥५१॥
वृद्धश्रवाः शुनासीरः पुरुहूतः पुरन्दरः ।
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ॥५२॥
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः ॥५३॥
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ।
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥५४॥
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया
पुलोमजा शचीन्द्राणी नगरी त्वमरावती ॥ ५५ ॥
हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम् ।
स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः ॥५६॥
ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः ।
ह्लादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पविः ॥५७॥

---

१ इन्द्रके ३५ नाम। २ इन्द्राणीके ३ नाम। ३ इन्द्रपुरीका १ नाम। ४ इन्द्रके घोड़ेका १ नाम। ५ इन्द्रके सारथीका १ नाम। ६ इन्द्रके बगीचेका १ नाम। ७ इन्द्रके महलका १ नाम। ८ इन्द्रके पुत्रके २ नाम। ९ ऐरावतके ४ नाम। १० इन्द्रवज्रके १० नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

शतकोटिः स्वरुः सम्बो दम्भोलिरशनिर्द्वयोः ॥
[1]व्योमयानं विमानोऽस्त्री नारदाद्याः [2]सुरर्षयः ॥५८॥
[3]स्यात्सुधर्मा देवसभा [4]पीयूषममृतं सुधा ।
मन्दाकिनी[5] वियद्गङ्गा स्वर्णदी सुरदीर्घिका ॥५९॥
मेरुः[6] सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ।
पञ्चैते[7] देवतरवो मन्दारः पारिजातकः ॥६०॥
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।
सनत्कुमारो[8] वैधात्रः स्वर्वैद्यावश्विनीसुतौ ॥६१॥
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।
[10]स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ॥६२॥
(घृताची मेनका रम्भा उर्वशी च तिलोत्तमा ।
सुकेशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः) ॥६३॥
[11]हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ।
[12]अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ॥६४॥

---

१ विमानके २ नाम । २ देवर्षियोंका १ नाम । ३ देवसभाके २ नाम । ४ अमृतके ३ नाम । ५ मन्दाकिनीके ४ नाम । ६ सुमेरुके ५ नाम । ७ कल्पवृक्षके ५ नाम । ८ ब्रह्मपुत्रके २ नाम । ९ अश्विनीकुमारके ६ नाम । १० स्वर्गीय वेश्याओंके ५ नाम । ११ देवगायकोंका १ नाम । १२ अग्निके १४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ।
बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उपर्बुधः ॥६५॥
आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः ।
रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः ॥६६॥
हिरण्यरेता हुतभुग्दहनो हव्यवाहनः ।
सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ॥६७॥
शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः ।
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् ॥६८॥
त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ ।
(उल्का स्यान्निर्गतज्वाला भूतिर्भसितभस्मनी ॥६९॥
क्षारो रक्षा च दावस्तु दवो वनहुताशनः) ।
धर्मराजः पितृपतिः समवर्ती परेतराट् ॥७०॥
कृतान्तो यमुनाभ्राता शमनो यमराड्यमः ।
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ॥७१॥
राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः ।
रात्रिचरो रात्रिचरः कर्बुरो निकषात्मजः ॥७२॥

---

१ वडवानलके ३ नाम । २ लपटके ५ नाम । ३ चिनगारीके २ नाम । ४ जलनके २ नाम । ५ यमके १४ नाम । ६ राक्षसके १५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ।
[1]प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ॥७३॥
[2]श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ।
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ॥७४॥
समीरमारुतमरुज्जगत्प्राणसमीरणाः ।
नभस्वद्वातपवनपवमानप्रभञ्जनाः ॥७५॥
[3]प्रकम्पनो महावातो झंझावातः सवृष्टिकः ।
[4]प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥७६॥
(हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः) ॥७७॥
शरीरस्था इमे [5]रंहस्तरसी तु रयः स्यदः ।
जवोऽथ [6]शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥७८॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च ।
[7]सततानारताश्रान्तसंततविरतानिशम् ॥७९॥
नित्यानवरताजस्रमप्यथातिशयो भरः ।

---

१ वरुणके ५ नाम । २ वायुके २० नाम । ३ आँधीके २ और वृष्टियुक्त आँधीका १ नाम । ४ शरीरस्थ वायुके ५ नाम । ५ वेगके ५ नाम । ६ शीघ्रताके ११ नाम । ७ लगातारके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

[1]अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥८०॥
तीव्रैकान्तनितान्तानि गाढबाढदृढानि च।
क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां सत्त्वगामि यत् ॥८१॥
[2]कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ॥८२॥
किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥८३॥
[3]अस्योद्यानं चैत्ररथं पुत्रस्तु [4]नलकूबरः।
[5]कैलासः स्थानमलका[6] पूर्विमानं तु [7]पुष्पकम् ॥८४॥
स्यात्किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः।
निधिर्ना शेवधिर्भेदाः पद्म[10]शङ्खादयो निधेः ॥८५॥
(महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ।
मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव) ॥८६॥

इति स्वर्गवर्गः।

—****—

---

१ अतिशयके १४ नाम। २ कुबेरके १७ नाम। ३ कुबेरके बागका १ नाम। ४ कुबेरके पुत्रका १ नाम। ५ उनके स्थानका १ नाम। ६ कुबेरकी नगरीका १ नाम। ७ उनके विमानका १ नाम। ८ किन्नरोंके ४ नाम। ९ खजानेके २ नाम। १० विशेष निधिके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२ अथ व्योमवर्गः ।

[1]द्यौर्दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ॥
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥१॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ॥
(विहायसोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ॥२॥
तारापथोऽन्तरिक्षं च मेघाध्वा च महाबिलम्) ॥

इति व्योमवर्गः ।

३ अथ दिग्वर्गः ।

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ॥
[2]प्राच्यवाची प्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥१॥
उत्तरा दिगुदीची स्याद्दिश्यं[3] तु त्रिषु दिग्भवे ॥
(अवाग्भवमवाचीनमुदीचीनमुदग्भवम् ॥ २ ॥
प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु) ॥
[4]इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत् ॥३॥
[5]कुबेर ईशः पतयः पूर्वादीनां क्रमात् ॥
रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः ॥४॥

---

१ आकाशके १८ नाम । २ दिशाओंके ५ नाम । ३ प्रत्येक दिशाके १–१ नाम । ४ दिश्यवस्तुका १ नाम । ५ सब दिक्पालोंके १–१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः) ॥
ऐरा[1]वतः पुण्डरीको वामनः कुमुदोऽञ्जनः ॥५॥
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥
क[2]रिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात् ॥६॥
ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ॥
[3]क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक्स्त्रियाम् ॥७॥
अभ्य[4]न्तरं त्वन्तरालं चक्रवा[5]लं तु मण्डलम् ।
अभ्रं[6] मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।८॥
धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ॥
घनजीमूतमुदिरं जलमुग्धूमयोनयः ॥९॥
का[7]दम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम् ॥
स्त[9]नितं गर्जितं मेघनिर्घोषे रसितादि च ॥१०॥
[10]शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ॥
तडित्सौदामनी विद्युच्चञ्चला चपला अपि ॥११॥

---

१ सब दिग्गजोंके १–१ नाम । २ उपर्युक्त दिग्गजोंकी हथिनियोंके १–१ नाम । ३ आग्नेयादि कोणोंके २ नाम । ४ मध्यके २ नाम । ५ घेराके २ नाम । ६ मेघके १५ नाम । ७ मेघसमूहके २ नाम । ८ मेघजनित वस्तुका १ नाम । ९ मेघगर्जनके ४ नाम । १० बिजलीके १० नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्फूर्जथुर्वज्रनिर्घोषो मेघज्योतिरिरंमदः ॥
इन्द्रायुधं शक्रधनुस्तदेव ऋजुं रोहितम् ॥१२॥
वृष्टिवर्षं तद्विघातेऽवग्राहावग्रहौ समौ ॥
धारा संपात आसारः शीकरोऽम्बुकणाः स्मृताः ॥१३॥
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम् ॥
अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ॥१४॥
अपिधानतिरोधानापिधानाच्छादनानि च ॥
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ॥१५॥
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ॥१६॥
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥
कला तु षोडशो भागो बिम्बोऽस्त्री मंडलं त्रिषु ॥१७॥

---

१ बिजली कड़कनेके २ नाम । २ बिजलीकी चमकके २ नाम । ७ इन्द्रधनुषके २ नाम । ८ सीधे इन्द्रधनुषका १ नाम । ६ वृष्टिके २ नाम । ६ सूखे मेघके २ नाम । ७ अतिवृष्टिके २ नाम । ८ जलकणका १ नाम । ६ ओलेके २नाम । १० मेघान्धकारका १ नाम । ११ ढाँकनेके ८ नाम । १२ चन्द्रमाके २० नाम । १३ चन्द्रमाकी कलाके अंशांशका १ नाम । १४ रवि-चन्द्रमण्डलके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]भित्तं शकलखण्डे वा [2]पुंस्यर्धोऽर्धं समेंशके ।
[3]चन्द्रिका कौमुदी ज्योत्स्ना [4]प्रसादस्तु प्रसन्नता ॥१८॥
[5]कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ॥
[6]सुषमा परमा शोभा[7] शोभा कान्तिर्द्युतिश्छविः ॥१९॥
[8]अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ॥
प्रालेयं मिहिका चाथ [9]हिमानी हिमसंहतिः ॥२०॥
शीतं[10] गुणे तद्वदर्थाः सुषीमः शिशिरो जडः ॥
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ॥२१॥
ध्रुव[11] औत्तानपादिः [12]स्यादगस्त्यः कुम्भसम्भवः ॥
मैत्रावरुणिरस्यैव [13]लोपामुद्रा सधर्मिणी ॥२२॥
[14]नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ॥
[15]दाक्षायण्योऽश्विनीत्यादितारा [16]अश्वयुगश्विनी ॥२३॥

---

१ खण्डके २ नाम । २ दो टुकड़ोंमेंसे एकका १ नाम । ३ चन्द्रिकाके २ नाम । ४ प्रसन्नताके २ नाम । ५ चिह्नके ६ नाम । ६ अति सुन्दरका १ नाम । ७ शोभाके ४ नाम । ८ पालाके ३ नाम । ९ पालासमूहके २ नाम । १० शीतगुणका १ और शीतल द्रव्यके ७ नाम । ११ ध्रुवके २ नाम । १२ अगस्त्यके २ नाम । १३ अगस्त्यपत्नीका १ नाम । १४ नक्षत्रोंके ६ नाम । १५ अश्विन्यादि नक्षत्रोंका १ नाम । १६ अश्विनीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राधा[1] विशाखा [2]पुष्ये तु सिध्यतिष्यौ श्रविष्ठया।
समा [3]धनिष्ठाः स्युः [4]प्रोष्ठपदा भाद्रपदाः स्त्रियः ॥२४॥
[5]मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी।
[6]इल्वलास्तच्छिरोदेशे तारका निवसन्ति याः ॥२५॥
[7]बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः।
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥२६॥
[8]शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः।
[9]अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ॥२७॥
रौहिणेयो[10] बुधः सौम्यः समौ [11]सौरिशनैश्चरौ।
[12]तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः ॥२८॥
[13]सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः।
राशीनामुदयो लग्नं[14] ते तु मेषवृषादयः ॥२९॥
[15]सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः।

---

१ विशाखाके २ नाम। २ पुष्यके ३ नाम। ३ धनिष्ठाके २ नाम। ४ पूर्वा और उत्तराभाद्रपदके २ नाम। ५ मृगशिराके ३ नाम। ६ मृगशिराके मस्तकपर स्थित पाँच नक्षत्रोंका १ नाम। ७ बृहस्पतिके ९ नाम। ८ शुक्रके ६ नाम। ९ मंगलके ५ नाम। १० बुधके ३ नाम। ११ शनिके २ नाम। १२ राहुके ५ नाम। १३ सप्तर्षिका १ नाम। १४ राश्युदयका १ नाम। १५ सूर्यके ३७ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

भास्कराहस्करब्रध्नप्रभाकरविभाकराः ॥३०॥
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः ॥३१॥
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ।
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ॥३२॥
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ।
पद्माक्षस्तेजसां राशिश्छायानाथस्तमिस्रहा ॥३३॥
कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ।
प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः ॥३४॥
इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः
[१]माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्वकाः ॥३५॥
[२]सूरसूतोऽरुणोनूरुः काश्यपिर्गरुडाग्रजः ।
परिवेशस्तु [३]परिधिरुपसूर्यकमण्डले ॥३६॥
कि[४]रणोऽस्रमयूखांशुगभस्तिघृणिरश्मयः ।
भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम् ॥३७॥
स्युः [५]प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः ।

---

१ सूर्यके पूर्वमें स्थित तीन ग्रहोंका १ नाम । २ सूर्यके सारथीके ५ नाम । ३ सूर्यकी परिधिके ४ नाम । ४ किरणके ११ नाम । ५ दीप्तिके ११ नाम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः ॥३८॥
[1]कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ।
[2]तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका ॥३९॥
इति दिग्वर्गः ।

---

४ अथ कालवर्गः

[5]कालो दिष्टोऽप्यनेहाऽपि समयोऽप्यथ [6]पक्षतिः ।
प्रतिपद्द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो[7] द्वयोः ॥१॥
[8]घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ ।
[9]प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि ॥२॥
(व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते) ।
प्रभातं च [10]दिनान्ते तु सायं संध्या पितृप्रसूः ॥३॥
[11]प्राह्णापराह्णमध्यह्नास्त्रिसंध्यमथ [12]शर्वरी ।

---

१ धूपके ३ नाम । २ थोड़ी गर्मीके ४ नाम । ३ तेज गर्मीके ३ नाम । ४ मृगतृष्णाके २ नाम । ५ समयके ४ नाम । ६ प्रतिपदाके २ नाम । ७ प्रतिपदादिका १ नाम । ८ दिनके ५ नाम । ९ प्रभातके ६ नाम । १० सन्ध्याका १ नाम । ११ प्रातः मध्याह्न और सायंकालके १-१ नाम । १२ रातके १२ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ॥४॥
विभावरीतमस्विन्यौ रजनी यामिनी तमी ।
[1]तमिस्रा तामसी रात्रिर्ज्यौत्स्नी[2] चन्द्रिकयान्विता ॥५॥
[3]आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ।
[4]गणरात्रं निशा बह्व्यः [5]प्रदोषो रजनीमुखम् ॥६॥
[6]अर्धरात्रनिशीथौ द्वौ द्वौ [7]यामप्रहरौ समौ ।
[8]स पर्वसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ॥७॥
[9]पक्षान्तौ पञ्चदश्यौ द्वे पौर्णमासी[10] तु पूर्णिमा ।
[11]कलाहीने सानुमतिः पूर्णे राका[12] निशाकरे ॥८॥
[13]अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ।
सा[14] दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः[15] ॥९॥

---

१ बहुत अन्धेरी रातका १ नाम । २ चाँदनी रातके ७ नाम । ३ दो दिनोंके बीचकी रातका १ नाम । ४ रात्रिसमुदायका १ नाम । ५ रात्रिके प्रारम्भके २ नाम । ६ अर्धरात्रिके २ नाम । ७ पहरके २ नाम । ८ प्रतिपदा और पूर्णिमाके बीचकी सन्धिका १ नाम । ९ पक्षान्तका १ नाम । १० पूर्णिमाके २ नाम । ११ क्षीण कलावाली पूर्णिमाका १ नाम । १२ पूर्ण चन्द्रमावाली पूर्णिमाका १ नाम । १३ अमावसके ४ नाम १४ चन्द्रोदययुक्त अमावसका १ नाम । १५ नष्टचन्द्र अमावसका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उपरागो ग्रहो राहुग्रस्ते[2] त्विन्दौ च पूष्णि च ।
सोपप्लवोपरक्तौ द्वावग्न्युत्पात[3] उपाहितः ॥१०॥
एकयोक्त्या[4] पुष्पवन्तौ दिवाकरनिशाकरौ ।
अष्टादश[5] निमेषास्तु काष्ठा [6]त्रिंशत्तु ताः कला ॥११॥
तास्तु[7] त्रिंशत्क्षणस्ते[8] तु मुहूर्तो द्वादशास्त्रियाम् ।
ते तु त्रिंशदहोरात्रः[9] पक्षस्ते[10] दश पञ्च च ॥१२॥
[11]पक्षौ पूर्वापरौ शुक्लकृष्णौ [12]मासस्तु तावुभौ ।
द्वौ द्वौ मार्गादिमासौ[13] स्यादृतुस्तैरयनं [14]त्रिभिः ॥१३॥
[15]अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ।
समरात्रिन्दिवे[16] काले विषुवद्विषुवं च तत् ॥१४॥

---

१ ग्रहणके २ नाम । २ राहुग्रस्त सूर्य-चन्द्रके २ नाम । ३ धूमकेतुके २ नाम । ४ सूर्य-चन्द्रका संयुक्त १ नाम । ५ अष्टादश निमेषका १ नाम । ६ तीस काष्ठाका १ नाम । ७ क्षणका १ नाम । ८ मुहूर्तका १ नाम । ९ तीस मुहूर्तका १ नाम । १० पन्द्रह अहोरात्रका १ नाम । ११ शुक्ल-कृष्ण-पक्षका १ नाम । १२ महीनेका १ नाम । १३ ऋतुका १ नाम । १४ अयनका १ नाम । १५ अयनभेदका १ नाम । १६ समान दिन-रात्रिका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

(पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे) ॥१५॥
[1]मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः।
पौषे तैषसहस्यौ[2] द्वौ तपा[3] माघेऽथ [4]फाल्गुने ॥१६॥
स्यात्तपस्यः फाल्गुनिकः [5]स्याच्चैत्रे चैत्रिको मधुः।
[6]वैशाखे माधवो राधो [7]ज्येष्ठे शुक्रः [8]शुचिस्त्वयम् ॥१७॥
आषाढे [9]श्रावणे तु स्यान्नभाः श्रावणिकश्च सः
स्युर्नभस्यप्रौष्ठ[10]पदभाद्रभाद्रपदाः समाः ॥१८॥
[11]स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात्तु [12]कार्तिके।
बाहुलोर्जौ कार्तिकिको [13]हेमन्तः शिशिरो[14]ऽस्त्रियाम् ॥१९॥
[15]वसन्ते पुष्पसमयः [16]सुरभिर्ग्रीष्म ऊष्मकः।

---

१ मार्गशीर्षके ४ नाम। २ पौषके ३ नाम। ३ माघके २ नाम। ४ फागुनके ३ नाम। ५ चैतके ३ नाम। ६ वैशाखके ३ नाम। ७ ज्येष्ठके २ नाम। ८ असाढ़के २ नाम। ९ सावनके ३ नाम। १० भादोंके ४ नाम। ११ कुआरके ३ नाम। १२ कार्तिकके ४ नाम। १३ अगहन-पूसकी ऋतुका १ नाम। १४ माघ-फागुनकी ऋतुका १ नाम। १५ चैत-वैशाखकी ऋतुके ३ नाम। १६ ज्येष्ठ-वैशाखकी ऋतुके ७ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः ॥२०॥
स्त्रियां [1]प्रावृट् स्त्रियां भूम्नि वर्षा अथ [2]शरत्स्त्रियाम् ।
षडमी [3]ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ॥२१॥
[4]संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः ।
मासेन[5] स्यादहोरात्रः पैत्रो [6]वर्षेण दैवतः ॥२२॥
दैवे युगसहस्रे द्वे ब्राह्मौ कल्पौ तु तौ नृणाम् ।
[7]मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ॥२३॥
संवर्तः[10] प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ।
अस्त्री [11]पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् ॥२४॥
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ।
[12]स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ॥२५॥
[13]मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः ॥
स्यादानन्दथुरानन्दः शर्मशातसुखानि च ॥२६॥

---

१ सावन भादोंकी ऋतुके २ नाम । २ कुआर-कार्तिककी ऋतुका १ नाम । ३ छहों ऋतुओंका १ सम्मिलित नाम । ४ वर्षके ६ नाम । ५ पितरोंके अहोरात्रका १ नाम । ६ देवोंके अहोरात्रका १ नाम । ७ ब्रह्माके अहोरात्रका १ नाम । ८ ब्रह्माके दिनका १ नाम । ६ मन्वन्तरका १ नाम । १० प्रलयके ३ नाम । ११ पापके १२ नाम । १२ धर्मके ५ नाम । १३ आनन्दके १२ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥२७॥
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ।
मतल्लिका[2] मचर्चिका प्रकाण्डमुद्धतल्लजौ ॥२८॥
[3]प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ।
दैवं[4] दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥२९॥
[5]हेतुर्ना कारणं बीजं [6]निदानं त्वादिकारणम् ।
क्षेत्रज्ञ [7]आत्मा पुरुषः [8]प्रधानं प्रकृतिः स्त्रियाम् ॥३०॥
विशेषः कालिकोऽवस्था [9]गुणाः सत्त्वं रजस्तमः ।
[10]जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ॥३१॥
[11]प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ।
[12]जातिर्जातं च सामान्यं [13]व्यक्तिस्तु पृथगात्मता ॥३२॥
चित्तं[14] तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।

इति कालवर्गः ।

---

१ प्रशस्तके ५ नाम । २ सौभाग्यका १ नाम । ३ भाग्यके ६ नाम । ४ कारणके ३ नाम । ५ मुख्य कारणके २ नाम । ६ आत्माके ३ नाम । ७ प्रकृतिके २ नाम । ८ कालावस्थाका १ नाम । ६ तीनों गुणोंका १-१ नाम । १० जन्मके ६ नाम । ११ प्राणीके ६ नाम । १२ जातिके ३ नाम । १३ व्यक्तिके २ नाम । १४ मनके ७ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५ धीवर्गः ।

बुद्धि[1]र्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥ १ ॥
धीर्धारणावती मेधा[2] संकल्पः[3] कर्म मानसम् ।
अवधानं समाधानं प्रणिधानं तथैव च ॥ २ ॥
चि[4]त्ताभोगो मनस्कारश्च[5]र्चा संख्या विचारणा ।
अध्याहारस्तर्क[6] ऊहो [7]विचिकित्सा तु संशयः ॥ ३ ॥
संदेहद्वापरौ चार्थ समौ निर्णयनिश्चयौ ॥ ४ ॥
मिथ्यादृष्टिर्नास्तिकता[9] व्यापादो[10] द्रोहचिन्तनम् ।
समौ[11] सिद्धान्तराद्धान्तौ[12] भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥५॥
संविदागूः[13] प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ६ ॥

---

१ बुद्धिके १४ नाम । २ धारणाशक्तियुक्त बुद्धिका १ नाम । ३ मानसिक कर्मका १ नाम । ४ सुख आदिमें आसक्त मनके २ नाम । ५ विचारके ३ नाम । ६ तर्कके ३ नाम । ७ संशयके ४ नाम । ८ निश्चयके २ नाम । ९ नास्तिकताके १ नाम । १० परद्रोहचिन्तनके २ नाम । ११ सिद्धान्तके २ नाम । १२ भ्रमके ३ नाम । १३ स्वीकृतिके १० नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

मोक्षे[1] धीर्ज्ञानमन्यत्र विज्ञानं[2] शिल्पशास्त्रयोः ।
मुक्तिः[3] कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥ ७ ॥
मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः[4] स्त्रियाम् ।
रूपं[5] शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥ ८ ॥
गोचरा इन्द्रियार्थाश्च हृषीकं[6] विषयीन्द्रियम् ।
कर्मेन्द्रियं[7] तु पाय्वादि मनोनेत्रादि[8] धीन्द्रियम् ॥ ९ ॥
तुवरस्तु[9] कषायोऽस्त्री [10]मधुरो [11]लवणः [12]कटुः ।
[13]तिक्तोऽम्लश्च [14]रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥१०॥
[15]विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।
[16]आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् ॥११॥
समाकर्षी[17] तु निर्हारी [18]सुरभिर्घ्राणतर्पणः ।

---

१ मोक्षोपयोगिनी बुद्धिका १ नाम। २ शिल्पादिविषयक बुद्धिका १ नाम। ३ मोक्षके ८ नाम। ४ अज्ञानके ३ नाम। ५ विषयोंके ५ नाम। ६ इन्द्रियोंके ३ नाम। ७ कर्मेन्द्रियका १ नाम। ८ ज्ञानेन्द्रियका १ नाम। ९ कसैले रसके २ नाम। १० मिठासका १ नाम। ११ नमकीनका १ नाम। १२ कडुवे रसका १ नाम। १३ तीतेका १ नाम। १४ खटासका १ नाम। १५ मनोहारी सुगन्धिका १ नाम। १६ अति सुगन्धिका १ नाम। १७ दूरसे आनेवाली सुगन्धिके २ नाम। १८ सुगन्धिके ४ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

इष्टगन्धः सुगन्धिः स्यादामोदी[1] मुखवासनः ॥१२॥
पूतिर्गन्धिस्तु[2] दुर्गन्धो विस्रं[3] स्यादामगन्धि यत् ।
शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डुराः ॥१३॥
अवदातः सितो गौरोऽवलक्षो धवलोऽर्जुनः ॥
[5]हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु[6] धूसरः ॥१४॥
कृष्णे[7] नीलासितश्यामकालश्यामलमेचकाः ।
पीतो[8] गौरो हरिद्राभः पालाशो[9] हरितो हरित् ॥१५॥
[10]लोहितो रोहितो रक्तः शोणः[11] कोकनदच्छविः ।
अव्यक्तरागस्त्वरुणः[12] श्वेतरक्तस्तु[13] पाटलः ॥१६॥
श्यावः[14] स्यात्कपिशो[15] धूम्रधूमलौ कृष्णलोहिते ।
कडारः[16] कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥१७॥

---

१ मुखको सुवासित करनेवाली सुगन्धिके २ नाम । २ दुर्गन्धिके २ नाम । ३ कच्चे मांस आदिकी दुर्गन्धिके २ नाम । ४ शुक्लवर्णके १३ नाम । ५ पीतमिश्रित शुक्लके ३ नाम । ६ मटमैलेके २ नाम । ७ काले रंगके ७ नाम । ८ पीले रंगके ३ नाम । ९ हरे रंगके ३ नाम । १० लाल रंगके ३ नाम । ११ गाढ़े लाल रंगके ३ नाम । १२ गुलाबी रंगके २ नाम । १३ श्वेतमिश्रित रक्तवर्णके २ नाम । १४ कृष्ण पीत रंगके २ नाम । १५ कृष्ण-रक्त रंगके ३ नाम । १६ भूरे रंगके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[1]चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।
गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥१८॥

इति धीवर्गः ।

—*—

६ अथ शब्दादिवर्गः ।

[2]ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
[3]व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥
[4]अपभ्रंशोऽपशब्दः स्याच्छास्त्रे[5] शब्दस्तु वाचकः ।
तिङ्सुबन्तचयो[6] वाक्यं क्रिया वा कारकान्विता ॥ २ ॥
श्रुतिः[7] स्त्री वेद आम्नायस्त्रयी धर्मस्तु[8] तद्विधिः ।
स्त्रियामृक्सामयजुषी[9] इति वेदास्त्रयस्त्रयी[10] ॥ ३ ॥
शिक्षेत्यादि[11] श्रुतेरङ्गमोङ्कारप्रणवौ[12] समौ ।
इतिहासः[13] पुरावृत्तमुदात्ताद्यास्त्रयः[14] स्वराः ॥ ४ ॥

१ विचित्र रंगके ६ नाम। २ सरस्वतीके ७ नाम। ३ भाषणके ६ नाम। ४ अपभ्रंशके २ नाम। ५ शब्दका १ नाम। ६ वाक्यका १ नाम। ७ वेदके ४ नाम। ८ वेदविहित कर्मका १ नाम। ९ वेदत्रयीके १-१ नाम। १० तीनों वेदोंका १ नाम। ११ वेदांगका १ नाम। १२ ओंकारके २ नाम। १३ पूर्वचरितके २ नाम। १४ स्वरोंका ३ नाम।

Sri. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आन्वीक्षिकी [2]दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।
[3]आख्यायिकोपलब्धार्था [4]पुराणं पञ्चलक्षणम् ॥ ५ ॥
[5]प्रबन्धकल्पना कथा [6]प्रवह्लिका प्रहेलिका ।
[7]स्मृतिस्तु धर्मसंहिता [8]समाहृतिस्तु संग्रहः ॥ ६ ॥
[9]समस्या तु समासार्था [10]किंवदन्ती जनश्रुतिः ।
[11]वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः [12]स्यादथाह्वयः ॥ ७ ॥
आख्याह्वे अभिधानं च नामधेयं च नाम च ।
[13]हूतिराकारणाह्वानं [14]संहूतिर्बहुभिः कृता ॥ ८ ॥
[15]विवादो व्यवहारः [16]स्यादुपन्यासस्तु वाङ्मुखम् ।
[17]उपोद्घात उदाहारः [18]शपनं शपथः पुमान् ॥ ९ ॥
[19]प्रश्नोऽनुयोगः पृच्छा च [20]प्रतिवाक्योत्तरे समे ।

---

१ तर्कविद्याका १ नाम । २ अर्थशास्त्रका १ नाम । ३ कहानीके २ नाम । ४ पुराणके २ नाम । ५ कथाके २ नाम । ६ पहेलीके २ नाम । ७ स्मृतिके २ नाम । ८ संग्रहके २ नाम । ९ समस्याके ३ नाम । १० अफवाहके २ नाम । ११ वृत्तान्तके ४ नाम । १२ नामके ६ नाम । १३ पुकारनेके ३ नाम । १४ बहुतेरे लोगोंके एक साथ पुकारनेका १ नाम । १५ विवादके २ नाम । १६ वार्तारम्भके २ नाम । १७ उदाहरणके २ नाम । १८ शपथके २ नाम । १९ प्रश्नके ३ नाम । २० उत्तरके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

मिथ्याभियोगो[1]ऽभ्याख्यानमथ [2]मिथ्याभिशंसनम् ॥१०॥
अभिशापः प्रणादस्तु[3] शब्दः स्यादनुरागजः ।
यशः[4] कीर्तिः समज्ञा च स्तवः[5] स्तोत्रं स्तुतिर्नुतिः ॥११॥
आम्रेडितं[6] द्विस्त्रिरुक्तमुच्चैर्घुष्टं[7] तु घोषणा ।
काकुः[8] स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥१२॥
[9]अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥१३॥
पारुष्यमतिवादः[10] स्याद्भर्त्सनं[11] त्वपकारगीः ।
यः सनिन्द[12] उपालम्भस्तत्र स्यात्परिभाषणम् ॥१४॥
तत्र त्वाक्षारणा[13] यः स्यादाक्रोशो मैथुनं प्रति ।

---

१ मिथ्या आक्षेपके २ नाम । २ झूठा दोष लगानेके २ नाम । ३ प्रेमसे उत्पन्न शब्दका १ नाम । ४ कीर्तिके ३ नाम । ५ स्तुतिके ४ नाम । ६ दो-तीन वार कहे शब्दका १ नाम । ७ जोरसे कहे शब्दके २ नाम । ८ शोक-भय आदिसे विकृत शब्दका १ नाम । ९ निन्दाके १० नाम । १० अप्रिय वचनके २ नाम । ११ उपकारी वाक्यके २ नाम । १२ निन्दायुक्त उलाहनेका १ नाम । १३ परस्त्री या परपुरुषसे मैथुन सम्बन्धी वार्ताका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

स्यादाभाषणमालापः[1] प्रलापो[2]ऽनर्थकं वचः ॥१५॥
[3]अनुलापो मुहुर्भाषा [4]विलापः परिदेवनम् ।
[5]विप्रलापो विरोधोक्तिः [6]संलापो भाषणं मिथः ॥१६॥
[7]सुप्रलापः [8]सुवचनमपलापस्तु निह्नवः ॥
चोद्यमाक्षेपाभियोगौ [10]शापाक्रोशौ दुरेषणा ॥१७॥
[11]अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्या विकत्थनम् ।
[12]सन्देशवाग्वाचिकं स्याद्वाग्भेदास्तु त्रिषूत्तरे ॥१८॥
[13]रुशती वागकल्याणी [14]स्यात्कल्या तु शुभात्मिका ।
[15]अत्यर्थमधुरं सान्त्वं संगतं[16] हृदयंगमम् ॥१९॥

---

१ सम्भाषणके २ नाम। २ बकवासके १ नाम। ३ एक ही बात बार बार कहनेके २ नाम। ४ रोकर बात करनेके २ नाम। ५ परस्पर विरुद्ध वचनके २ नाम। ६ एकान्तमें बात करनेका १ नाम। ७ प्रेमवचनके २ नाम। ८ कही बात छिपानेके २ नाम। ९ अभियोगके ३ नाम। १० शापके ३ नाम। ११ चापलूसीके ३ नाम। १२ सन्देशके २ नाम। १३ अशुभ वाणीका १ नाम। १४ शुभ वाणीका १ नाम। १५ बहुत मीठी वाणीका १ नाम। १६ मनमें जम जानेवाली बात का १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]निष्ठुरं परुषं ग्राम्यमश्लीलं[2] सूनृतं[3] प्रिये ।
सत्येऽथ[4] सङ्कुलक्लिष्टे परस्परपराहते ॥ २० ॥
लुप्तवर्णपदं[5] ग्रस्तं निरस्तं[6] त्वरितोदितम् ।
अम्बूकृतं[7] सनिष्ठीवमबद्धं[8] स्यादनर्थकम् ॥ २१ ॥
अनक्षरमवाच्यं[9] स्यादाहतं[10] तु मृषार्थकम् ।
(सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम्) ॥२२॥
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ।
अथ म्लिष्टमविस्पष्टं[11] वितथं त्वनृतं वचः ॥ २३ ॥
सत्यं[12] तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।
शब्दे[13] निनादनिनदध्वनिध्वानरवस्वनाः ॥ २४ ॥
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः ।
आरवारावसंरावविरावा अथ [14]मर्मरः ॥ २५ ॥

---

१ कड़ी बातके २ नाम । २ भाँड़ आदिकी वाणीके २ नाम । ३ मीठी और सच बातका १ नाम । ४ परस्परविरोधी वचनके ३ नाम । ५ अधूरी बातके २ नाम । ६ जल्दीमें कही बातके २ नाम । ७ थूकके छींटेके साथ निकली बातके २ नाम । ८ न कहने लायक बातके २ नाम । ९ झूठी बातके १ नाम । १० अस्पष्ट बातके २ नाम । ११ झूठ बातके २ नाम । १२ सच बातके ४ नाम । १३ शब्दके १७ नाम । १४ वस्त्र और पत्तोंकी ध्वनिका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

स्वनिते वस्त्रपर्णानां भूषणानां[1] तु शिञ्जितम् ।
निक्वाणो[2] निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥२६॥
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः ।
कोलाहलः[3] कलकलस्तिरश्चां[4] वाशितं रुतम् ॥ २७ ॥
स्त्री प्रतिश्रुत्प्रतिध्वाने[5] गीतं[6] गानमिमे समे ।

इति शब्दादिवर्गः ।

—*—

७ अथ नाट्यवर्गः ।

निषादर्षभगान्धारषड्जमध्यमधैवताः[7] ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥
काकली[8] तु कले सूक्ष्मे ध्वनौ[9] तु मधुरास्फुटे ।
कलो मन्द्रस्तु[10] गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु[11] ॥२॥

---

१ गहनेकी ध्वनिका १ नाम । २ वीणा आदिकी ध्वनिके ५ नाम । ३ बहुतसे आदमियोंके शोर-गुलका २ नाम । ४ पक्षियोंकी चहचहाहटका १ नाम । ५ प्रतिध्वनिके २ नाम । ६ गायनके २ नाम । ७ स्वरोंके ७ नाम । ८ मधुर स्वरका १ नाम । ९ मधुर किन्तु अस्पष्ट ध्वनिका १ नाम । १० गम्भीर ध्वनिका १ नाम । ११ ऊँची आवाजका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

(नृणामुरसि मध्यस्थो द्वाविंशतिविधो ध्वनिः ।
स मन्द्रः कण्ठमध्यस्थस्तारः शिरसि गीयते)॥ ३ ॥
[1]समन्वितलयस्त्वेकतालो वीणा[2] तु वल्लकी ।
विपञ्ची सा[3] तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ४ ॥
तत[4] वीणादिकं वाद्यमानद्धं[5] मुरजादिकम् ।
वंशादिकं तु सुषिरं[6] कांस्यतालादिकं घनम्[7] ॥ ५ ॥
चतुर्विधमिदं वाद्यं[8] वादित्रातोद्यनामकम् ।
मृदङ्गा[9] मुरजा [10]भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः ॥६॥
स्याद्यशःपटहो[11] ढक्का भेरी[12] स्त्री दुन्दुभिः पुमान् ।
आनकः[13] पटहोऽस्त्री स्यात्कोणो[14] वीणादिवादनम् ॥७॥

---

१ गाने-बाजेकी लयके साम्यका १ नाम। २ वीणाके ३ नाम। ३ सात तारवाली वीणाका १ नाम। ४ वीणा आदि वाद्यका १ नाम। ५ मुरज आदि बाजोंका १ नाम। ६ बाँसुरी आदि बाजोंका १ नाम। ७ काँसेके ताल आदि बाजोंका १ नाम। ८ उपर्युक्त चारों बाजोंके २ नाम। ९ मृदंगके २ नाम। १० मृदंगके ३ भेद। ११ नगाड़ेके २ नाम। १२ भेरीके २ नाम। १३ डुग्गीके २ नाम। १४ सारंगी आदि बजानेकी धनुहीका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीणादण्डः[1] प्रवालः स्यात्ककुभस्तु[2] प्रसेवकः ।
कोलम्बकस्तु[3] कायोऽस्या उपनाहो[4] निबंधनम् ॥८॥
वाद्यप्रभेदा[5] डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च नर्तकीलासिके[6] समे ॥ ९ ॥
विलम्बितं[7] द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।
तालः[8] कालक्रियामानं लयः साम्यमथास्त्रियाम् ॥ १० ॥
[10]ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।
तौर्यत्रिकं[11] नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ ११ ॥
[12]भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषो नाट्योक्तौ [13]गणिकाऽज्जुका ॥१२॥

---

१ वीणाके दण्डका २ नाम । २ वीणाकी तुम्बीके २ नाम । ३ ताररहित वीणाके ढाँचेका १ नाम । ४ वीणाके ऊपरी भाग जहाँ तार बाँधा जाता है उसके २ नाम । ५ वाद्यविशेषोंका १-१ नाम । ६ नर्तकीके २ नाम । ७ विलम्बित-द्रुत-मध्य क्रमसे नाचने-बजाने-गानेका १-१ नाम । ८ तालका १ नाम । ९ लयका १ नाम । १० नृत्यके ६ नाम । ११ नाट्यके २ नाम । १२ स्त्रीवेषधारी नर्तकके ३ नाम । १३ स्टेजपर नाचनेवाली नर्तकीका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

भगिनीपतिरावुत्तो[1] भावो[2] विद्वानथाऽऽवुकः[3] ।
जनको युवराजस्तु[4] कुमारो भर्तृदारकः ॥ १३ ॥
राजा[5] भट्टारको देवस्तत्सुता[6] भर्तृदारिका ।
देवी[7] कृताभिषेकायामितरासु तु भट्टिनी[8] ॥१४॥
अब्रह्मण्यमवध्योक्तो[9] राजश्यालस्तु[10] राष्ट्रियः ।
अम्बा[11] माताऽथ बाला[12] स्याद्वासूरार्यस्तु[13] मारिषः ॥१५॥
अत्तिका[14] भगिनी ज्येष्ठा निष्ठा निर्वहणे[15] समे ।
हण्डे[16] हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ॥१६॥
अङ्गहारोऽङ्गविक्षेपो[17] व्यञ्जकाभिनयौ[18] समौ ।

---

१ बहनोईका १ नाम । २ विद्वानका १ नाम । ३ पिताका १ नाम । ४ युवराजके २ नाम । ५ राजाके ३ नाम । ६ राजकुमारीका १ नाम । ७ पटरानीका १ नाम । ८ साधारण रानियोंका १ नाम । ६ अबध्यका वध रोकनेकी चिल्लाहटका १ नाम । १० राजाके सालेका १ नाम । ११ माताके २ नाम । १२ कुमारियोंके २ नाम । १३ सूत्रधारके पार्श्ववर्तीके २ नाम । १४ जेठी बहिनका १ नाम । १५ नाटकीय पाँचवीं सन्धिके २ नाम । १६ नीच स्त्रीके पुकारनेका १, चेरीके पुकारनेका १ और सहेलीके पुकारनेका १ नाम । १७ लचक-लचककर नाचनेके २ नाम । १८ हाथ आदिसे भाव बतानेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्वृत्ते त्वङ्गसत्त्वाभ्यां[1] द्वे त्रिष्वांगिकसात्त्विके ॥ १७ ॥
श्रृंगा[2]रवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रौ च रसाः श्रृंगा[3]रः शुचिरुज्ज्वलः ॥ १८ ॥
उत्सा[4]हवर्धनो वीरः का[5]रुण्यं करुणा घृणा ।
कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽप्य[6]थो हसः ॥ १९ ॥
हासो हास्यं च बीभ[7]त्सं विकृतं त्रिष्विदं द्वयम् ।
विस्म[8]योऽद्भुतमाश्चर्यं चित्रमप्यथ[9] भैरवम् ॥ २० ॥
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ॥
भयंकरं प्रतिभयं रौद्रं[10] तूग्रममी त्रिषु ॥ २१ ॥
चतुर्दश दरस्त्रासो[11] भीतिर्भीः साध्वसं भयम् ।
विकारो[12] मानसो भावोऽनुभावो[13] भावबोधकः ॥२२॥

---

१ भौं आदि मटकानेका १ और अन्तःकरणके भावका १ नाम । २ शृङ्गार आदि रसोंके एक-एक करके ८ नाम । ३ शृङ्गाररसके ३ नाम । ४ वीर रसके २ नाम । ५ करुणा रसके ७ नाम । ६ हास्यरसके ३ नाम । ७ बीभत्स रसके २ नाम । ८ अद्भुत रसके ४ नाम । ९ भयानक रसके ९ नाम । १० रौद्र रसके २ नाम । ११ भयके ६ नाम । १२ विकारका १ नाम । १३ भावबोधक रसका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गर्वोऽभिमानोऽहंकारो[1] मानश्चित्तसमुन्नतिः[2] ।
दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः ॥ २३ ॥
अनादरः[3] परिभवः परीभावस्तिरस्क्रिया ।
रीढावमाननावज्ञावहेलनमसूर्क्षणम् ॥ २४ ॥
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा[4] साऽपत्रपाऽन्यतः[5] ।
क्षान्तिस्तितिक्षा[6]ऽभिध्या[7] तु परस्य विषये स्पृहा ॥ २५ ॥
अक्षान्तिरीर्ष्या[8]ऽसूया[9] तु दोषारोपो गुणेष्वपि
वैरं[10] विरोधो विद्वेषो मन्युशोकौ[11] तु शुक्स्त्रियाम् ॥२६॥
पश्चात्तापोऽनुतापश्च[12] विप्रतीसार इत्यपि ।
कोपक्रोधामर्षरोषप्रतिघा[13] रुट्क्रुधौ स्त्रियौ ॥ २७ ॥
शुचौ[14] तु चरिते शीलमुन्मादश्चित्तविभ्रमः[15] ।
प्रेमा[16] ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम्[17] ॥२८॥

---

१ अहंकारके ३ नाम । २ बड़प्पनका १ नाम । ३ अपमानके ६ नाम । ४ लज्जाके ५ नाम । ५ दूसरोंके सामनेकी लज्जाका १ नाम । ६ क्षमाके २ नाम । ७ परद्रव्यकी इच्छाका १ नाम । ८ डाहके २ नाम । ९ औरोंके गुणोंमें भी दोष देखनेके २ नाम । १० वैरके ३ नाम । ११ शोकके ३ नाम । १२ पछतावाके ३ नाम । १३ क्रोधके ७ नाम । १४ शुद्ध आचरणका १ नाम । १५ उन्मादके २ नाम । १६ स्नेहके ५ नाम । १७ इच्छाके १२ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

इच्छा कांक्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः ।
कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं[1] लालसा द्वयोः ॥२९॥
उपाधिर्ना[2] धर्मचिन्ता पुंस्याधिर्मानसी व्यथा[3] ।
स्याच्चिन्ता[4] स्मृतिराध्यानमुत्कंठोत्कलिके[5] समे ॥३०॥
[6]उत्साहोऽध्यवसायः स्यात्सवीर्यमतिशक्तिभाक्[7] ।
[8]कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ॥ ३१ ॥
कुसृतिर्निकृतिः शाठ्यं [9]प्रमादोऽनवधानता ।
कौतूहलं[10] कौतुकं च कुतुकं च कुतूहलम् ॥ ३२ ॥
स्त्रीणां[11] विलासविब्वोकविभ्रमा ललितं तथा ।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ॥ ३३ ॥
द्रवकेलिपरीहासाः[12] क्रीडा लीला च नर्म च ।
व्याजोऽपदेशो[13] लक्ष्यं च क्रीडा[14] खेला च कूर्दनम् ॥३४॥

---

१ अतिशय चाहका १ नाम । २ धर्मचिन्तनके २ नाम । ३ मनोव्यथाके २ नाम । ४ यादके ३ नाम । ५ उत्कण्ठाके २ नाम । ६ उत्साहके २ नाम । ७ प्रबल उत्साहका १ नाम । ८ कपटके ६ नाम । ९ लापर्वाहीके २ नाम । १० कौतुकके ४ नाम । ११ स्त्रियोंके नखरोंके ६ नाम । १२ क्रीडामात्रके ६ नाम । १३ बहानेके ३ नाम । १४ बच्चोंके खेलके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]घर्मो निदाघः स्वेदः स्यात्[2]प्रलयो नष्टचेष्टता ।
[3]अवहित्थाकारगुप्तिः [4]समौ संवेगसंभ्रमौ ॥ ३५ ॥
स्या[5]दाच्छुरितकं हासः सोत्प्रासः [6]स मनाक्स्मितम् ।
[7]मध्यमः स्याद्विहसितं [8]रोमाञ्चो रोमहर्षणम् ॥ ३६ ॥
[9]क्रन्दितं रुदितं क्रुष्टं [10]जृम्भस्तु त्रिषु जृम्भणम् ।
[11]विप्रलम्भो विसंवादो [12]रिङ्गणं स्खलनं समे ॥ ३७ ॥
स्यान्निद्रा[13] शयनं स्वापः स्वप्नः संवेश इत्यपि ।
तन्द्री[14] प्रमीला [15]भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ॥ ३८ ॥
[16]अदृष्टिः स्यादसौम्येऽक्ष्णि [17]संसिद्धिप्रकृती त्विमे ।
स्वरूपं च स्वभावश्च निसर्गश्चाथ [18]वेपथुः ॥ ३९ ॥
कम्पोऽथ [19]क्षण उद्धर्षो मह उद्धव उत्सवः ॥

इति नाट्यवर्गः ।

---

१ पसीनेके ३ नाम । २ बेहोशीके २ नाम । ३ आकृति छिपानेके २ नाम । ४ खुशीसे जल्दबाजीके २ नाम । ५ अमर्षजनित हास्यका १ नाम । ६ मुसकानके २ नाम । ७ साधारण हँसीका १ नाम । ८ रोमांचके २ नाम । ९ रोदनके ३ नाम । १० जँभाईके २ नाम । ११ ठगहारीकी बात-चीतके २ नाम । १२ फिसलनेके २ नाम । १३ नींदके ३ ५ नाम । १४ खुमारीके २ नाम । १५ भौं टेढ़ी करनेके ५ नाम । १६ टेढ़ी नजरका १ नाम । १७ स्वभावके ५ नाम । १८ कम्पके २ नाम । १९ उत्सवके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

८ अथ पातालभोगिवर्गः ।

[1]अधोभुवनपातालं बलिसद्म रसातलम् ।
नागलोकोऽथ [2]कुहरं शुषिरं विवरं बिलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।
[3]गर्तावटौ भुवि श्वभ्रे [4]सरन्ध्रे शुषिरं त्रिषु ॥ २ ॥
[5]अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।
[6]ध्वान्ते गाढेऽन्धतमसं [7]क्षीणेऽवतमसं [8]तमः ॥ ३ ॥
विष्वक्संतमसं [9]नागाः काद्रवेयास्तदीश्वरः ।
शेषोऽनन्तो [10]वासुकिस्तु सर्पराजोऽथ [11]गोनसे ॥ ४ ॥
तिलित्सः [12]स्यादजगरे [13]शयुर्वाहस इत्युभौ ।
अलगर्दो[14] जलव्यालः समौ[15] राजिलडुण्डुभौ ॥ ५ ॥

---

१ पातालके ५ नाम । २ बिलके ११ नाम । ३ गढ्ढेके २ नाम । ४ सछिद्र वस्तुका १ नाम । ५ अन्धकारके ५ नाम । ६ गहरे अन्धकारका १ नाम । ७ थोड़ी अँधियारीका १ नाम । ८ चतुर्दिक् फैले अन्धेरका १ नाम । ९ नागोंके २ नाम । १० नागस्वामीके २ नाम । ११ सर्पराजके २ नाम । १२ गोहुँवन साँपके २ नाम । १३ अजगरके ३ नाम । १४ पनिहा साँपके २ नाम । १५ दोमुँहे साँपके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालुधानो[1] मातुलाहिर्निर्मुक्तो[2] मुक्तकञ्चुकः ।
सर्पः[3] पृदाकुर्भुजगो भुजंगोऽहिर्भुजंगमः ॥ ६ ॥
आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ।
उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥ ८ ॥
(लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा ॥ ९ ॥
अहेः[4] शरीरं भोगः स्याद्[5]आशीरप्यहिदंष्ट्रिका) ।
त्रिष्वा[6]हेयं विषास्थ्यादि स्फ[7]टायां तु फणा द्वयोः ॥१०॥
समौ क[8]ञ्चुकनिर्मोकौ क्ष्वेडस्तु[9] गरलं विषम् ।
पुंसि क्लीबे च [10]काकोलकालकूटहलाहलाः ॥ ११ ॥
सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ।

---

१ चितकबरे साँपके २ नाम । २ केंचुल छोड़े हुए साँपके २ नाम । ३ साँपके ३३ नाम । ४ सर्पके शरीरका १ नाम । ५ साँपके दाँतके २ नाम । ६ साँपके विष और हड्डी आदिका १ नाम । ७ फनके २ नाम । ८ केंचुलके २ नाम । ९ विषमात्रके ३ नाम । १० विषके ९ भेद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दारदो वत्सनाभश्च विषभेदा अमी नव ॥ १२ ॥
विषवैद्यो[1] जाङ्गुलिको व्यालग्राह्यहितुण्डिकः[2] ।

इति पातालभोगिवर्गः।

९ अथ नरकवर्गः

स्यान्नारकस्तु[3] नरको निरयो दुर्गतिः स्त्रियाम्।
तद्भेदास्तपनावीचिमहारौरवरौरवाः[4] ॥ १ ॥
संघातः कालसूत्रं चेत्याद्याः सत्त्वास्तु नारकाः[5] ।
प्रेता वैतरणी[6] सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥
विष्टिराजूः[7] कारणा[8] तु यातना तीव्रवेदना[9] ।
पीडा[10] बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥
स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ॥

इति नरकवर्गः।

---

१ विषवैद्यके २ नाम। २ साँप पकड़नेवालेके २ नाम। ३ नरकके ४ नाम। ४ नरकके ६ भेद। ५ नारकी प्राणियोंका १ नाम। ६ वैतरणीका १ नाम। ७ नारकीय भीषणताका १ नाम। ८ नरकमें जबर्दस्ती फेंकनेके २ नाम। ९ नरककी पीड़ाके ३ नाम। १० दुःखके ६ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१० अथ वारिवर्गः ।

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ॥ १ ॥
रत्नाकरो जलनिधिर्यादःपतिरपां पतिः ॥
तस्य प्रभेदाः क्षीरोदो लवणोदस्तथाऽपरे ॥ २ ॥
आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ॥
पयः कीलालममृतं जीवनं भुवनं वनम् ॥ ३ ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ॥ ४ ॥
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम् ।
भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ॥ ५ ॥
महत्सूल्लोलकल्लोलौ स्यादावर्तोऽम्भसां भ्रमः ।
पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥ ६ ॥
चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः ।

---

१ समुद्रके १५ नाम । २ समुद्रके २ भेद । ३ जलके २७ नाम । ४ जलविकार (बर्फ-शर्बत आदि) के २ नाम । ५ तरंगके २ नाम । ६ बड़ी तरंगके २ नाम । ७ भँवरका १ नाम । ८ पानीकी बूँदके ४ नाम । ९ चक्कर खाकर पानीके नीचे जानेके [illegible] । १० [illegible] २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कूलं[1] रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥
पारावारे[2] परार्वाची तीरे पात्रं[3] तदन्तरम् ।
द्वीपोऽस्त्रियामन्तरीपं[4] यदन्तर्वारिणस्तटम् ॥ ८ ॥
तोयोत्थितं[5] तत्पुलिनं सैकतं[6] सिकतामयम् ।
निषद्वरस्तु[7] जम्बालः पङ्कोऽस्त्री शादकर्दमौ ॥ ९ ॥
जलोच्छ्वासाः[8] परीवाहाः कूपकास्[9]तु विदारकाः ।
नाव्यं[10] त्रिलिङ्गं नौतार्ये स्त्रियां[11] नौस्तरणिस्तरिः ॥१०॥
उडुपं[12] तु प्लवः कोलः स्रोतोऽम्बुसरणं[13] स्वतः ।
आतरस्तरपण्यं[14] स्याद्द्रोणी[15] काष्ठाम्बुवाहिनी ॥ ११ ॥
सांयात्रिकः[16] पोतवणिक्कर्णधारस्तु[17] नाविकः ।

---

१ तटके ५ नाम । २ नदीके उस पारवाले तटका १ और इस पारवाले तटका १ नाम । ३ पाटका १ नाम । ४ टापूके २ नाम । ५ जलके बीचकी रेतीका १ नाम । ६ बालुकामय तटके २ नाम । ७ कीचड़के ५ नाम । ८ नलके २ नाम । ९ सूखी नदीमें बने गढ़ेके २ नाम । १० नाव चलने योग्य जलका १ नाम । ११ नावके ३ नाम । १२ छोटी नावका १ नाम । १३ सोतेका १ नाम । १४ उतराईके पैसेके २ नाम । १५ डोंगीके २ नाम । १६ नावसे व्यापार करनेवालोंके २ नाम । १७ मल्लाहके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

नियामकाः[1] पोतवाहाः कूपको[2] गुणवृक्षकः ॥ १२ ॥
नौकादण्डः[3] क्षेपणी स्यादरित्रं[4] केनिपातकः ।
अभ्रिः[5] स्त्री काष्ठकुद्दालः सेकपात्रं[6] तु सेचनम् ॥ १३ ॥
क्लीबेऽर्धनावं[7] नावोऽर्धेऽतीतनौकेऽतिनु[8] त्रिषु ।
त्रिष्वागाधात्प्रसन्नोऽच्छं[9] कलुषोऽनच्छ[10] आविलः ॥१४॥
निम्नं[11] गभीरं गम्भीरमुत्तानं[12] तद्विपर्यये ।
[13]अगाधमतलस्पर्शं कैवर्ते[14] दाशधीवरौ ॥ १५ ॥
आनायः[15] पुंसि जालं स्याच्छणसूत्रं[16] पवित्रकम् ।
मत्स्याधानी[17] कुवेणी स्याद्बडिशं[18] मत्स्यवेधनम् ॥ १६ ॥
पृथुरोमा[19] झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।

---

१ जहाजके रक्षकके २ नाम । २ मस्तूलके २ नाम । ३ डाँडेके २ नाम । ४ पतवारके २ नाम । ५ नौका साफ करनेवाली कुदालके २ नाम । ६ जल उलचनेवाले कठौतेके २ नाम । ७ अद्धी नावका १ नाम । ८ नौकासे तेज चलनेवाले प्राणीका १ नाम । ९ साफ पानीके २ नाम । १० मैले पानीके २ नाम । ११ गहराईके ३ नाम । १२ उथले जलका १ नाम । १३ अथाहके २ नाम । १४ माझीके ३ नाम । १५ जालके २ नाम । १६ सुतरीके बने जालके २ नाम । १७ मछली रखनेकी टोकरीके २ नाम । १८ वंशीके २ नाम । १९ मछलीके ८ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

विसारः शकुली चाथ [1]गडकः शकुलार्भकः ॥ १७ ॥
सहस्रदंष्ट्रः[2] पाठीन उलूपी[3] शिशुकः समौ।
नलमीनश्चिलिचिमः[4] प्रोष्ठी[5] तु शफरी द्वयोः ॥ १८ ॥
क्षुद्राण्डमत्स्यसंघातः[6] पोताधानमथो[7] झषाः।
रोहितो मद्गुरोः शालो राजीवः शकुलस्तिमिः ॥ १९ ॥
तिमिङ्गिलादयश्चाथ यादांसि[8] जलजन्तवः।
तद्भेदाः[9] शिशुमारोदशङ्कवो मकरादयः ॥ २० ॥
स्यात्कुलीरः[10] कर्कटकः कूर्मे[11] कमठकच्छपौ।
ग्राहोऽवहारो[12] नक्रस्तु[13] कुम्भीरोऽथ[14] महीलता ॥ २१ ॥
गण्डूपदः किञ्चुलको निहाका[15] गोधिका समे।
रक्तपा[16] तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥ २२ ॥

---

१ गलफटी मछलीके २ नाम। २ पढ़िनी मछलीके २ नाम। ३ सूँसके २ नाम। ४ भिंगवाके २ नाम। ५ सेहरीके २ नाम। ६ बच्चोंके २ नाम। ७ मछलियोंके ८ भेद। ८ जलजन्तुके २ नाम। ९ जलजन्तुओंके ५ भेद। १० केकड़ाके २ नाम। ११ कछुएके ३ नाम। १२ घड़ियालके २ नाम। १३ नाकके २ नाम। १४ केंचुएके ३ नाम। १५ गोहके २ नाम। १६ जोंकके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुक्तास्फोट:[1] स्त्रियां शुक्तिः शङ्खः[2] स्यात्कम्बुरस्त्रियौ ।
क्षुद्रशङ्खाः[3] शङ्खनखाः शम्बूका[4] जलशुक्तयः ॥ २३ ॥
भेके[5] मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।
शिली[6] गण्डूपदी भेकी[7] वर्षाभ्वी कमठी डुलिः[8] ॥ २४ ॥
मद्गुरस्य प्रिया शृङ्गी[9] दुर्नामा[10] दीर्घकोशिका ।
जलाशयो[11] जलाधारस्तत्रागाधजलो ह्रदः[12] ॥ २५ ॥
आहावस्तु[13] निपानं स्यादुपकूपजलाशये ।
[14]पुंस्येवाऽन्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २६ ॥
[15]नेमिस्त्रिकाऽस्य वीनाहो[16] मुखबन्धनमस्य यत् ।
[17]पुष्करिण्यां तु खातं स्यादखातं[18] देवखातकम् ॥ २७ ॥

---

१ सीपीके २ नाम । २ शंखके २ नाम । ३ छोटे शंखके २ नाम । ४ घोंघाके २ नाम । ५ मेढकके ६ नाम । ६ केंचुईके २ नाम । ७ मेढकीके २ नाम । ८ कछुईके २ नाम । ९ मद्गुरमत्स्यकी स्त्रीका १ नाम । १० झिंगवाके २ नाम । ११ तालाब आदिके २ नाम । १२ अगाध जलवाले कुण्डका १ नाम । १३ पशुओंके पानी पीनेकी चरहीके २ नाम । १४ कुएँके ४ नाम । १५ गढ़ारीके २ नाम । १६ कुएँकी जगतका १ नाम । १७ पोखरीके २ नाम । १८ पोखरेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]पद्माकरस्तडागोऽस्त्री [2]कासारः सरसी सरः ।
वेशन्तः[3] पल्वलं चाल्पसरो वापी तु [4]दीर्घिका ॥ २८ ॥
खेयं[5] तु परिखा[6]धारस्त्वम्भसां यत्र धारणम् ।
स्या[7]दालवालमावालमावापोऽथ [8]नदी सरित् ॥ २९ ॥
तरंगिणी शैवलिनी तटिनी ह्रादिनी धुनी ।
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगाऽऽपगा ॥ ३० ॥
कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती ।
गङ्गा[9] विष्णुपदी जह्नुतनया सुरनिम्नगा ॥ ३१ ॥
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ।
[10]कालिन्दी सूर्यतनया यमुना शमनस्वसा ॥ ३२ ॥
रेवा[11] तु नर्मदा सोमोद्भवा मेकलकन्यका ।
[12]करतोया सदानीरा बाहुदा[13] सैतवाहिनी ॥ ३३ ॥

---

१ अथाह जलवाले तालाबके २ नाम । २ पोखरीके ३ नाम । ३ गढहीके ३ नाम । ४ बावलीके २ नाम । ५ खाईके २ नाम । ६ बाँधका १ नाम । ७ थालेके ३ नाम । ८ नदीके १२ नाम । ९ गंगाजीके ८ नाम । १० यमुनाके ४ नाम । ११ नर्मदाके ४ नाम । १२ पार्वतीजीके विवाहमें कन्यादानके जलसे जायमान नदीके २ नाम । १३ बूढ़ी राप्तीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]शतद्रुस्तु शुतुद्रिः स्याद्[2]विपाशा तु विपाट् स्त्रियाम् ।
[3]शोणो हिरण्यवाहः [4]स्यात्कुल्याऽल्पा कृत्रिमा सरित् ॥ ३४ ॥
[5]शरावती [6]वेत्रवती [7]चन्द्रभागा [8]सरस्वती ।
[9]कावेरी सरितोऽन्याश्च [10]सम्भेदः सिन्धुसङ्गमः ॥ ३५ ॥
[11]द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ ।
देविकायां[12] सरय्वां च भवे दाविकसारवौ ॥ ३६ ॥
[13]सौगन्धिकं तु कह्लारं [14]हल्लकं रक्तसन्ध्यकम् ।
[15]स्यादुत्पलं कुवलयमथ [16]नीलाम्बुजन्म च ॥ ३७ ॥
इन्दीवरं च नीलेऽस्मिन्सिते [17]कुमुदकैरवे ।
[18]शालूकमेषां कन्दः [19]स्याद्वारिपर्णी तु कुम्भिका ॥ ३८ ॥

---

१ सतलजके २ नाम । २ व्यास नदीके २ नाम । ३ सोन नदीके २ नाम । ४ नहरका १ नाम । ५ साबरमतीका १ नाम । ६ बेतवाका १ नाम । ७ चनाबका १ नाम । ८ सरस्वतीका १ नाम । ९ कावेरीका १ नाम । १० समुद्रसंगमके २ नाम । ११ परनालेका १ नाम । १२ देविका और सरयूमें उत्पन्न द्रव्यका १ नाम । १३ सफेद कमलके २ नाम । १४ लाल कमलके २ नाम । १५ श्वेत कमलके २ नाम । १६ नील कमलके २ नाम । १७ कोईके २ नाम । १८ कमलकी जड़के २ नाम । १९ जलकुम्भीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]जलनीली तु शेवालं शैवलोऽथ कुमुद्वती ।
कुमुदिन्यां नलिन्यां तु बिसिनी पद्मिनीमुखाः ॥ ३९ ॥
वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥ ४० ॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ ४१ ॥
[5]पुण्डरीकं सिताम्भोजमथ [6]रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं [7]नालो नालमथास्त्रियाम् ॥ ४२ ॥
[8]मृणालं [9]बिसमब्जादिकदम्बे षण्डमस्त्रियाम् ।
[10]करहाटः शिफाकन्दः [11]किञ्जल्कः केसरोऽस्त्रियाम् ॥ ४३ ॥
[12]सम्वर्तिका नवदलं [13]बीजकोशो वराटकः ।
इति वारिवर्गः ।

---

१ सेवारके ३ नाम । २ कुमुदिनीके २ नाम । ३ कमलिनीके ३ नाम । ४ कमलके १६ नाम । ५ सफेद कमलके २ नाम । ६ लाल कमलके ३ नाम । ७ कमलदण्डके २ नाम । ८ मृणालके २ नाम । ९ कमलसमूहका १ नाम । १० कमलकन्दके २ नाम । ११ कमलकेसरके २ नाम । १२ कमल-कुमुदिनी आदिके नये पत्तोंके २ नाम । १३ कमल-बीजके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाट्यकम् ।
पातालभोगि नरकं वारि चैषां च सङ्गतम् ॥ १ ॥

इत्यमरसिंह कृतौ नामलिङ्गानुशासने ।
स्वरादिकाण्डः प्रथमः साङ्ग एवं समर्थितः ॥ २ ॥

इत्यमरकोशे प्रथमं काण्डं समाप्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ द्वितीयं काण्डम् ।

वर्गभेदाः ।

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः ।
नृब्रह्मक्षत्रविट्शूद्रैः साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

१ अथ भूमिवर्गः ।

भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा ॥
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥ १ ॥
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥ २ ॥
विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥ ३ ॥

---

१ भूमिके ३८ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

मृन्मृत्तिका[1] प्रशस्ता तु मृत्सा मृत्स्ना[2] च मृत्तिका।
उर्वरा[3] सर्वसस्याढ्या स्यादूषः[4] क्षारमृत्तिका॥ ४॥

ऊषवानूषरो[5] द्वावप्यन्यलिङ्गौ स्थलं स्थली[6]।
समानौ[7] मरुधन्वानौ द्वे खिलाप्रहते[8] समे॥ ५॥

त्रिष्वथो जगती[9] लोको विष्टपं भुवनं जगत्।
लोकोऽयं[10] भारतं वर्षं[11] शरावत्यास्तु योऽवधेः॥ ६॥

देशः प्राग्दक्षिणः प्राच्यः[12] उदीच्यः पश्चिमोत्तरः।
प्रत्यन्तो[13] म्लेच्छदेशः[14] स्यान्मध्यदेशस्तु मध्यमः॥ ७॥

आर्यावर्तः[15] पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः।

---

१ मिट्टीके २ नाम। २ अच्छी मिट्टीके २ नाम। ३ उपजाऊ मिट्टीका १ नाम। ४ खारी मिट्टीके २ नाम। ५ ऊसर जमीनके २ नाम। ६ स्थलके २ नाम। ७ निर्जल देशके २ नाम। ८ बिना जुते खेतके २ नाम। ९ जगत्के ५ नाम। १० हिन्दुस्तानका १ नाम। ११ सरजू नदीके पूर्व-दक्षिण देशका १ नाम। १२ सरजूके दक्षिणोत्तर देशका १ नाम। १३ म्लेच्छ देशके २ नाम। १४ मध्यप्रदेशके २ नाम। १५ विन्ध्य-हिमालयके मध्यस्थ देशके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

नीवृज्जनपदो[1] देशः[2] विषयौ तूपवर्तनम् ॥ ८ ॥
त्रष्वागोष्ठान्नडप्राये[3] नड्वान्नड्वल इत्यपि
कुमुद्वान्कुमुदप्राये[4] वेतस्वान्बहुवेतसे[5] ॥ ९ ॥
शाद्वलः[6] शादहरिते सजम्बाले[7] तु पङ्किलः ।
जलप्रायमनूपं[8] स्यात्पुंसि कच्छस्तथाविधः[9] ॥ १० ॥
स्त्री[10] शर्करा शर्करिलः शार्करः शर्करावति ।
देश एवादिमावेवमुन्नेनयाः[11] सिकतावति ॥ ११ ॥
देशो[12] नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥
सुराज्ञि[13] देशे राजन्वान्स्यात्ततोऽन्यत्र[14] राजवान् ।

---

१ मुल्कके २ नाम । २ देशके ३ नाम । ३ जिसमें नरकट विशेष उत्पन्न हों उसके २ नाम । ४ सफेद कमल पैदा होनेवाले देशका १ नाम । ५ बेत्रबहुल प्रदेशका १ नाम । ६ हरी घासवाले प्रदेशका १ नाम । ७ कीचड़वाले प्रदेशका १ नाम । ८ जलबहुल प्रदेशका १ नाम । ९ नदीके समीपवर्ती प्रदेशका १ नाम । १० पथरीले देशके ४ नाम । ११ वालुकाबहुल प्रदेशके ४ नाम । १२ नदीके जलसे सम्पन्न देशका १ और वर्षाके जलसे सम्पन्न देशका १ नाम । १३ अच्छे राजावाले देशका १ नाम । १४ साधारण राजावाले देशका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

गोष्ठं गोस्थानकं [1] तत्तु गौष्ठीनं [2] भूतपूर्वकम् ॥ १३ ॥
पर्यन्तभूः [3] परिसरः सेतुरालौ [4] स्त्रियां पुमान् ।
वामलूरश्च [5] नाकुश्च वल्मीकं पुन्नपुंसकम् ॥ १४ ॥
[6] अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः ।
सरणिः पद्धतिः पद्या वर्तन्येकपदीति च ॥ १५ ॥
[7] अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।
[8] व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥ १६ ॥
[9] अपन्थास्त्वपथं तुल्ये [10] शृङ्गाटकचतुष्पथे ।
[11] प्रान्तरं दूरशून्योऽध्वा कान्तारंवर्त्म [12] दुर्गमम् ॥ १७ ॥
गव्यूतिः [13] स्त्रीक्रोशयुगं नल्वः [14] किष्कुचतुःशतम् ।
[15] घण्टापथः संसरणं तत्पुरस्योपनिष्क्रमम् [16] ॥ १८ ॥

---

१ गोशालेके २ नाम। २ पुराने गोशालेका १ नाम। ३ नदी-पहाड़के समीपकी भूमिके २ नाम। ४ पुलके २ नाम। ५ बिमौटे (बाँबी) के ३ नाम। ६ रास्तेके १२ नाम। ७ अच्छी राहके ३ नाम। ८ बुरी राहके ५ नाम। ९ जहाँ रास्ता न हो ऐसे प्रदेशके २ नाम। १० चौराहेके २ नाम। ११ सूनी राहका १ नाम। १२ दुर्गम मार्गका १ नाम। १३ दो कोस मार्गके २ नाम। १४ चार सौ हाथ जमीनका १ नाम। १५ राजमार्गके २ नाम। १६ शहरकी सड़कका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।
दिवस्पृथिव्यौ गञ्जा[2] तु रुमा स्याल्लवणाकरः ॥ १९ ॥

इति भूमिवर्गः ।

---

२ अथ पुरवर्गः ।

पूः[3] स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु य[4]न्मूलनगरात्पुरम् ॥ १ ॥
तच्छाखानगरं वेशो वेश्या[5]जनसमाश्रयः ।
[6]आपणस्तु निषद्यायां विप[7]णिः पण्यवीथिका ॥ २ ॥
रथ्या[8] प्रतोली विशिखा स्याच्चयो वप्र[9]मस्त्रियाम् ।
[10]प्राकारो वरणः सालः प्राचीरं[11] प्रान्ततो वृतिः ॥ ३ ॥
भित्तिः [12]स्त्री कुड्य[13]मेडूकं यदन्तर्न्यस्तकीकसम् ।

---

१ आकाश पृथ्वीके ५ नाम । २ नमककी खानके २ नाम । ३ नगरके ७ नाम । ४ उपनगरका १ नाम । ५ रण्डीके घरके २ नाम । ६ बाज़ारके २ नाम । ७ दुकानके २ नाम । ८ गलीके ३ नाम । ९ मिट्टीके ढेरके २ नाम । १० घेरेके ३ नाम । ११ नगर आदिकी चहारदीवारीका १ नाम । १२ दीवारके २ नाम । १३ बौद्ध स्तूपका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]गृहं गेहोदवसिते वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तपस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥
वासः[2] कुटो द्वयोः शाला सभा सं[3]ञ्जवनं त्विदम् ।
चतुःशालं मु[4]नीनां तु पर्णशालोटजोऽस्त्रियाम् ॥ ६ ॥
चैत्य[5]मायतनं तुल्ये[6] वाजिशाला तु मन्दुरा ।
[7]आवेशनं शिल्पिशाला प्रपा[8] पानीयशालिका ॥ ७ ॥
[9]मठश्छात्रादिनिलयो गञ्जा[10] तु मदिरागृहम् ।
गर्भागारं[11] वासगृहमरिष्टं [12]सूतिकागृहम् ॥ ८ ॥
कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशाला शिरोगृहम् ।
वातायनं[13] गवाक्षोऽथ मण्डपोऽस्त्री[14] जनाश्रयः ॥ ९ ॥
[15]हर्म्यादि धनिनां वासः [16]प्रासादो देवभूभुजाम् ।

---

१ घरके १६ नाम । २ सभागृहके ४ नाम । ३ आँगनके २ नाम । ४ मुनियोंकी झोपड़ीके २ नाम । ५ यज्ञशालाके २ नाम । ६ घुड़सालके २ नाम । ७ कारीगरोंके घरके २ नाम । ८ पौसराके २ नाम । ९ मठका १ नाम । १० शराबके घरका २ नाम । ११ घरके मध्य भागके २ नाम । १२ सौरी-घरके २ नाम । १३ झरोखेके २ नाम । १४ मण्डपके २ नाम । १५ अमीरोंके घरका १ नाम । १६ देवता तथा राजाके घरका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सौधोऽस्त्री राजसदनमुपकार्योपकारिका[2] ॥ १० ॥
[3]स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ।
विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ॥ ११ ॥
स्त्र्यगारं [4]भूभुजामन्तः पुरं स्यादवरोधनम् ।
शुद्धान्तश्चावरोधश्च [5]स्यादट्टः क्षौममस्त्रियाम् ॥ १२ ॥
[6]प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ।
[7]गृहावग्रहणी [8]देहल्यङ्गणं चत्वराजिरे ॥ १३ ॥
अधस्ताद्दारुणि[9]शिला नासा[10]दारूपरि स्थितम् ।
[11]प्रच्छन्नमन्तर्द्वारं [12]स्यात्पक्षद्वारं तु पक्षकम् ॥ १४ ॥
[13]वलीकनीध्रे पटलप्रान्तेऽथ[14] पटलं छदिः ।
[15]गोपानसी तु वलभी छादने वक्रदारुणि ॥ १५ ॥

---

१ राजमहलके २ नाम । २ राजाके लिए तम्बूके खेमेके २ नाम ३ राजगृहोंके ३ भेद । ४ रनिवासके ४ नाम । ५ अटारीके २ नाम । ६ घरके बाहरी चबूतरेके ३ नाम । ७ ड्योढ़ीके २ नाम । ८ आँगनके ३ नाम । ९ दरवाजेके निचले चौकठका १ नाम । १० ऊपरी चौकठका १ नाम । ११ गुप्तद्वारके २ नाम । १२ पखवाड़ीके २ नाम । १३ छाजनके सामानके २ नाम । १४ छप्परके २ नाम । १५ छज्जाके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम् ।
स्त्री[2] द्वार्द्वारं प्रतीहारः स्याद्वितर्दिस्तु[3] वेदिका ॥ १६ ॥
[4]तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं[5] तु गोपुरम् ।
कूटं[6] पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु ॥ १७ ॥
[7]कपाटमररं तुल्ये तद्विष्कम्भोऽर्गलं न ना ।
[9]आरोहणं स्यात्सोपानं[10] निश्रेणिस्त्वधिरोहिणी ॥ १८ ॥
[11]सम्मार्जनी शोधनी [12]स्यात्सङ्करोऽवकरस्तथा ।
क्षिप्ते मुखं[13] निःसरणं [14]सन्निवेशो निकर्षणः ॥ १९ ॥
[15]समौ सम्वसथग्रामौ [16]वेश्मभूर्वास्तुरस्त्रियाम् ।

---

१ कबूतरके दरबाके २ नाम । २ दरवाजेके ३ नाम । ३ वेदीके ३ नाम । ४ बाहरी फाटकके २ नाम । ५ पुरद्वारके २ नाम । ६ पुरद्वारकी बनी सीढ़ीका १ नाम । ७ केवाड़के २ नाम । ८ बेंवड़ाका १ नाम । ९ सीढ़ीके २ नाम । १० काठकी सीढ़ीके २ नाम । ११ झाड़ूके २ नाम । १२ कूड़ेके २ नाम । १३ बाहर निकलनेके द्वारके २ नाम । १४ अच्छे वासस्थानके २ नाम । १५ गाँवके २ नाम । १६ घर बनाने योग्य भूमिके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ग्रामान्तउपशल्यं स्यात्सीमसीमे[2] स्त्रियामुभे ॥ २० ॥
घोष[3] आभीरपल्ली [4]स्यात्पक्वणः शबरालयः ।

इति पुरवर्गः ।

—:०❀०:—

३ अथ शैलवर्गः ।

[5]महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाचलशैलाशिलोच्चयाः ॥ १ ॥
लोक[6]ालोकश्चक्रवालस्त्रिकूटस्त्रिककुत्समौ ।
[8]अस्तस्तु चरमक्ष्माभृदुदयः पूर्वपर्वतः ॥ २ ॥
[10]हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रकः ।
गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥
[11]पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।

---

१ गाँवके पासकी भूमिके २ नाम । २ सीमाके २ नाम । ३ अहिरानाके २ नाम । ४ भीलोंके गाँवोंके २ नाम । ५ पहाड़के १३ नाम । ६ पृथ्वीको घेरे हुए पर्वतके २ नाम । ७ त्रिकूट पर्वतके २ नाम । ८ अस्ताचलके २ नाम । ९ उदयाचलके २ नाम । १० सात पर्वतविशेष । ११ पत्थरके ७ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]कूटोऽस्त्री शिखरं शृङ्गं [2]प्रपातस्त्वतटो भृगुः ॥ ४ ॥
[3]कटकोऽस्त्री नितम्बोऽद्रेः स्नुः[4] प्रस्थः सानुरस्त्रियाम् ।
[5]उत्सः प्रस्रवणं [6]वारिप्रवाहो निर्झरो झरः ॥ ५ ॥
[7]दरी तु कन्दरो वा स्त्री [8]देवखातबिले गुहा ।
गह्वरं [9]गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥
दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः ।
[10]खनिः स्त्रियामाकरः स्यात्पादाः [11]प्रत्यन्तपर्वताः ॥७॥
[12] उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका[13] ।
[14]धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ॥ ८ ॥
[15]निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ।

इति शैलवर्गः

---

१ चोटीके ३ नाम । २ झरनेके ३ नाम । ३ पर्वतके मध्य भागका १ नाम । ४ पहाड़की समतल भूमिके ३ नाम । ५ पर्वतपर जल एकत्रित होनेवाले स्थानके २ नाम । ६ उक्त स्थानसे जलप्रवाहके २ नाम । ७ बनायी गयी गुफाके २ नाम । ८ स्वाभाविक गुफाके २ नाम । ९ पहाड़से गिरी हुई चट्टानका १ नाम । १० खानके २ नाम । ११ छोटी पहाड़ियोंके २ नाम । १२ पहाड़की तलैटीका १ नाम । १३ पहाड़के ऊपरकी जमीनका १ नाम । १४ पर्वतजनित वस्तुओंका १ नाम । १५ लतावेष्टित कुंजके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

४ अथ वनौषधिवर्गः ।

[१]अटव्यरण्यं विपिनं गहनं काननं वनम् ।
[२]गृहारण्यमरण्यानी गृहारामास्तु निष्कुटाः ॥ १ ॥
[४]आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
[५]अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥
पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
[७]स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥ ३ ॥
वीथ्र्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राजयः ।
[१०]वन्या वनसमूहे स्यादङ्कुरोऽभिनवोद्भिदि[११] ॥ ४ ॥
[१२]वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः शालः पलाशी द्रुद्रुमाऽगमाः ॥ ५ ॥

---

१ वनके ६ नाम । २ बीहड़ वनके २ नाम । ३ घरके समीपकी फुलवाड़ीके २ नाम । ४ बनावटी वनके २ नाम । ५ राजमंत्री या वेश्याके बागका १ नाम । ६ सर्वसाधारणके लिए खुले राजबागके २ नाम । ७ रनिवासके बागका १ नाम । ८ पंक्तिके ५ नाम । ६ रेखाके २ नाम । १० वनसमूहका १ नाम । ११ अँखुवाका १ नाम । १२ वृक्षोंके १३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

[1]वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः[2] ।
[3]ओषध्यः फलपाकान्ताः स्युरवन्ध्यः[4] फलेग्रहिः ॥६॥
[5]वन्ध्योऽफलोऽवकेशी च [6]फलवान्फलिनः फली ।
[7]प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥
फुल्लश्चैते विकसिते स्युरवन्ध्यादयस्त्रिषु ।
[8]स्थाणुर्वा ना ध्रुवः शङ्कु[9]र्ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥
[10]अप्रकाण्डे स्तम्बगुल्मौ [11]वल्ली तु व्रततिर्लता ।
[12]लता प्रतानिनी वीरुद् गुल्मिन्युलप इत्यपि ॥ ९ ॥
[13]नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।
[14]अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥१०॥

---

१ फूलकर फलनेवाले पेड़ोंका १ नाम । २ बिना फूले फलनेवाले पेड़ोंका १ नाम । ३ धान जौ आदिके पौधोंका १ नाम । ४ समयपर फलनेवाले पेड़ोंके २ नाम । ५ ऋतुमें भी न फलनेवाले पेड़ोंके ३ नाम । ६ फलयुक्त वृक्षके ३ नाम । ७ फूले हुए पेड़ोंके ८ नाम । ८ शाखा-पत्र-रहित वृक्षके ३ नाम । ९ छोटी शाखा और छोटी जड़वाले वृक्षका १ नाम । १० बिना तनावाले पौधेके २ नाम । ११ लताके ३ नाम । १२ शाखा आदिसे फैली लताके ३ नाम । १३ ऊँचाईके ३ नाम । १४ पेड़के तनेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]समे शाखालते [2]स्कन्धशाखाशाले शिफाजटे[3] ।
[4]शाखाशिफाऽवरोहः स्यान्[5]मूलाच्चाग्रं गता लता ॥११॥
[6]शिरोऽग्रं शिखरं वा ना [7]मूलं बुध्नोऽङ्घ्रिनामकः ।
[8]सारो मज्जा नरि [9]त्वक्स्त्री वल्कं वल्कलमस्त्रियाम् ॥१२॥
[10]काष्ठं [11]दार्विन्धनं त्वेध [12]इध्ममेधः समित्स्त्रियाम् ।
[13]निष्कुहः कोटरं वा ना [14]वल्लरिर्मञ्जरिः स्त्रियौ ॥१३॥
[15]पत्रं पलाशं छदनं दलं पर्णं छदः पुमान् ।
[16]पल्लवोऽस्त्री किसलयं विस्तारो [17]विटपोऽस्त्रियाम् ॥१४॥
[18]वृक्षादीनां फलं सस्यं वृन्तं[19] प्रसवबन्धनम् ।

---

१ डालके २ नाम । २ बड़ी डालके २ नाम । ३ जड़के २ नाम । ४ डालकी जड़का १ नाम । ५ पेड़की जड़से लगी हुई लताका १ नाम । ६ वृक्षके ऊपरी शिखरके ३ नाम । ७ केवल पेड़की जड़के ३ नाम ८ गोंदके २ नाम । ९ छालके ३ नाम । १० काष्ठके २ नाम । ११ ईंधनके ३ नाम । १२ समिधाके २ नाम । १३ वृक्षकी बिलके २ नाम । १४ बौरके २ नाम । १५ पत्तोंके ६ नाम । १६ नये पत्तोंके २ नाम । १७ डालकी फैलावके २ नाम । १८ फलके २ नाम । १९ फूलकी जड़के २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[1]आमे फले शलाटुः स्याच्छुष्के [2]वानमुभे त्रिषु ॥ १५ ॥
[3]क्षारको जालकं क्लीबे [4]कलिका कोरकः पुमान् ।
[5]स्याद्गुच्छकस्तु स्तबकः [6]कुड्मलो मुकुलोऽस्त्रियाम् ॥ १६ ॥
[7]स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ।
[8]मकरन्दः पुष्परसः [9]परागः सुमनोरजः ॥ १७ ॥
द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम् ।
[10]आश्वत्थवैणवप्लाक्षनैयग्रोधैङ्गुदं फले ॥ १८ ॥
बार्हतं च [11]फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।
पुष्पे जातिप्रभृतयः स्वलिङ्गा व्रीहयः फले ॥ १९ ॥
विदार्याद्यास्तु मूलेऽपि पुष्पं क्लीबेऽपि पाटला ।
[12]बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः ॥ २० ॥
अश्वत्थेऽथ [13]कपित्थे स्युर्दधित्थग्राहिमन्मथाः ।
तस्मिन्दधिफलः पुष्पफलदन्तशठावपि ॥ २१ ॥

---

१ कच्चे फलका १ नाम । २ सूखे फलका १ नाम । ३ नयी कलीके २ नाम । ४ अनखिली कलीके २ नाम । ५ फूलके गुच्छेके २ नाम । ६ अधखिली कलीके २ नाम । ७ फूलके ५ नाम । ८ पुष्परसके २ नाम । ९ पुष्परजके २ नाम । १० पीपल आदिके फलोंके १-१ नाम । ११ जामुनके ३ नाम । १२ पीपलके ५ नाम । १३ कैथेके ७ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।
[2]कोविदारे चमरिकः कुद्दालो युगपत्रकः ॥ २२ ॥
[3]सप्तपर्णो विशालत्वक्शारदो विषमच्छदः ।
[4]आरग्वधे राजवृक्षशम्याकचतुरङ्गुलाः ॥ २३ ॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ।
[5]स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥ २४ ॥
[6]वरुणो वरणः सेतुस्तिक्तशाखः कुमारकः ।
[7]पुंनागे पुरुषस्तुङ्गः केसरो देववल्लभः ॥ २५ ॥
[8]पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।
[9]तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥
वञ्जुलश्चित्रकृच्चाथ [10]द्वौ पीतनकपीतनौ ।
आम्रातके [11]मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥
वानप्रस्थमधुष्ठीलौ [12]जलजेऽत्र मधूलकः ।

---

१ गूलरके ४ नाम। २ कचनारके ४ नाम। ३ छतिवनके ४ नाम। ४ अमलतासके ८ नाम। ५ जँभीरी नीबूके ५ नाम। ६ बरनाके ५ नाम। ७ नागकेसरके ५ नाम। ८ फरहदके ४ नाम। ९ तिनसुनाके ७ नाम। १० आमड़ाके ३ नाम। ११ महुआके ५ नाम। १२ जलमहुआका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पीलौ[1] गुडफलः स्रंसी त[2]स्मिंस्तु गिरिसम्भवे ॥२८॥
अक्षोटकन्दरालौ द्वाव[3]ङ्कोटे तु निकोचकः ।
प[4]लाशे किंशुकः पर्णो वातपोथोऽथ[5] वेतसे ॥ २९ ॥
रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।
द्वौ[6] परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥
शोभा[7]ञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः ।
र[8]क्तोऽसौ मधुशिग्रुः स्याद[9]रिष्टः फेनिलः समौ ॥ ३१ ॥
[10]बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।
प्लक्षो[11] जटी पर्कटी स्यान्न्यग्रोधो[12] बहुपाद्वटः ॥ ३२ ॥
गालवः[13] शाबरो लोध्रस्तिरोटस्तिल्वमार्जनौ ।
आम्रश्चूतो[14] रसालोऽसौ [15]सहकारोऽतिसौरभः ॥ ३३ ॥
कुम्भोलूखलकं[16] क्लीबे कौशिको गुग्गुलुः पुरः ।

---

१ पीलुके ३ नाम । २ अखरोटके २ नाम । ३ ढेराके २ नाम । ४ ढाकके ४ नाम । ५ बेंतके ७ नाम । ६ जलबेंतके ४ नाम । ७ श्वेत सहिंजनके ५ नाम । ८ लाल सहिंजनका १ नाम । ९ रीठाके २ नाम । १० बेलके ५ नाम । ११ पाकड़के ३ नाम । १२ बरगदके ३ नाम । १३ लोध्रवृक्षके ६ नाम । १४ आमके ३ नाम । १५ बहुत सुगन्धित आमका १ नाम । १६ गूगुलके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शेलुः[1] श्लेष्मातकः शीत उद्दालो बहुवारकः ॥ ३४ ॥
राजादनं[2] प्रियालः स्यात्सन्नकद्रुर्धनुःपटः ।
गम्भारी[3] सर्वतोभद्रा काश्मरी मधुपर्णिका ॥ ३५ ॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चाप्यथ द्वयोः ।
कर्कन्धूर्बदरी[4] कोलिः [5]कोलं कुवलफेनिले ॥ ३६ ॥
सौवीरं बदरं घोण्टाऽप्यथ[6] स्यात्स्वादुकण्टकः ।
विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥
ऐरावतो[7] नागरङ्गो नादेयी भूमिजम्बुका ।
तिन्दुकः[8] स्फूर्जकः कालस्कन्धश्च शितिसारके ॥ ३८ ॥
काकेन्दुः[9] कुलकः काकतिन्दुकः काकपीलुके ।
गोलीढो[10] झाटलो घण्टापाटलिर्मोक्षमुष्कको ॥ ३९ ॥
[11]तिलकः क्षुरकः श्रीमान्समौ[12] पिचुलझावुकौ ।
श्रीपर्णिका[13] कुमुदिका कुम्भो कैडर्यकट्फलौ ॥ ४० ॥

---

१ लिसोढ़ेके ५ नाम । २ चिरौंजीके ४ नाम । ३ खम्भारीके ७ नाम । ४ छोटी बेरके ३ नाम । ५ बड़ी बेरके ६ नाम । ६ कंटाईके ५ नाम । ७ नारंगीके ४ नाम । ८ तेन्दुके ४ नाम । ९ काकतेन्दुके ४ नाम । १० मोरवाके ५ नाम । ११ तिलकके ३ नाम । १२ झाऊके २ नाम । १३ कायफरके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रमुकः[1] पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ।
तूदस्तु[2] यूपः क्रमुको ब्रह्मण्यो ब्रह्मदारु च ॥ ४१ ॥
तूलं च नीप[3]प्रियककदम्बास्तु हलिप्रियः ।
वीरवृ[4]क्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ॥ ४२ ॥
गर्द[5]भाण्डे कन्दरालकपीतनसुपार्श्वकाः ।
प्लक्षश्च [6]तिन्तिडी चिञ्चाम्लिका[7]ऽथो पीतसारके ॥४३॥
सर्जकाशनबन्धूकपुष्पप्रियकजीवकाः ।
सा[8]ले तु सर्जकार्श्याश्वकर्णकाः सस्यसम्बरः ॥ ४४ ॥
न[9]दीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।
[10]राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः ॥४५॥
[11]इंगुदीतापसतरुर्भूर्जे [12]चर्मिमृदुत्वचौ ।
[13]पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥४६॥

---

१ पठानी लोधके ४ नाम । २ शहतूतके ६ नाम । ३ कदमके ४ नाम । ४ भेलावाके ४ नाम । ५ गजदण्डके ५ नाम । ६ इमलीके ३ नाम । ७ विजयसारके ६ नाम । ८ साखूके ५ नाम । ९ अर्जुनवृक्षके ५ नाम । १० खिन्नीके ३ नाम । ११ हिंगोटके २ नाम। १२ भोजपत्रवृक्षके ३ नाम। १३ सेमरके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पिच्छा[1] तु शाल्मलीवेष्टे रोचनः[2] कूटशाल्मलिः ।
चिरिबिल्वो[3] नक्तमालः करजश्च करञ्जके ॥४७॥
प्रकीर्यः[4] पूतिकरजः पूतिकः कलिमारकः ।
करञ्जभेदाः[5] षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥४८॥
रोही[6] रोहितकः प्लीहाशत्रुर्दाडिमपुष्पकः ।
गायत्री[7] बालतनयः खदिरो दन्तधावनः ॥४९॥
अरिमेदो[8] विट्खदिरे कदरः[9] खदिरे सिते ।
सोमवल्कोऽप्यथ [10]व्याघ्रपुच्छगन्धर्वहस्तकौ ॥५०॥
एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः ।
चञ्चुः पञ्चांगुलो मण्डवर्धमानव्यडम्बकाः ॥५१॥
[11]अल्पा शमी शमीरः [12]स्याच्छमी सक्तुफला शिवा ।
[13]पिण्डीतको मरुबकः श्वसनः करहाटकः ॥५२॥

---

१ सेमरकी गोंदके २ नाम । २ काले सेमरके २ नाम । ३ कंजेके ४ नाम । ४ कँटीले कंजेके ४ नाम । ५ कंजेके ३ भेद । ६ रोहेडेके ४ नाम । ७ खैरके ४ नाम । ८ दुर्गन्धित खैरके २ नाम । ९ सफेद खैरके २ नाम । १० रेंडके ११ नाम । ११ छोटे छोकरका १ नाम । १२ शमीके ३ नाम । १३ मैनफलके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शल्यश्च[1] मदने शक्रपादपः पारिभद्रकः ।
भद्रदारु द्रुकिलिमं पीतदारु च दारु च ॥५३॥
पूतिकाष्ठं च सप्त स्युर्देवदारुण्यथ द्वयोः ।
पाटलिः पाटला मोघा काचस्थाली फलेरुहा ॥५४॥
कृष्णवृन्ता कुवेराक्षी श्यामा तु महिलाह्वया ।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥५५॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सा ।
मण्डूकपर्णपत्रोर्णनटकट्वङ्गटुण्टुकाः ॥५६॥
स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः ।
शोणकश्चारला तिष्यफला त्वामलकी त्रिषु ॥५७॥
अमृता च वयस्था च त्रिलिङ्गस्तु बिभीतकः ।
नाक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः ॥५८॥
अभया त्वव्यथा पथ्या कायस्था पूतनामृता ।
हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥५९॥
पीतद्रुः सरलः पूतिकाष्ठं चाथ द्रुमोत्पलः ।

---

१ देवदारुके ८ नाम । २ पादरके ७ नाम । ३ मेंहदीके १२ नाम । ४ सोनापाठा (टेंटू) के १२ नाम । ५ आँवलाके ४ नाम । ६ बहेडेके ६ नाम । ७ हर्रेके ११ नाम । ८ चीड़-वृक्षके ३ नाम । ९ कर्णिकारके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्णिकारः परिव्याधो लकुचो लिकुचो डहुः ॥६०॥
पनसः कण्टकिफलो निचुलो हिज्जलोऽम्बुजः ।
काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ॥६१॥
अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः ।
पिचुमन्दश्च निम्बेऽथ पिच्छिलागुरुशिंशपाः ॥६२॥
कपिला भस्मगर्भा सा शिरीषस्तु कपीतनः ।
भण्डिलोऽप्यथ चाम्पेयश्चम्पको हेमपुष्पकः ॥६३॥
एतस्य कलिका गन्धफली [११]स्यादथ केसरे ।
वकुलो [१२]वञ्जुलोऽशोके समौ [१३]करकदाडिमौ ॥६४॥
[१४]चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः ।
[१५]जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥६५॥

---

१ बड़हरके ३ नाम। २ कटहरके २ नाम। ३ समुद्र-शोषके २ नाम। ४ कठूमरके ४ नाम। ५ नीमके ६ नाम। ६ काले शीशमके ३ नाम। ७ भूरे शीशमका १ नाम। ८ सिरसके ३ नाम। ९ चम्पाके ३ नाम। १० चम्पाकी कलीका १ नाम। ११ मौलसिरीके २ नाम। १२ अशोकके २ नाम। १३ अनारके २ नाम। १४ नागकेसरके ४ नाम। १५ अरणीके १० नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

श्रीपर्णमग्निमन्थः स्यात्कणिका गणिकारिका ।
जयोऽथ [1]कुटजः शक्रो वत्सको गिरिमल्लिका ॥६६॥
एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले ।
[3]कृष्णपाकफलाविग्निसुषेणाः करमर्दके ॥६०॥
[4]कालस्कन्धस्तमालः स्यात्तापिच्छोऽप्यथ सिन्दुके ।
सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ॥६८॥
[6]वेणी गरा गरी देवताडो जीमूत इत्यपि ।
[7]श्रीहस्तिनी तु भूरुण्डी तृणशून्या तु मल्लिका ॥६९॥
भूतदी शीतभीरुश्च सैवास्फोटा वनोद्भवा ।
शेफालिका[10] तु सुवहा निर्गुण्डी नीलिका च सा ॥७०॥
[11]सितासौ श्वेतसुरसा भूतवेश्यथ [12]मागधी ।
गणिका यूथिकाम्बष्ठा [13]सा पीता हेमपुष्पिका ॥७१॥

---

१ कोरैयाके ४ नाम । २ इन्द्रजौके ३ नाम । ३ करौंदाके ४ नाम । ४ तमालवृक्षके ३ नाम । ५ सम्हालूके ५ नाम । ६ घघरबेलके ५ नाम । ७ हाथीशुण्डाके २ नाम । ८ मोतियाके ४ नाम । ९ नेवाड़ीका १ नाम । १० काले फलवाले सम्हालूके ४ नाम । ११ सफेद फूलवाले सम्हालूके २ नाम । १२ जूहीके नाम । १३ पीली जुहीका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[१]अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।
[२]सुमना मालती जातिः [३]सप्तला नवमालिका ॥७२॥
[४]माध्यं कुन्दं [५]रक्तकस्तु बन्धूको बन्धुजीवकः ।
[६]सहा कुमारी तरणि[७]रम्लानस्तु महासहा ॥७३॥
तत्र शोणे [८]कुरबकस्तत्र पीते [९]कुरण्टकः ।
[१०]नीली झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा ॥७४॥
[११]सैरेयकस्तु झिण्टी [१२]स्यात्तस्मिन्कुरबकोऽरुणे ।
[१३]पीता कुरण्टको झिण्टी तस्मिन्सहचरी द्वयोः ॥७५॥
ओण्ड्रपुष्पं जपापुष्पं [१४]वज्रपुष्पं तिलस्य यत् ।
[१५]प्रतिहासशतप्रासचण्डातहयमारकाः ॥७६॥

---

१ माधवीलताके ५ नाम । २ मालतीके ३ नाम । ३ मोगराके २ नाम । ४ कुन्दके २ नाम । ५ गुलदुपहरियाके ३ नाम । ६ घीकुवारके ३ नाम । ७ कटसरैयाके २ नाम । ८ लाल फलवाली कटसरैयाका १ नाम । ९ पीले फूलको कटसरैयाका १ नाम । १० नीले कटसरैयाके ३ नाम । ११ सफेद फूलवालीके २ नाम । १२ गुलाबी फूलवालीका १ नाम । १३ पीले फूलवालीके २ नाम । १४ अड़ौलके २ नाम । तिलके फूलका १ नाम । १५ कनैलके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitization by eGangotri

करवीरे[१] करीरे तु क्रकरग्रन्थिलावुभौ ।
उन्मत्तः[२] कितवो धूर्तो धत्तूरः कनकाह्वयः ॥७७॥
मातुलो मदनश्चास्य फले[३] मातुलपुत्रकः ।
फलपूरो[४] बीजपूरो रुचको मातुलुङ्गके ॥७८॥
समीरणो[५] मरुवकः प्रस्थपुष्पः फणिज्जकः ।
जम्बीरोऽप्यथ[६] पर्णासे कठिञ्जरकुठेरकौ ॥७९॥
[७]सितेऽर्जकोऽत्र पाठी[८] तु चित्रको वह्निसंज्ञकः ।
अर्काह्व[९]वसुकास्फोटगणरूपविकीरणाः ॥८०॥
मन्दारश्चार्कपर्णोऽत्र [१०]शुक्लेऽलर्कप्रतापसौ ।
[११]शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥८१॥
वन्दा[१२] वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ।
वत्सादनी[१३] छिन्नरुहा गुडूची तान्त्रिकामृता ॥ ८२ ॥

---

१ करीलके ३ नाम । २ धतूरके ७ नाम । ३ धतूरके फलका १ नाम । ४ बिजौरा नीबूके ४ नाम । ५ मरुवकके ५ नाम । ६ छोटे वनतुलसीके ३ नाम । ७ सफेद वनतुलसी-का १ नाम । ८ चीता वृक्षके ३ नाम । ९ मन्दारके ७ नाम । १० श्वेत मन्दारके २ नाम । ११ वृहत् मौलसिरीके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।
मूर्वा देवी मधुरसा मोरटा तेजनी स्रुवा ॥ ८३ ॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।
पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥ ८४ ॥

एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।
कटुः कटम्भराशोकरोहिणी कटुरोहिणी ॥ ८५ ॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।
आत्मगुप्ताजहाव्यण्डा कण्डुरा प्रावृषायणी ॥ ८६ ॥
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छुश्च मर्कटी ।
चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ॥ ८७ ॥

प्रत्यक्श्रेणी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ।
अपामार्गः शैखरिको धामार्गवमयूरकौ ॥ ८८ ॥
प्रत्यक्पर्णी केशपर्णी किणिही खरमञ्जरी ।
हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥ ८९ ॥

---

१ मुरहरीके १० नाम। २ पाढ़के १० नाम। ३ कुटकीके ८ नाम। ४ केवांचके ९ नाम। ५ मूसाकानीके १० नाम। ६ चिन्चिषाके ८ नाम। ७ भैंगरैयाके ६ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

अङ्गारवल्ली वालेयशाकबर्बरवर्धकाः ।
[1]मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ॥ ९० ॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।
[2]यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥ ९१ ॥
रोदनी कच्छुरानन्ता समुद्रान्ता दुरालभा ।
[3]पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिवल्लिका ॥ ९२ ॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ।
[4]निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका ॥ ९३ ॥
प्रचोदनी कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।
नीली[5] काली क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ९४ ॥
रञ्जनी श्रीफली तुत्था द्रोणी दोला च नीलिनी ।
[6]अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका ॥ ९५ ॥
कालमेषी कृष्णफला वाकुची पूतिफल्यपि ।
[7]कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥ ९६ ॥

---

१ मंजीठके ६ नाम । २ जवासा और धमासाके १० नाम । ३ पिठवनके ९ नाम । ४ भटकटैयाके १० नाम । ५ नीलवृक्षके ११ नाम । ६ बाकुचीके ८ नाम । ७ पिप्पलीके १० नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

ऊषणा पिप्पली शौण्डी कोलाऽथ करिपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वशिरः पुमान् ॥ ९७ ॥
चव्यं तु चविका काकचिञ्चा गुञ्जा तु कृष्णला ।
पलङ्कषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥ ९८ ॥
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।
विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥ ९९ ॥
शृङ्गी महौषधं चाथ क्षीरावी दुग्धिका समे ।
शतमूली बहुसुताऽभीरुरिन्दीवरी वरी ॥१००॥
ऋष्यप्रोक्ताभीरुपत्रीनारायण्यः शतावरी ॥
अहेरुरथ पीतद्रुकालीयकहरिद्रवः ॥ १०१ ॥
दार्वी पचम्पचा दारुहरिद्रा पर्जनीत्यपि ।
वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥१०२॥
शुक्ला हैमवती वैद्यमातृसिंह्यौ तु वाशिका ।

---

१ गजपिप्पलीके ५ नाम । २ चव्यके २ नाम । ३ घुंघचीके ३ नाम । ४ गोखरूके ७ नाम । ५ अतीसके ८ नाम । ६ दुद्धीके २ नाम । ७ शतावरके १० नाम । ८ दारुहल्दीके ७ नाम । ९ वचके ५ नाम । १० सफेद वचका १ नाम । ११ अडूसाके ८ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

वृषोऽटरूषः सिंहास्यो वासको वाजिदन्तकः ॥१०३॥
[१]आस्फोटा गिरिकर्णी स्याद्विष्णुक्रान्ताऽपराजिता ।
[२]इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुराः ॥१०४॥
[३]शालेयः स्याच्छीतशिवश्छत्रा मधुरिका मिसिः ।
मिश्रेयाप्यथ [४]सीहुण्डो वज्रः स्नुक्स्त्री स्नुही गुडा ॥१०५॥
समन्तदुग्धाथो [५]वेल्लममोघा चित्रतण्डुला ।
तण्डुलश्च कृमिघ्नश्च विडङ्गं पुन्नपुंसकम् ॥१०६॥
[६]बला वाट्यालका [७]घण्टारवा तु शणपुष्पिका ।
[८]मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥१०७॥
[९]सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ।
त्रिभण्डी रोचनी [१०]श्यामापालिन्द्यौ तु सुषेणिका ॥१०८॥
काला मसूरविदलार्धचन्द्रा कालमेषिका ।
[११]मधुकं क्लीतकं यष्टिमधुकं मधुयष्टिका ॥१०९॥

---

१ कोयलके ४ नाम । २ तालमखानाके ५ नाम । ३ सौंफके ६ नाम । ४ सेंहुड़के ६ नाम । ५ वायविडंगके ६ नाम । ६ बरियाराके २ नाम । ७ सनईके २ नाम । ८ अंगूरके ५ नाम । ९ निसोथके ७ नाम । १० काली निसोथके ७ नाम । ११ मुलेठीके ४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्ट्री तु या सिता ।
अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका ॥११०॥
लाङ्गली[3] शारदी तोयपिप्पली शकुलादनी ।
[4]खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः ॥१११॥
[5]गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ।
[6]योग्यमृद्धिः सिद्धिलक्ष्म्यौ [7]वृद्धेरप्याह्वया इमे ॥११२॥
[8]कदली वारणबुसा रम्भा मोचांशुमत्फला ।
काष्ठीला [9]मुद्गपर्णी तु काकमुद्गा सहेत्यपि ॥११३॥
वार्ताकी [10]हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षिणी ।
[11]नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ॥११४॥
नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ।
[12]विदारिगन्धांऽशुमती सालपर्णी स्थिरा ध्रुवा ॥११५॥
[13]तुण्डिकेरी समुद्रान्ता कार्पासी बदरेति च ।

---

१ बिदारीकन्दके ४ नाम । २ दूधबिदारीके ३ नाम । ३ जलपीपरके ४ नाम । ४ अजमोदाके ५ नाम । ५ सरिवनके ५ नाम । ६ ऋद्धिकन्दके ४ नाम । ७ वृद्धिकन्दके ४ नाम । ८ केलाके ६ नाम । ९ मुगवनके ३ नाम । १० वैगनके ५ नाम । ११ रायसनके ६ नाम । १२ सालपर्णीके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]भारद्वाजी तु सा वन्या [2]शृंगी तु ऋषभो वृषः ॥११६॥
गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुका।
[3]धामार्गवो घोषकः [4]स्यान्महाजाली स पीतकः ॥११७॥
[5]ज्योत्स्नी पटोलिका जाली [6]नादेयी भूमिजम्बुका।
[7]स्याल्लाङ्गलिक्यग्निशिखा[8]काकाङ्गी काकनासिका ॥११८॥
गोधापदी[10] तु सुवहा [11]मुसली तालमूलिका।
[12]अजशृङ्गी विषाणी स्याद्[13]गोजिह्वादार्विके[14] समे ॥११९॥
ताम्बूलवल्ली[14] ताम्बूली नागवल्ल्यप्यथ द्विजा[15]।
हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥१२०॥
[16]एलावालुकमैलेयं सुगन्धि हरिवालुकम्।
वालुकं चाथ [17]पालङ्कयां मुकुन्दः कुन्दकुन्दुरू ॥१२१॥

---

१ वनकपासका १ नाम। २ ऋषभके ३ नाम। ३ गंगेरनके ४ नाम। ४ नेनुआँके २ नाम। ५ तरोईका १ नाम। ६ चिचेड़ाके ४ नाम। ७ छोटी जामुनके २ नाम। ८ कलिहारीके २ नाम। ६ कौआठोंठके २ नाम। १० हंसपदीके २ नाम। ११ मुसलीके २ नाम। १२ मेढ़ासिंगीके २ नाम। १३ गोभीके २ नाम। १४ पानके ३ नाम। १५ सम्हालूके बीजके ६ नाम। १६ एलुआके ५ नाम। १७ कुन्दरू ४ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]बालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।
[2]कालानुसार्यवृद्धाश्मपुष्यशीतशिवानि तु ॥१२२॥
शैलेयं [3]तालपर्णी तु दैत्या गन्धकुटी मुरा ।
गन्धिनी [4]गजभक्ष्या तु सुवहा सुरभी रसा ॥१२३॥
महेरुणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।
[5]अग्निज्वालासुभिक्षे तु धातकी धातुपुष्पिका ॥१२४॥
[6]पृथ्वीका चन्द्रवालैला निष्कुटिर्बहुलाऽथ सा
[7]सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः ॥१२५॥
[8]व्याधिः कुष्ठं पारिभाव्यं वाप्यं पाकलमुत्पलम् ।
[9]शङ्खिनी चोरपुष्पी स्यात्केशिन्यथ [10]वितुन्नकः ॥१२६॥
झटामलाज्झटा ताली शिवा तामलकीति च ।
प्रपौण्डरीक[11] पौण्डर्यमथ तुन्नः[12] कुबेरकः ॥१२७॥
कुणिः कच्छः कान्तलको नन्दिवृक्षोऽथ [13]राक्षसी ॥

---

१ नेत्रबालाके ५ नाम। २ भूरि छरीलाके ५ नाम। ३ मुराके ५ नाम। ४ सलईके ८ नाम। ५ धायके ४ नाम। ६ बड़ी इलायचीके ५ नाम। ७ छोटी इलायचीके ५ नाम। ८ कूठके ६ नाम। ९ चोरहुलीके ३ नाम। १० भुईंआँवराके ६ नाम। ११ पुंडरियाके २ नाम। १२ तूलके ६ नाम। १३ भंटेउरके ६ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

चण्डा धनहरी क्षेमदुष्पत्रगणहासकाः ॥१२८॥
[1]व्याडायुधं व्याघ्रनखं करजं चक्रकारकम् ॥
[2]सुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली ॥१२९॥
धमन्यंजनकेशी च [3]हनुर्हट्टविलासिनी ।
शुक्तिः शङ्खः खुरः कोलदलं नखमथा[4]ढकी ॥१३०॥
काक्षी मृत्स्ना तुवरिका मृत्तालकसुराष्ट्रजे ।
[5]कुटन्नटं दाशपुरं वानेयं परिपेलवम् ॥१३१॥
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ।
[6]ग्रन्थिपर्णं शुकं बर्हं पुष्पं स्थौणेयकुक्कुरे ॥१३२॥
[7]मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥१३३॥
[8]तपस्विनी जटामांसी जटिला लोमशा मिसी ।
[9]त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ॥१३४॥
[10]कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ।

---

१ बघनखाके ४ नाम । २ नलीके ७ नाम । ३ नखी-नामक गन्धद्रव्यके ७ नाम । ४ अरहरके ६ नाम । ५ केवटी-मोथाके ८ नाम । ६ गठिवनके ५ नाम । ७ असवरगके १० नाम । ८ जटामासीके ५ नाम । ९ दालचीनीके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1] ओषध्यो जातिमात्रे [2] स्युरजातौ सर्वमौषधम् ॥१३५॥
[3] शाकाख्यं पत्रपुष्पादि [4] तण्डुलीयोऽल्पमारिषः ।
[5] विशल्याग्निशिखानन्ता फलिनी शक्रपुष्पिका ॥१३६॥
[6] स्याद्दक्षगन्धा छगलान्त्र्यावेगी वृद्धदारकः ।
[7] जुङ्गो [8] ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ॥१३७॥
[9] पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ।
हयपुच्छी तु काम्बोजा माषपर्णी महासहा ॥१३८॥
तुण्डिकेरी [10] रक्तफला बिम्बिका पीलुपर्ण्यपि ।
[11] बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिका ॥१३९॥
[12] एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ।
[13] चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ॥१४०॥

---

१ जो वृक्ष फल देकर सूख जाते हैं, उन्हें ओषधि कहते हैं। जैसे जौ-गेहूँ आदि। २ जिससे केवल रोग दूर हो, उसे औषध कहते हैं। ३ पत्र-पुष्पादिका १ नाम। ४ चौराईके २ नाम। ५ कलिहारीकन्दके ५ नाम। ६ विधाराके ५ नाम। ७ ब्राह्मीके ४ नाम। ८ सत्यानासी कटेरीके ४ नाम। ९ मषवनके ४ नाम। १० कन्दूरीके ४ नाम। ११ वनतुलसीके ५ नाम। १२ रास्नाके ४ नाम। १३ लोनियाके ५ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

स ह्रस्ववेधी चुक्रोऽम्लवेतसः शतवेध्यपि ।
[2]नमस्कारी गण्डकारी समङ्गा खदिरेत्यपि ॥१४१॥
[3]जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
[4]कूर्चशीर्षो मधुरकः शृंगह्रस्वाङ्गजीवकाः ॥१४२॥
किराततिक्तो[5] भूनिम्बोऽनार्यतिक्तोऽथ सप्तला[6] ।
विमला सातला भूरिफेना चर्मकषेत्यपि ॥१४३॥
वायसोली[7] स्वादुरसा वयस्थाथ मकूलकः[8] ।
निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥१४४॥
अजमोदा[9] तूम्रगन्धा ब्रह्मदर्भा यवानिका[10] ।
[11]मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।१४५॥
अव्यथातिचरा[12] पद्मा चारटी पद्मचारिणी ।
काम्पिल्यः[13] कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ॥१४६॥

---

१ अम्लबेतके ४ नाम । २ छुईमुईके ४ नाम । ३ जीवन्तीके ५ नाम । ४ जीवकके ५ नाम । ५ चिरायताके ३ नाम । ६ सातलाके ५ नाम । ७ काकोलीके ३ नाम । ८ छोटी दन्तीके ५ नाम । ९ अजमोदाके २ नाम । १० अजवाइनके २ नाम । ११ पोहकरमूलके ३ नाम । १२ स्थलकमलिनीके ५ नाम । १३ कबीलाके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः ।
पद्माट उरणाख्यश्च [2]पलाण्डुस्तु सुकन्दकः ॥१४७॥
[3]लतार्कदुद्रुमौ तत्र हरितेऽथ महौषधम् ।
[4]लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः ॥१४८॥
[5]पुनर्नवा तु शोथघ्नी [6]वितुन्नं सुनिषण्णकम् ।
[7]स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ॥१४९॥
[8]पारावताङ्घ्रिः कटभी पण्या ज्योतिष्मती लता ।
[9]वार्षिकं त्रायमाणा स्यात्त्रायन्ती बलभद्रिका ॥१५०॥
विष्वक्सेनप्रिया[10] गृष्टिर्वाराही बदरेत्यपि ।
मार्कवो [11]भृङ्गराजः [12]स्यात्काकमाची तु वायसी ॥१५१॥
[13]शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः ।
अवाक्पुष्पी कारवी च [14]सरणा तु प्रसारिणी ॥१५२॥

---

१ चकवनके ६ नाम। २ प्याजके २ नाम । ३ हरे रंगके प्याजके २ नाम । ४ लहसुनके ६ नाम । ५ गदहपुन्नाके २ नाम । ६ चौपतियाके २ नाम । ७ पटसनके ४ नाम । ८ मालकाँगनीके ५ नाम । ९ त्रायमनके ४ नाम । १० वाराहीकन्दके ४ नाम । ११ भँगरैयाके २ नाम । १२ मकोयके २ नाम । १३ सोवाके ७ नाम । १४ पसरनके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

तस्यां कटम्भरा राजबला भद्रबलेत्यपि ।
[1]जनी जतूका रजनी जतुकृच्चक्रवर्तिनी ॥१५३॥
संस्पर्शाथ शटी गन्धमूली षड्ग्रन्थिकेत्यपि ।
कर्चूरोऽपि पलाशोऽथ कारवेल्लः कठिल्लकः ॥१५४॥
सुषवी चाथ कुलकं पटोलस्तिक्तकः पटुः ।
कूष्माण्डकस्तु कर्कारुरुर्वारुः कर्कटी स्त्रियौ ॥१५५॥
इक्ष्वाकुः कटुतुम्बी स्यात्तुम्ब्यलाबूरुभे समे ।
चित्रा गवाक्षी गोडुम्बा [10]विशाला त्विन्द्रवारुणी ॥१५६॥
[11]अर्शोघ्नः सूरणः कन्दो [12]गण्डीरस्तु समष्ठिला ।
कलम्ब्युपोदिका[14] स्त्री तु मूलकं [16]हिलमोचिका ।१५७।

---

१ पनड़ीके ६ नाम । २ कपूरकचरीके ५ नाम । ३ करैलाके ३ नाम । ४ कडुए परवलके ४ नाम । ५ कोंहड़ाके २ नाम । ६ ककड़ीके २ नाम । ७ तितलौकीके २ नाम । ८ कदूके २ नाम । ९ गोमाककड़ीके ३ नाम । १० इन्द्रायनके २ नाम । ११ सूरनके ३ नाम । १२ कड़वे सूरनके २ नाम । १३ करेमूका १ नाम । १४ पोईका १ नाम । १५ मूलीका १ नाम । १६ हुरहुरका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वास्तुकं शाकभेदाः स्युर्दूर्वा[2] तु शतपर्विका ।
सहस्रवीर्याभार्गव्यौ रुहानन्ताऽथ [3] सा सिता ॥१५८॥
गोलोमी शतवीर्या च गण्डाली शकुलाक्षका ।
[4]कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥१५९॥
[5]स्याद्भद्रमुस्तको गुन्द्रा [6] चूडाला चक्रलोच्चटा ।
[7]वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः ॥१६०॥
शतपर्वा यवफलो वेणुमस्करतेजनाः ।
[8]वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥१६१॥
[9]ग्रन्थिर्ना पर्वपरुषी [10]गुन्द्रस्तेजनकः शरः ।
[11]नडस्तु धमनः पोटगलोऽथो [12]काशमस्त्रियाम् ॥१६२॥

---

१ बथुआका १ नाम । २ दूबके ६ नाम । ३ सफेद दूबके ४ नाम । ४ मोथाके ४ नाम । ५ भद्रमोथाके २ नाम । ६ नागरमोथाके ३ नाम । ७ बाँसके १० नाम । ८ हवासे बजनेवाले बाँसका १ नाम । ९ गाँठके २ नाम । १० सरपतके ३ नाम । ११ नरसलके ३ नाम । १२ कासके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

इक्षुगन्धा पोटगलः पुंसि भूम्नि तु [1] वल्वजाः ।
[2]रसाल इक्षुस्तद्भेदाः [3]पुण्ड्रकान्तारकादयः ॥ १६३ ॥
[4]स्याद्वीरणं वीरतरं [5]मूलेऽस्योशीरमस्त्रियाम् ।
अभयं नलदं सेव्यममृणालं जलाशयम् ॥ १६४ ॥
लामज्जकं लघुलयमवदाहेष्टकापथे ।
[6]नडादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥ १६५ ॥
अस्त्री [7]कुशं कुथो दर्भः पवित्रमथ [8]कर्त्तृणम् ।
पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ॥ १६६ ॥
[9]छत्रातिच्छत्रपालघ्नौ [10]मालातृणकभूस्तृणे ।
[11]शष्पं बालतृणं [12]घासो [13]यवसं तृणमर्जुनम् ॥१६७॥
[14]तृणानां संहतिस्तृण्या [15]नड्या तु नडसंहतिः ।

---

१ बगईका १ नाम । २ ऊँखके २ नाम । ३ पौंडाका १ और केताराका १ नाम । ४ गँधज्राके २ नाम । ५ खसके १० नाम । ६ कास आदि और तृणधान्यका १ नाम । ७ कुशके ४ नाम । ८ रोहिस तृणके ६ नाम । ९ छत्राकार तृणविशेषके २ नाम । १० भूतृणके २ नाम । ११ नयी घासके २ नाम । १२ घासके २ नाम । १३ सभी तृणोंके २ नाम । १४ तृणोंके समूहका १ नाम । १५ नरसलके ढेरका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]तृणराजाह्वयस्तालो [2]नारिकेलस्तु लाङ्गली ॥१६८॥
[3]घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु ॥
[4]फलमुद्वेगमेते च [5]हिन्तालसहितास्त्रयः ॥१६९॥
खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ॥

इति वनौषधिवर्गः ।

५ अथ सिंहादिवर्गः ।

[6]सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
(कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः ॥ १ ॥
पुण्डरीकः पञ्चनखचित्रकायमृगाद्विषः) ।
[7]शार्दूलद्वीपिनौ व्याघ्रे [8]तरक्षुस्तु मृगादनः ॥ २ ॥
[9]वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥ ३ ॥

---

१ ताड़के २ नाम । २ नारियलके २ नाम । ३ सुपारीके पेड़के ५ नाम । ४ सुपारीके फलका १ नाम । ५ तृण-वृक्षोंके आठ भेद और हिन्तालका १ नाम । ६ शेरके ६ नाम । ७ बाघके ३ नाम । ८ तेंदुआके २ नाम । ९ सुअरके १२ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

क[1]पिप्लवङ्गप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौका अथ भ[2]ल्लुके ॥ ४ ॥
ऋक्षाच्छभल्लभल्लूका गं[3]डके खड्गखड्गिनौ ।
लु[4]लायो महिषो वाहद्विषत्कासरसैरिभाः ॥ ५ ॥
स्त्रि[5]यां शिवा भूरिमायगोमायुमृगधूर्तकाः ।
शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥ ६ ॥
[6]ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् ।
त्र[7]यो गोधारगौधेरगौधेया गोधिकात्मजे ॥ ७ ॥
श्वा[8]वित्तु शल्यस्त[9]ल्लोम्नि शलली शललं शलम् ।
[10]वातप्रमीर्वातमृगः कोकस्त्वीहामृगो [11]वृकः ॥ ८ ॥
[12]मृगे कुरङ्गवातायुहरिणाजिनयोनयः ।
[13]ऐणेयमेण्याश्चर्माद्यमेणस्यैण[14]मुभे त्रिपु ॥ ९ ॥

---

१ बानरके ६ नाम । २ भालूके ४ नाम । ३ गैंडाके ३ नाम । ४ भैंसाके ५ नाम । ५ सियारके १० नाम । ६ बिलारके ५ नाम । ७ गोहके बच्चेके ३ नाम । ८ साहीके २ नाम । ९ साहीके लोमके ३ नाम । १० वायुवेगसे दौड़नेवाले मृगके २ नाम । ११ भेड़ियाके ३ नाम । १२ हरिनके ५ नाम । १३ काली हिरनीके मांस-चमड़े आदिका १ नाम । १४ काले हिरनके चमड़े-मांस आदिका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कदली कन्दली चीनश्चमूरुप्रियकावपि ।
समूरुश्चेति हरिणा अमी अजिनयोनयः ॥ १० ॥
[2]कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः ।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगाः ॥ ११ ॥
[3]गन्धर्वः शरभो रामः सृमरो गवयः शशः ।
इत्यादयो मृगेन्द्राद्या गवाद्याः पशुजातयः ॥ १२ ॥
[4]अधोगन्ता तु खनको वृकः पुंध्वज उन्दुरः ।
उन्दुरुर्मूषकोऽप्याखुर्गिरिका[5] बालमूषिका ॥ १३ ॥
[6]सरटः कृकलासः स्यान्मुसली[7] गृहगोधिका ।
लूता[8] स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः ॥ १४ ॥
नीलङ्गुस्तु[9] कृमिः [10]कर्णजलौकाः शतपद्युभे ।
[11]वृश्चिकः शूककीटः [12]स्यादलिद्रोणौ तु वृश्चिके ॥ १५ ॥
[13]पारावतः कलरवः कपोतोऽथ [14]शशादनः ।

---

१ हिरनोंके ६ भेद । २ मृगोंके १२ भेद । ३ मृगोंके ६ भेद । ४ चूहेके ८ नाम । ५ चुहियाके २ नाम । ६ गिरगिटके २ नाम । ७ छिपकलीके २ नाम । ८ मकड़ीके ४ नाम । ९ छोटे कीड़ेके २ नाम । १० कनखजूराके २ नाम । ११ रेशममें लगनेवाले कीड़ेके २ नाम । १२ बीछीके ३ नाम । १३ कबूतरके ३ नाम । १४ बाज पक्षीके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

पत्री श्येन [1]उलूकस्तु वायसारातिपेचकौ ॥ १६ ॥
दिवान्धः कौशिको घूको दिवाभीतो निशाटनः ।
[2]व्याघ्राटः स्याद्भरद्वाजः [3]खञ्जरीटस्तु खञ्जनः ॥ १७ ॥
[4]लोहपृष्ठस्तु कङ्कः स्यादथ [5]चाषः किकीदिविः ।
[6]कलिङ्गभृङ्गधूम्याटा अथ [7]स्याच्छतपत्रकः ॥१८॥
दार्वाघाटोऽथ [8]सारङ्गस्तोककश्चातकः समाः ।
[9]कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १९ ॥
[10]चटकः कलविङ्कः स्यात्तस्य स्त्री [11]चटका तयोः ।
[12]पुमपत्ये चाटकैरस्त्र्यपत्ये [13]चटकैव सा ॥२०॥
[14]कर्करेटुः करेटुः [15]स्यात्कृकणक्रकरौ समौ ।
[16]वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥२१॥

---

१ उल्लूके ८ नाम । २ भरद्वाज पक्षीके २ नाम । ३ खँड़ैचाके २ नाम । ४ सफेद चीलके २ नाम । ५ नीलकण्ठके २ नाम । ६ भुजंगाके ३ नाम । ७ कठफोरवाके २ नाम । ८ पपीहाके ३ नाम । ९ मुर्गेके ४ नाम । १० गौरैयाके २ नाम । ११ मादा गौरैयाका १ नाम । १२ नर गौरैया बच्चेका १ नाम । १३ इन दोनोंकी बच्ची-बच्चेका १ नाम । १४ कौड़िल्ला (मछली पकड़नेवाले) पक्षीके २ नाम १५ करयाके २ नाम । १६ कोयलके ४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१ काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।
ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥२२॥
स एव च चिरञ्जीवी चैकदृष्टिश्च मौकुलिः ।
२ द्रोणकाकस्तु काकोलो ३ दात्यूहः कालकण्ठकः ॥२३॥
४ आतायिचिल्लौ ५ दाक्षाय्यगृध्रौ ६ कीरशुकौ समौ ।
७ क्रुङ्क्रौञ्चोऽथ ८ बकः कह्वः ९ पुष्कराह्वस्तु सारसः ॥२४॥
१० कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामकः ।
११ कादम्बः कलहंसः १२ स्यादुत्क्रोशकुररौ समौ ॥२५॥
१३ हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ।
१४ राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ॥२६॥
१५ मलिनैर्मल्लिकाक्षास्ते धार्तराष्ट्राः सितेतरैः ।

---

१ कौएके १३ नाम । २ डोमकौएके २ नाम । ३ काले कौएके २ नाम । ४ चीलके २ नाम । ५ गिद्धके २ नाम । ६ सुग्गेके २ नाम । ७ क्रौंच (ढेंक-कराकुल) पक्षीके २ नाम । ८ बगुलेके २ नाम । ९ सारसके २ नाम । १० चकवाके ४ नाम । ११ बत्तकके २ नाम । १२ कुररपक्षीके २ नाम । १३ हंसके ४ नाम । १४ राजहंसका १ नाम । १५ हंसविशेषके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[1]शरारिराटिराडिश्च [2]बलाका बिसकण्ठिका ॥२७॥
[3]हंसस्य योषिद्वरटा [4]सारसस्य तु लक्ष्मणा ।
[5]जतुकाऽजिनपत्रा स्या[6]त्परोष्णी तैलपायिका ॥२८॥
[7]वर्वणा मक्षिका नीला [8]सरघा मधुमक्षिका ।
[9]पतङ्गिका पुत्तिका [10]स्याद्दंशस्तु वनमक्षिका ॥२९॥
[11]दंशी तज्जातिरल्पा [12]स्याद्गन्धोली वरटा द्वयोः ।
[13]भृंगारी झीरुका चीरी झिल्लिका च समा इमाः ॥३०॥
[14]समौ पतङ्गशलभौ [15]खद्योतो ज्योतिरिङ्गणः ।
[16]मधुव्रती मधुकरो मधुलिण्मधुपालिनः ॥३१॥
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ।
[17]मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ॥३२॥

---

१ तीतरके ३ नाम । २ बगुलीके २ नाम । ३ हंसकी स्त्रीका १ नाम । ४ सारसकी स्त्रीका १ नाम । ५ चमगीदड़के २ नाम । ६ चपड़ाके २ नाम । ७ मक्खीके ३ नाम । ८ शहदकी मक्खीके २ नाम । ९ छोटी मधुमक्खीके २ नाम । १० मच्छड़के २ नाम । ११ मसेका १ नाम । १२ बर्रेके २ नाम । १३ झींगुरके ४ नाम । १४ फतिंगेके २ नाम । १५ जुगनूके २ नाम । १६ भौंरेके ११ नाम । १७ मयूरके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिखावलः शिखा केकी मेघनादानुलास्यपि ।
केका वाणी मयूरस्य समौ चन्द्रकमेचकौ ॥३३॥
शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके ।
खगे विहङ्गविहगविहङ्गमविहायसः ॥३४॥
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः ।
पतत्रिपत्रिपतगपतत्पत्ररथाण्डजाः ॥३५॥
नगौकोवाजिविकिरविविष्किरपतत्रयः ।
नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः ॥३६॥
तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः ।
तित्तिरिः कुक्कुभो लावो जीवंजीवश्चकोरकः ॥३७॥
कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादयः ।
गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम् ॥३८॥
स्त्री पक्षतिः पक्षमूलं चञ्चुस्त्रोटिरुभे स्त्रियौ ।

---

१ मयूरकी बोलका १ नाम। २ मोरपंखपर बने चिह्नके २ नाम। ३ मोरकी चोटीके २ नाम। ४ मोरपंखके ३ नाम। ५ पक्षीके २७ नाम। ६ पक्षीभेदके १-१ नाम। ७ पंखके ६ नाम। ८ पंखकी जड़के २ नाम। ९ पक्षीकी चोंचके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः ॥ ३९ ॥
[2]पेशी कोशो द्विहीनेऽण्डं [3]कुलायो नीडमस्त्रियाम् ।
[4]पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ॥४०॥
[5]स्त्रीपुंसौ मिथुनं द्वन्द्वं [6]युग्मं तु युगलं युगम् ।
[7]समूहो निवहव्यूहसन्दोहविसरव्रजाः ॥४१॥
स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः ।
समुदायः समुदयः समवायश्चयो गणः ॥४२॥
स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ।
[8]वृन्दभेदाः समैर्वर्गः [9]संघसार्थौ तु जन्तुभिः ॥४३॥
[10]सजातीयैः कुलं [11]यूथं तिरश्चां पुन्नपुंसकम् ।
[12]पशूनां समजोऽन्येषां [13]समाजोऽथ [14]सधर्मिणाम् ॥४४॥

---

१ पक्षियोंकी तिरछी, ऊपर और सीधी उड़ानके १-१ नाम। २ अण्डेके ३ नाम। ३ घोंसलेके २ नाम। ४ पक्षियोंके बच्चेके ७ नाम। ५ जोड़ेके ३ नाम। ६ जुड़वाके ३ नाम। ७ समूह (ढेर) के २२ नाम। ८ सजातीय समूहका १ नाम। ९ संघके २ नाम। १० कुलका १ नाम। ११ यूथका १ नाम। १२ पशुसमूहका १ नाम। १३ समाजका १ नाम। १४ एक धर्मवालोंके समूहका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[१]स्यान्निकायः पुञ्जराशी तूत्करः कूटमस्त्रियाम् ।
[२]कापोतशौकमायूरतैत्तिरादीनि तद्गणे ॥४५॥
[३]गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ।

इति सिंहादिवर्गः

—०—

६ अथ मनुष्यवर्गः ।

[४]मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
[५]स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥
[६]स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥
विशेषा[७]स्त्वङ्गना भीरुः कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥
[८]सुन्दरी रमणी रामा कोपना सैव भामिनी ।

---

१ अनाज आदिके ऊँचे ढेरके ४ नाम । २ कबूतर आदिके गणोंके १-१ नाम । ३ पालतू पशु-पक्षी के २ नाम । ४ मनुष्यके ६ नाम । ५ पुरुषके ५ नाम । ६ स्त्रीके ११ नाम । ७ स्त्रियोंके १२ भेद । ८ गुस्सेवर औरतके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

[1]वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥
[2]कृताभिषेका महिषी [3]भोगिन्योऽन्या नृपस्त्रियः ।
[4]पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥५॥
भार्या जायाऽथ पुंभूम्नि दाराः स्यात्तु [5]कुटुम्बिनी ।
पुरन्ध्री सु[6]चरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥
[7]कृतसापत्निकाऽध्यूढाऽधिविन्नाथ [8]स्वयम्वरा ।
पतिम्वरा च वर्याऽथ [9]कुलस्त्री कुलपालिका ॥ ७ ॥
[10]कन्या कुमारी [11]गौरी तु नग्निकाऽनागतार्तवा ।
[12]स्यान्मध्यमा [13]दृष्टरजास्तरुणी युवतिः समे ॥ ८ ॥
[14]समाः [15]स्नुषाजनीवध्वश्चिरिण्टी तु सुवासिनी ।

---

१ गुणवन्ती स्त्रीके ४ नाम । २ पटरानीका १ नाम । ३ साधारण रानीका १ नाम । ४ विवाहिता स्त्रीके ७ नाम । ५ पति-पुत्रवती स्त्रीके २ नाम । ६ पतिव्रताके ४ नाम । ७ पहली स्त्रीके ३ नाम । ८ स्वेच्छासे ब्याह करनेवाली स्त्रीके ३ नाम । ९ कुलवन्ती स्त्रीके २ नाम । १० लड़कीके ९ नाम । ११ जिसके रजोधर्म न होता हो ऐसी कन्याके ३ नाम । १२ प्रथम रजस्वला कन्याके २ नाम । १३ जवान स्त्रीके २ नाम । १४ पतोहूके ३ नाम । १५ पिताके घर रहनेवाली युवती कन्याके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]इच्छावती कामुका [2]स्याद्वृषस्यन्ती तु कामुकी ॥९॥
[3]कान्तार्थिनी तु यः याति संकेतं साऽभिसारिका।
[4]पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥१०॥
स्वैरिणी पांसुला च [5]स्यादशिश्वी शिशुना विना।
[6]अवीरा निष्पतिसुता [7]विश्वस्ताविधवे समे ॥११॥
[8]आलिः सखी वयस्याऽथ [9]पतिवत्नी सभर्तृका।
[10]वृद्धा पलिक्नी [11]प्राज्ञी तु प्रज्ञा [12]प्राज्ञा तु धीमती ॥१२॥
[13]शूद्री शूद्रस्य भार्या [14]स्याच्छूद्रा तज्जातिरेव च।
[15]आभीरी तु महाशूद्री जातिपुंयोगयोः समा ॥१३॥
[16]अर्याणी स्वयमर्या [17]स्यात्क्षत्रिया क्षत्रियाण्यपि।

---

१ गहने आदि चाहनेवाली स्त्रीके २ नाम। २ मैथुनकी इच्छावाली स्त्रीके २ नाम। ३ छिपकर मैथुन करानेकी इच्छासे यारके पास जानेवाली स्त्रीका १ नाम ४ व्यभिचारिणीके ८ नाम। ५ बिना बच्चेवाली स्त्रीका १ नाम। ६ पतिपुत्रहीन स्त्रीका १ नाम। ७ विधवाके २ नाम ८ सहेलीके ३ नाम। ९ सोहागिनके २ नाम। १० बुड्ढा स्त्रीके २ नाम। ११ स्वतः विदुषी स्त्रीके २ नाम। १२ बुद्धिमतीके २ नाम। १३ शूद्राका १ नाम। १४ शूद्रा होकर भी अन्य जातिकी स्त्रीका १ नाम। १५ आभीरीके २ नाम। १६ वैश्याके २ नाम। १७ क्षत्रियाके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[१]उपाध्याय्युपाध्यायी [२]स्यादाचार्यापि च स्वतः ॥१४॥
[३]आचार्यानी तु पुंयोगे [४]स्यादर्यी क्षत्रियी तथा।
[६]उपाध्यायान्युपाध्यायी [७]पोटा स्त्रीपुंसलक्षणा ॥१५॥
[८]वीरपत्नी वीरभार्या [९]वीरमाता तु वीरसूः।
[१०]जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥१६॥
[११]स्त्री नग्निका कोटवी स्याद् [१२]दूतीसंचारिके समे।
[१३]कात्यायन्यर्धवृद्धा या काषायवसनाऽधवा ॥ १७ ॥
[१४]सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका।
[१५]असिक्नी स्यादवृद्धा या प्रेष्याऽन्तःपुरचारिणी ॥१८॥

---

१ अध्यापिकाके २ नाम। २ वेदमंत्रोंकी व्याख्या करनेवाली स्त्रीका १ नाम। ३ आचार्यकी स्त्रीका १ नाम। ४ वैश्यकी स्त्रीका १ नाम। ५ क्षत्रियकी स्त्रीका १ नाम। ६ अध्यापककी पत्नीका १ नाम। ७ मूछ-दाढ़ीवाली स्त्रीका १ नाम। ८ वीरकी स्त्रीका १ नाम। ९ वीरकी माताका १ नाम। १० प्रसूता स्त्रीके ४ नाम। ११ नंगी औरतके २ नाम। १२ प्रेमीका सन्देश प्रेमिका तक पहुँचानेवाली स्त्रीके २ नाम। १३ गेरुए कपड़े पहननेवाली विधवाका १ नाम। १४ नौकरानीका १ नाम। १५ रनिवासमें रहनेवाली जवान लौंडीका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वारस्त्री गणिका वेश्या रूपाजीवाऽथ [2]सा जनैः ।
सत्कृता वारमुख्या स्यात्[3]कुट्टनी शम्भली समे ॥१९॥
[4]विप्रश्निका त्वीक्षणिका दैवज्ञाऽथ [5]रजस्वला ।
स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि [6]स्यं द्रजः पुष्पमार्तवम् ।
[7]श्रद्धालुर्दोहदवती [8]निष्कला विगतार्तवा ॥२१॥
[9]आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ।
[10]गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥
[11]पुनर्भूर्दिधिषूरूढा द्विस्तस्या [12]दिधिषूः पतिः ।
[13]स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥ २३ ॥

---

१ वेश्याके ४ नाम । २ प्रतिष्ठित वेश्याका १ नाम । ३ कुटनीके २ नाम । ४ सगुन बतानेवाली स्त्रीके ३ नाम । ५ रजस्वलाके ८ नाम । ६ स्त्रीकी योनिसे प्रति मास निकलनेवाले रक्तके ३ नाम । ७ अभिलाषावाली गर्भिणीके २ नाम । ८ जिसका रजोधर्म बन्द होगया हो, उस स्त्रीके २ नाम । ९ गर्भिणीके ४ नाम । १० गणिका-गर्भिणी-युवतियोंके समूहका १-१ नाम । ११ दो बार ब्याहीके २ नाम । १२ उस स्त्रीके पतिका १ नाम । १३ बच्चे पैदा करके ब्याही स्त्रीके पूर्व द्विजपतिका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कानीनः कन्यकाजातः सुतोऽथ सुभगासुतः ।
सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥
पैतृष्वसेयः स्यात्पैतृष्वस्रीयश्च पितृष्वसुः ।
सुतो मातृष्वसुश्चैव वैमात्रेयो विमातृजः ॥ २५ ॥
अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः ।
कौलटेरः कौलटेयो भिक्षुकी तु सती यदि ॥२६॥
तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ।
आत्मजस्तनयः सूनुः सुतः पुत्रः [१०]स्त्रियां त्वमी ॥२७॥
आहुर्दुहितरं सर्वेऽपत्यं[११] तोकं तयोः समे ।
[१२]स्वजाते त्वौरसोरस्यो [१३]तातस्तु जनकः पिता ॥२८॥
[१४]जनयित्री प्रसूर्माता जननी [१५]भगिनी स्वसा ।

---

१ बिना ब्याही कन्याके पुत्रका १ नाम। २ सुलक्षणा स्त्रीके पुत्रके २ नाम। ३ पराई स्त्रीके पुत्रका १ नाम। ४ बुआके लड़केके २ नाम। ५ मौसीके लड़केके २ नाम। ६ सौतेली माताके पुत्रके २ नाम। ७ छिनारके पुत्रके ४ नाम। ८ पतिव्रता भिखारिनके पुत्रके २ नाम। ९ पुत्रके ५ नाम। १० पुत्रीके ६ नाम। ११ पुत्रकी पुत्रीके २ नाम। १२ सवर्णा स्त्रीके गर्भसे उत्पन्न पुत्रके २ नाम। १३ पिताके ३ नाम। १४ माताके ४ नाम। १५ बहिनके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ननान्दा तु स्वसा पत्युर्[2]नप्त्री पौत्री सुतात्मजा ॥२९॥
[3]भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।
[4]प्रजावती भ्रातृजाया [5]मातुलानी तु मातुली ॥३०॥
[6]पतिपत्न्योः प्रसूः श्वश्रूः [7]श्वशुरस्तु पिता तयोः ।
पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः ॥३१॥
[10]श्यालाः स्युर्भ्रातरः पत्न्याः [11]स्वामिनो देवृदेवरौ ।
[12]स्वस्रीयो भागिनेयः [13]स्याज्जामाता दुहितुः पतिः ॥३२॥
[14]पितामहः पितृपिता [15]तत्पिता प्रपितामहः ।
[16]मातुर्मातामहाद्येवं [17]सपिण्डास्तु सनाभयः ॥३३॥
[18]समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।

---

१ ननदका १ नाम । २ पोती या नतिनीके ३ नाम । ३ देवरानी-जेठानीका १ नाम । ४ भाभीके २ नाम । ५ मामीके २ नाम । ६ सासका १ नाम । ७ ससुरका १ नाम । ८ चाचाका १ नाम । ९ मामाका १ नाम । १० सालेका १ नाम । ११ देवरके २ नाम । १२ भांजेके २ नाम । १३ दामादका १ नाम । १४ आजाका १ नाम । १५ परदादाका १ नाम । १६ नाना और परनानाका १ नाम । १७ सपिण्डोंके २ नाम । १८ सगे भाईके ४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitized by eGangotri

[1]सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥३४॥
[2]ज्ञातेयं बन्धुता तेषां क्रमाद्भावसमूहयोः ।
[3]धवः प्रियः पतिर्भर्ता [4]जारस्तूपपतिः समौ ॥३५॥
[5]अमृते जारजः कुण्डो [6]मृते भर्तरि गोलकः ।
[7]भ्रात्रीयो भ्रातृजो [8]भ्रातृभगिन्यौ भ्रातरावुभौ ॥३६॥
[9]मातापितरौ पितरौ मातरपितरौ प्रसू जनयितारौ ।
[10]श्वश्रूश्वशुरौ श्वशुरौ [11]पुत्रौ पुत्रश्च दुहिता च ॥३७॥
[12]दम्पती जम्पती जायापती भार्यापती च तौ ।
[13]गर्भाशयो जरायुः स्यादुल्वं च [14]कललोऽस्त्रियाम् ॥३८॥
[15]सूतिमासो वैजननो [16]गर्भो भ्रूण इमौ समौ ।

---

१ सगोत्रोंके ६ नाम। २ जातीयता और बन्धुत्वके १-१ नाम। ३ पतिके ४ नाम। ४ यारके २ नाम। ५ पतिके रहते यारके वीर्यसे उत्पन्न पुत्रका १ नाम। ६ पति मर जाने पर यारसे उत्पन्न पुत्रका १ नाम। ७ भतीजेके २ नाम। ८ भाई बहनके २ नाम। ९ माता-पिताके ४ नाम। १० सास-ससुरके २ नाम। ११ बेटा बेटीका १ नाम। १२ स्त्री-पुरुषके ४ नाम। १३ गर्भको बाँधनेवाली झिल्लीके ३ नाम। १४ रजवीर्य संयोगसे प्रथम दिन ठहरे गर्भका १ नाम। १५ नवमासके २ नाम। १६ गर्भके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

तृतीया प्रकृतिः षण्ढः क्लीबः षण्डो नपुंसके ॥३९॥
[२]शिशुत्वं शैशवं बाल्यं [३]तारुण्यं यौवनं समे ।
[४]स्यात्स्थाविरं तु वृद्धत्वं वृद्धसंघेऽपि वार्धकम् ॥४०॥
[५]पलितं जरसा शौक्ल्यं केशादौ [६]विस्रसा जरा ।
[७]स्यादुत्तानशया डिम्भा स्तनपा च स्तनन्धयी ॥४१॥
[८]बालस्तु स्यान्माणवको [९]वयस्थस्तरुणो युवा ।
[१०]प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥४२॥
[११]वर्षीयान्दशमी [१२]ज्यायान्पूर्वजस्त्वग्रियोऽग्रजः ।
[१३]जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥४३॥
[१४]अमांसो दुर्बलश्छातो [१५]बलवान्मांसलोंऽसलः ।
[१६]तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः ॥४४॥

---

१ नामर्दके ५ नाम। २ लड़कपनके ३ नाम। ३ जवानी २ नाम। ४ बुढ़ापेके ३ नाम। ५ सफेद बालका १ नाम। ६ बुढ़ाईके २ नाम। ७ दुधमुंहे बच्चेके ४ नाम। ८ सोलह वर्षके बालकके २ नाम। ९ जवानके ३ नाम। १० वृद्धके ६ नाम। ११ बहुत वृद्धके ३ नाम। १२ बड़े भाईके ३ नाम। १३ छोटे भाईके ५ नाम। १४ निर्बलके ३ नाम। १५ बलवानके ३ नाम। १६ तोंदवालेके ५ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अवटीटोऽवनाटश्चावभ्रटो नतनासिके ।
[2]केशवः केशिकः केशी [3]वलिनो वलिभः समौ ॥४५॥
[4]विकलाङ्गस्त्वपोगण्डः [5]खर्वो ह्रस्वश्च वामनः ॥
[6]खरणाः स्यात्खरणसो [7]विग्रस्तु गतनासिकः ॥ ४६ ॥
[8]खुरणाः स्यात्खुरणसः [9]प्रज्ञुः प्रगतजानुकः ।
[10]ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्[11]संज्ञुः सहतजानुकः ॥४७॥
[12]स्यादेडे बधिरः [13]कुब्जे गडुलः [14]कुकरे कुणिः ।
[15]पृश्निरल्पतनौ [16]श्रोणः पङ्गौ [17]मुण्डस्तु मुण्डिते ॥४८॥

---

१ नकचिपटे मनुष्यके ४ नाम । २ अच्छे बालवालेके ३ नाम । ३ बुढाईसे झुर्रीदार चमड़ेवालेके २ नाम । ४ स्वभावतः न्यूनाधिक अंगवालेके २ नाम । ५ नाटे आदमीके ३ नाम । ६ खड़ी नाकवालेके २ नाम । ७ नकटेके २ नाम । ८ पशुके खुरकी तरह फैली नाकवालेके २ नाम । ९ टेढ़े घुटनेवालेके २ नाम । १० ऊँचे घुटनेवालेके २ नाम । ११ मिली जाँघवालेके २ नाम । १२ बहरेके २ नाम । १३ कुबड़ेके २ नाम । १४ लूलेके २ नाम । १५ छोटी देहवालेके २ नाम । १६ पंगुलके २ नाम । १७ सिर घुंटे मनुष्यके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

बलिरः केकरे खोडे खञ्जस्त्रिपु जरावराः ।
जडुलः कालकः पिप्लुस्तिलकस्तिलकालकः ॥ ४९ ॥
अनामयं स्यादारोग्यं चिकित्सा रुक्प्रतिक्रिया ।
भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥५०॥
स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।
क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः ॥५१॥
स्त्री क्षुत्क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान् ।
शोफस्तु श्वयथुः शोथः पाददस्फोटो विपादिका ॥५२॥
किलाससिध्मे कच्छ्वां तु पामपामे विचर्चिका ।
कण्डूः खर्जूश्च कण्डूया विस्फोटः पिटकस्त्रिपु ॥५३॥

---

१ कंजा और ऐंचाताना के २ नाम । २ लंगड़े के २ नाम । ३ मुहासेके ३ नाम । ४ तिलके २ नाम । ५ आरोग्यके २ नाम । ६ इलाजके २ नाम । ७ दवाके ५ नाम । ८ रोगके ७ नाम । ९ क्षयरोगके ३ नाम । १० पीनस रोगके २ नाम । ११ छींकके ३ नाम । १२ खाँसीके २ नाम । १३ सूजनके २ नाम । १४ बिवाईके २ नाम । १५ सेंहुआके २ नाम । १६ खसराके ४ नाम । १७ खुजलीके ३ नाम । १८ फोड़ेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

[1]व्रणोऽस्त्रियामीर्ममरुः क्लीवे [2]नाडीव्रणः पुमान् ।
[3]कोठो [4]मण्डलकं [4]कुष्ठश्वित्रे [5]दुर्नामकार्शसी ॥५४॥
[6]आनाहस्तु निबन्धः स्याद् [7]ग्रहणी रुक्प्रवाहिका ।
[8]प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥५५॥
[9]व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः ।
श्लीपदं पादवल्मीकं केशघ्नस्त्विन्द्रलुप्तकः ॥५६॥
[10]अश्मरी मूत्रकृच्छ्रं स्यात्पूर्वे शुक्रावधेस्त्रिषु ।
[11]रोगहार्यगदङ्कारो भिषग्वैद्यौ चिकित्सके ॥५७॥
[12]वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ।
[13]ग्लानग्लास्नू [14]आमयावी विकृतो व्याधितोऽपटुः ॥५८॥
आतुरोऽभ्यमितोऽभ्यान्तः [15]समौ पामनकच्छुरौ ।

---

१ घावके ३ नाम । २ नासूरका १ नाम । ३ शरीरमें चकत्तेवाले कुष्ठके ३ नाम । ४ सफेद कोढ़के २ नाम । ५ बवासीरके २ नाम । ६ कब्जके २ नाम । ७ संग्रहणीके २ नाम । ८ वमनके ३ नाम । ९ विद्रधि-ज्वर और भगन्दरके १-१ नाम । १० पथरीके २ नाम । ११ वैद्यके ५ नाम । १२ रोगमुक्तके ४ नाम । १३ रोगसे दुखीके २ नाम । १४ रोगीके ७ नाम । १५ खसरा रोगीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[१]दद्रुणो दद्रुरोगी स्याद[२]र्शोरोगयुतोऽर्शसः ॥५९॥
[३]वातकी वातरोगी स्या[४]त्सातिसारोऽतिसारकी ।
[५]स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेक्षिण चाप्यमी ॥६०॥
[६]उन्मत्त उन्मादवति [७]श्लेष्मलः श्लेष्मणः कफी ।
[८]न्युब्जो भुग्ने रुजा [९]वृद्धनाभौ तुन्दिलतुन्दिभौ ॥६१॥
[१०]किलासी [११]सिध्मलोऽन्धोऽदृङ् [१२]मूर्च्छाले मूर्तमूर्च्छितौ ।
[१३]शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि च ॥६२॥
[१४]मायुः पित्तं [१५]कफः श्लेष्मा [१६]स्त्रियां तु त्वगसृग्धरा ।
[१७]पिशितं तरसं मांसं पललं क्रव्यमामिषम् ॥६३॥
[१८]उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम् ।

---

१ दादवाले रोगीके २ नाम । २ बवासीर रोगीके २ नाम । ३ वायुरोगीके २ नाम । ४ अतीसार रोगीके २ नाम। ५ पानी बहानेवाले रोगीके ४ नाम । ६ पागलके २ नाम । ७ कफरोगीके ३ नाम । ८ कुबड़ेका १ नाम । ९ वायुसे बढ़ी नाभिवालेके ३ नाम । १० सेंहुआँ रोगीके २ नाम । ११ अन्धेके २ नाम । १२ मूर्च्छारोगीके ३ नाम । १३ वीर्यके ६ नाम । १४ पित्तके २ नाम । १५ कफके २ नाम । १६ चमड़ीके २ नाम । १७ मांसके ६ नाम । १८ सूखे मांसके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम् ॥६४॥
बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा ।
पश्चाद्ग्रीवाशिरा मन्या नाडी तु धमनिः शिरा ॥६५॥
तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम् ।
[10]अन्त्रं पुरीतद् [11]गुल्मस्तु प्लीहा पुंस्यथ [12]वस्नसा ६६
स्नायुः स्त्रियां [13]कालखण्डयकृती तु समे इमे ।
[14]सृणिका स्यन्दिनी लाला [15]दूषिका नेत्रयोर्मलम् ६७
[16]नासामलं तु [17]सिंघाणं पिञ्जूषः कर्णयोर्मलम् ।
[18]मूत्रं प्रस्राव [19]उच्चारावस्करौ शमलं शकृत् ॥६८॥
पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ ।

---

१ रक्तके ७ नाम । २ कलेजेके २ नाम । ३ हृदयके २ नाम । ४ चर्बीके ३ नाम । ५ गलेके पीछेवाली नसका १ नाम । ६ नसके ३ नाम । ७ फुफ्फुसके २ नाम । ८ गुर्दाके २ नाम । ९ कान आदिके मैलके २ नाम । १० आँतके २ नाम । ११ तिल्लीके २ नाम । १२ नसोंके २ नाम । १३ जिगरके २ नाम । १४ लारके ३ नाम । १५ आँखके कीचड़का १ नाम । १६ नाककी मैलका १ नाम । १७ कानकी मैलका १ नाम । १८ पेशाबके २ नाम । १९ पाखानाके ९ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]स्यात्कर्परः कपालोऽस्त्री [2]कीकसं कुल्यमस्थि च ॥६९॥
[3]स्याच्छरीरास्थि कङ्कालः [4]पृष्ठास्थ्नि तु कशेरुका ।
[5]शिरोऽस्थनि करोटिः स्त्री [6]पार्श्वास्थनि तु पर्शुका ॥७०॥
[7]अङ्गं प्रतीकोऽवयवोऽपघनोऽथ [8]कलेवरम् ।
गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ॥७१॥
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।
[9]पादाग्रं प्रपदं [10]पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥७२॥
[11]तद्ग्रन्थी घुटिके गुल्फौ [12]पुमान्पार्ष्णिस्तयोरधः ।
[13]जंघा तु प्रसृता [14]जानूरुपर्वाऽष्ठीवदस्त्रियाम् ॥७३॥
[15]सक्थि क्लीबे [16]पुमानूरुस्तत्सन्धिः पुंसि वङ्क्षणः ।
[17]गुदं त्वपानं पायुर्ना [18]वस्तिर्नाभेरधो द्वयोः ॥७४॥

---

१ खोपड़ीके २ नाम । २ हड्डीके ३ नाम । ३ अस्थि-पंजरका १ नाम । ४ रीढ़का १ नाम । ५ मस्तककी हड्डीका १ नाम । ६ पसलीका १ नाम । ७ अंगके ४ नाम । ८ शरीरके १२ नाम । ९ पैरके अग्रभागके २ नाम । १० पैरके ४ नाम । ११ गट्टेके २ नाम । १२ एँड़ीका १ नाम । १३ जाँघके २ नाम । १४ घुटनेके ३ नाम । १५ घुटनेसे ऊपरी भागके २ नाम । १६ घुटनेकी संधिका १ नाम । १७ गुदाके ३ नाम । १८ मूत्राशयका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कटो ना श्रोणिफलकं [2]कटिः श्रोणिः ककुद्मती ।
[3]पश्चान्नितम्बः स्त्रीकट्याः [4]क्लीबे तु जघनं पुरः ॥७५॥
[5]कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे ।
[6]स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः ॥७६॥
[8]भगं योनिर्द्वयोः [9]शिश्नो मेढ्रो मेहनशेफसी ।
[10]मुष्कोऽण्डकोशो वृषणः [11]पृष्ठवंशाधरे त्रिकम् ॥७७॥
[12]पिचण्डकुक्षी जठरोदरं तुन्दं [13]स्तनौ कुचौ ।
[14]चूचुकं तु कुचाग्रं [15]स्यान्न ना क्रोडं भुजान्तरम् ७८
[16]उरो वत्सं च वक्षश्च [17]पृष्ठं तु चरमं तनोः ।
[18]स्कन्धो भुजशिरोंऽसोऽस्त्री [19]सन्धी तस्यैव जत्रुणी ॥७९॥

---

१ कमरके दोनों बगलके २ नाम । २ कमरके ३ नाम । ३ स्त्रीके चूतड़का १ नाम । ४ स्त्रीकी कोखका १ नाम । ५ चूतड़ और रीढ़के निचले भागका १ नाम । ६ कूल्हेके २ नाम । ७ योनि और लिंगका संयुक्त १ नाम । ८ योनिके २ नाम । ९ लिंगके ४ नाम । १० अण्डकोशके ३ नाम । ११ रीढ़के नीचेवाले हिस्सेका १ नाम । १२ पेटके ५ नाम । १३ स्तनके २ नाम । १४ चूँचीके २ नाम । १५ गोदके २ नाम । १६ छातीके ३ नाम । १७ पीठका १ नाम । १८ कन्धेके ३ नाम । १९ हँसलीका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]बाहुमूले उभे कक्षौ [2]पार्श्वमस्त्री तयोरधः।
[3]मध्यमं चावलग्नं च मध्योऽस्त्री [4]द्वौ परौ द्वयोः ॥८०॥
भुजबाहू प्रवेष्टो दोः स्यात्[5]कफोणिस्तु कूर्परः।
[6]अस्योपरि प्रगण्डः स्यात्[7]प्रकोष्ठस्तस्य चाप्यधः ॥८१॥
[8]मणिबन्धादाकनिष्ठं करस्य करभो बहिः।
[9]पञ्चशाखः शयः पाणिस्तर्जनी[10] स्यात्प्रदेशिनी ॥८२॥
[11]अङ्गुल्यः करशाखाः स्युः [12]पुंस्यङ्गुष्ठः प्रदेशिनी ॥
मध्यमाऽनामिका चापि कनिष्ठा चेति ताः क्रमात् ॥८३॥
[13]पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ॥
[14]प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥८४॥
[15]अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः।

---

१ काँखके २ नाम। २ काँखके निचले भागका १ नाम। ३ देहके मध्यभागके ३ नाम। ४ बाँहके ४ नाम। ५ केहुनीके २ नाम। ६ केहुनीके ऊपरी हिस्सेका १ नाम। ७ निचले हिस्सेका १ नाम। ८ हथेलीकी पीठका १ नाम। ९ हाथके ३ नाम। १० अंगूठेकी बगलवाली उँगलीके २ नाम। ११ उँगलीमात्रके २ नाम। १२ सब उँगलियोंके १-१ नाम। १३ नाखूनके ४ नाम। १४ अंगूठेके ३ भेद। १५ बित्तेके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ ॥८५॥
[2]द्वौ संहतौ संहतलप्रतलौ वामदक्षिणौ ।
[3]पाणिर्निकुब्जः [4]प्रसृतिस्तौ युतावञ्जलिः पुमान् ॥८६॥
[5]प्रकोष्ठे विस्तृतकरे हस्तो [6]मुष्ट्या तु बद्धया ।
स रत्निः [7]स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥८७॥
[8]व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् ।
[9]ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ॥८८॥
[10]कण्ठो गलोऽथ [11]ग्रीवायां शिरोधिः कन्धरेत्यपि ।
[12]कम्बुग्रीवा त्रिरेखा [13]साऽवटुर्घाटा कृकाटिका ॥८९॥
[14]वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।
[15]क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥९०॥

---

१ थप्पड़के ३ नाम । २ दुहत्थे चटकनेके २ नाम । ३ पसरका १ नाम । ४ अंजलीका १ नाम । ५ एक हाथकी लम्बाईका १ नाम । ६ केहुनीसे बँधी मुट्ठीतकका १ नाम । ७ केहुनीसे कनिष्ठिका तकका १ नाम । ८ आड़ा हाथ फैलाने पर दोनों हाथकी उँगलियोंकी अन्तिम सीमा तककी नामका १ नाम । ९ एक पुरसाका १ नाम । १० गलेके २ नाम । ११ गरदनके ३ नाम । १२ जिस गलेमें लकीरें पड़ी हों, उसका १ नाम । १३ गलेकी घण्टीके ३ नाम । १४ मुँहके ७ नाम । १५ नाकके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।
[2]अधस्ताच्चिबुकं [3]गण्डौ कपोलौ [4]तत्परो हनुः ॥९१॥
[5]रदना दशना दन्ता रदा[6]स्तालु तु काकुदम् ॥
[7]रसज्ञा रसना जिह्वा [8]प्रान्तावोष्ठस्य सृक्किणी ॥९२॥
[9]ललाटमलिकं [10]गोधि[10]रूर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।
[11]कूर्चमस्त्री भ्रुवोर्मध्यं [12]तारकाक्ष्णः कनीनिका ॥९३॥
[13]लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।
दृग्दृष्टी [14]चास्रु नेत्राम्बु रोदनं चास्रमश्रु च ॥९४॥
[15]अपाङ्गौ नेत्रयोरन्तौ [16]कटाक्षोऽपाङ्गदर्शने ।
[17]कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥९५॥
उत्तमाङ्गं[18] शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।

---

१ होंठके ४ नाम । २ ठोढ़ीका १ नाम । ३ गालके २ नाम । ४ जबड़ेका १ नाम । ५ दाँतके ४ नाम । ६ तालूके २ नाम । ७ जीभके ३ नाम । ८ ओंठके दोनों कोनेका १ नाम । ९ ललाटके ३ नाम । १० नेत्रके ऊपरवाले भौंका १ नाम । ११ भौंके मध्यभागका १ नाम । १२ आँखकी पुतलीके २ नाम । १३ आँखके ८ नाम । १४ आँसूके ५ नाम । १५ नेत्रके दोनों कोनका १ नाम । १६ तिरछी नजरका १ नाम । १७ कानके ६ नाम । १८ मस्तकके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

[1]चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥९६॥
तद्वृन्दे[2] कैशिकं कैश्यमलकाश्चूर्णकुन्तलाः[3] ।
ते[4] ललाटे भ्रमरकाः काकपक्षः[5] शिखण्डकः ॥९७॥
कबरी[6] केशवेशोऽथ धम्मिल्लः[7] संयताः कचाः ।
शिखा[8] चूडा केशपाशी व्रतिनस्तु[9] सटा जटा ॥९८॥
वेणिः[10] प्रवेणीशीर्षण्यशिरस्यौ[11] विशदे कचे ।
पाशः[12] पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥९९॥
तनूरुहं[13] रोम लोम तद्वृद्धौ[14] श्मश्रु पुंमुखे ।
आकल्पवेषौ[15] नेपथ्यं प्रतिकर्म प्रसाधनम् ॥१००॥
दशैते[16] त्रिष्वलंकर्ताऽलंकरिष्णुश्च[17] मण्डितः ।
प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ॥१०१॥

---

१ बालके ६ नाम । २ केशराशिके २ नाम । ३ जुल्फीके २ नाम । ४ ललाटपर झुकी जुल्फोका १ नाम । ५ बच्चोंकी बुलबुलीके २ नाम । ६ पट्टीके २ नाम । ७ मोती आदिसे गुँथे केशका १ नाम । ८ शिखाके ३ नाम । ९ जटाके २ नाम । १० टेढ़ी लटके २ नाम । ११ बड़े बालके २ नाम । १२ केश-समूहके ३ नाम । १३ रोयंके ३ नाम । १४ दाढ़ी मूछका १ नाम । १५ सजावटके ५ नाम । १६ सजानेवालेके २ नाम । १७ सजे हुएके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विभ्राड्[1] भ्राजिष्णुरोचिष्णू भूषणं[2] स्यादलंक्रिया ।
अलङ्कारस्त्वाभरणं[3] परिष्कारो विभूषणम् ॥१०२॥
मण्डनं चाथ[4] मुकुटं किरीटं पुन्नपुंसकम् ।
चूडामणिः[5] शिरोरत्नं तरलो[6] हारमध्यगः ॥१०३॥
बालपाश्या[7] पारितथ्या पत्रपाश्या[8] ललाटिका ।
कर्णिका[9] तालपत्रं स्यात्कुण्डलं[10] कर्णवेष्टनम् ॥१०४॥
ग्रैवेयकं[11] कण्ठभूषा लम्बनं[12] स्याल्ललन्तिका ।
[13]स्वर्णैः प्रालम्बिकाऽथोरः[14] सूत्रिका मौक्तिकैः कृता ॥१०५॥
हारो[15] मुक्तावली [16]देवच्छन्दोऽसौ शतयष्टिका ।
हारभेदा[17] यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः ॥१०६॥

---

१ अलंकार आदिसे भली भाँति शोभितके ३ नाम । २ शृंगारके २ नाम । ३ गहनेके ५ नाम । ४ ताजके २ नाम । ५ शीशफूलके २ नाम । ६ हारके टिकड़ाका १ नाम । ७ बेंदीके २ नाम । ८ टीकाके २ नाम । ९ ढारकीके २ नाम । १० कुण्डलके २ नाम । ११ गलेके गहनोंके २ नाम । १२ कण्ठीके २ नाम । १३ सोनेकी कण्ठीका १ नाम । १४ मोतीके कण्ठाका १ नाम । १५ मोतीके हारके २ नाम । १६ सौलड़ीके हारका १ नाम । १७ हारोंके ८ भेद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अर्धहारो माणवक एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥१०७॥
आ[1]वापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।
केयूर[2]मङ्गदं तुल्ये अ[3]ङ्गुलीयकमूर्मिका ॥१०८॥
सा[4]क्षराऽङ्गुलिमुद्रा स्यात्क[5]ङ्कणं करभूषणम् ।
स्त्रीकट्यां[6] मेखला काञ्ची सप्तकी रशना तथा ॥१०९॥
क्लीबे सारसनं चाथ[7] पुंस्कट्यां शृङ्खलं त्रिषु ।
पा[8]दाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥११०॥
हंसकः पादकटकः [9]किङ्किणी क्षुद्रघण्टिका ।
त्वक्फलकृमिरोमाणि[10] वस्त्रयोनिर्दश त्रिषु ॥१११॥
वाल्कं[11] क्षौमादि फालं[12] तु कार्पासं बादरं च तत् ।
कौशेयं[13] कृमिकोशोत्थं राङ्कवं[14] मृगरोमजम् ॥११२॥

---

१ पहुँचीके ४ नाम। २ विजायठके २ नाम। ३ अंगूठीके २ नाम। ४ मुहर करनेवाली अंगूठीका १ नाम। ५ कंगनके २ नाम। ६ करधनीके ५ नाम। ७ पुरुषकी करधनका १ नाम। ८ पायजेवके ६ नाम। ९ घुँघुरूके २ नाम। १० वस्त्रोत्पत्तिके साधनका १ नाम। ११ टसरके कपड़ेका १ नाम। १२ सूती वस्त्रके ३ नाम। १३ रेशमी कपड़ोंके २ नाम। १४ ऊनी कपड़ोंके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनाहतं[1] निष्प्रवाणि तन्त्रकं च नवाम्बरम् ।
तत्स्यादुद्गमनीयं[2] यद्धौतयोर्वस्त्रयोर्युगम् ॥११३॥
पत्त्रोर्णं[3] धौतकौशेयं बहुमूल्यं[4] महाधनम् ।
क्षौमं[5] दुकूलं स्याद्द्वे[6] तु निवीतं प्रावृतं त्रिषु ॥११४॥
स्त्रियां[7] बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः ।
दैर्घ्यमायाम[8] आरोहः[9] परिणाहो विशालता ॥११५॥
[10]पटच्चरं जीर्णवस्त्रं [11]समौ नक्तककर्पटौ ।
वस्त्रमाच्छादनं[12] वासश्चैलं वसनमंशुकम् ॥११६॥
सुचेलकः[13] पटोऽस्त्री [14]स्याद्वराशिः स्थूलशाटकः ।
निचोलः[15] प्रच्छदपटः समौ[16] रल्लककम्बलौ ॥११७॥

---

१ नये वस्त्रके ४ नाम । २ धुले जोड़े कपड़ेका १ नाम । ३ धुले रेशमी वस्त्रके २ नाम । ४ कीमती कपड़ोंके २ नाम । ५ रेशमी दुपट्टेके २ नाम । ६ गोटेके २ नाम । ७ आँचलके २ नाम । ८ कपड़ोंकी लम्बाईके ३ नाम । ९ पनहेके २ नाम । १० पुराने कपड़ेके २ नाम । ११ चिथड़ेके २ नाम । १२ कपड़ाके ६ नाम । १३ अच्छे कपड़ोंके २ नाम । १४ मोटे कपड़ेके २ नाम । १५ ओहारके २ नाम । १६ कम्बलके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके ।
द्वौ[2] प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥११८॥
संव्यानमुत्तरीयं च[3] चोलः कूर्पासकोऽस्त्रियाम् ।
नीशारः[4] स्यात्प्रावरणे हिमानिलनिवारणे ॥११९॥
अर्धोरुकं[5] वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम् ।
स्युस्त्रिष्[6]वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥१२०॥
अस्त्री[7] वितानमुल्लोचो दूष्याद्यं[8] वस्त्रवेश्मनि ।
प्रतिसीरा[9] जवनिका स्यात्तिरस्करिणी च सा ॥१२१॥
[10]परिकर्माङ्गसंस्कारः [11]स्यान्मार्ष्टिर्मार्जना मृजा ।
[12]उद्वर्तनोत्सादने द्वे समे [13]आप्लाव आप्लवः ॥१२२॥
स्नानं [14]चर्चा तु चार्चिक्यं स्थासकोऽथ [15]प्रबोधनम् ।

---

१ धोतीके ४ नाम । २ दुपट्टेके ५ नाम । ३ अँगियाके २ नाम । ४ रजाईका १ नाम । ५ जनानी कुरतीका १ नाम । ६ लहँगाका १ नाम । ७ चँदवाके २ नाम । ८ खेमाका १ नाम । ९ कनातके ३ नाम । १० शरीरमें केसर-चन्दन आदि लगानेके २ नाम । ११ देहकी सफाई करनेके ३ नाम । १२ उबटन लगानेके २ नाम । १३ नहानेके ३ नाम । १४ चन्दनलेपनके ३ नाम । १५ गयी सुगन्धको ताजी करनेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अनुबोधः पत्रलेखा पत्राङ्गुलिरिमे समे ॥१२३॥
तमालपत्रतिलकचित्रकाणि विशेषकम् ।
द्वितीयं च तुरीयं च न स्त्रियामथ कुङ्कुमम् ॥१२४॥
काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने ।
रक्तसङ्कोचपिशुनं धीरं लोहितचन्दनम् ॥१२५॥
लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।
लवङ्गं देवकुसुमं श्रीसंज्ञमथ जायकम् ॥१२६॥
कालीयकं च कालानुसार्यं चाथ समार्थकम् ।
वंशिकागुरुराजार्हलोहं कृमिजजोङ्गकम् ॥१२७॥
कालागुर्वगुरुः स्यात्तन्मङ्गल्या मल्लिगन्धि यत् ।
[10]यक्षधूपः सर्जरसो रालसर्वरसावपि ॥१२८॥
बहुरूपोऽप्यथ [11]वृकधूपकृत्रिमधूपकौ ।

---

१ स्तन-कपोल आदिपर की गयी चित्रकारीके २ नाम । २ टीका लगानेके ४ नाम । ३ केसरके ११ नाम । ४ आलताके ६ नाम । ५ लौंगके ३ नाम । ६ पीले चन्दनके ३ नाम । ७ अगरके ६ नाम । ८ काली अगरके २ नाम । ९ मंगला-गुरुका १ नाम । १० रालके ५ नाम । ११ दशांग धूपके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तुरुष्कः पिण्डकः सिह्लो यावनोऽप्यथ पायसः ॥१२९॥
श्रीवासो वृकधूपोऽपि श्रीवेष्टसरलद्रवौ ।
मृगनाभिर्मृगमदः कस्तूरी चाथ कोलकम् ॥१३०॥
कङ्कोलकं कोशफलमथ कर्पूरमस्त्रियाम् ।
घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका ॥१३१॥
गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।
तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥१३२॥
[१०]तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।
कुचन्दनं चाथ [११]जातीकोषजातीफले समे ॥१३३॥
[१२]कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः ।
[१३]गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम् ॥१३४॥

---

१ लोबानके ४ नाम । २ चीड़के धूपके ५ नाम । ३ कस्तूरीके ३ नाम । ४ शीतलचीनीके ३ नाम । ५ कपूरके ५ नाम । ६ चन्दनके ४ नाम । ७ सफेद और शीतल चन्दनका १ नाम । ८ कमलकी सुगन्धिवाले चन्दनका १ नाम । ९ पीले चन्दनका १ नाम । १० लाल चन्दनके ५ नाम । ११ जायफलके २ नाम । १२ लेपविशेषका १ नाम । १३ चोआके ४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चूर्णानि वासयोग्याः स्युर्भावितं[2] वासितं त्रिषु ।
संस्कारो[3] गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ॥१३५॥
माल्यं[4] मालास्रजौ मूर्ध्नि केशमध्ये[5] तु गर्भकः ।
प्रभ्रष्टकं[6] शिखालम्बि पुरोन्यस्तं[7] ललामकम् ॥१३६॥
प्रालम्बमृजुलम्बि [8]स्यात्कण्ठाद्वैकक्षिकं[9] तु तत् ।
यत्तिर्यक्क्षिप्तमुरसि [10]शिखास्वापीडशेखरौ ॥१३७॥
[11]रचना स्यात्परिस्यन्द [12]आभोगः परिपूर्णता ।
उपधानं[13] तूपबर्हः [14]शय्यायां शयनीयवत् ॥१३८॥
शयनं [15]मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः ।
[16]गेन्दुकः कन्दुको दीपः[17] प्रदीपः [18]पीठमासनम् ॥१३९॥

---

१ सुगन्धित पाउडरके २ नाम। २ सुगन्धिवासित वस्तुके २ नाम। ३ वासनेके लिए उपयुक्त द्रव्यका १ नाम। ४ सिर पर धरी हुई मालाके ३ नाम। ५ बालमें गुँथी मालाके १ नाम। ६ सिरसे चोटी तक लटकती मालाका १ नाम। ७ सिरसे कन्धे तक लटकती मालाका १ नाम। ८ गलेसे लटकती मालाका १ नाम। ९ जनेऊकी भाँति पहनी मालाका १ नाम। १० शिखामें लगी मालाके २ नाम। ११ माला गूँथनेके २ नाम। १२ पूर्णताके २ नाम। १३ तकियाके २ नाम। १४ बिस्तरके ३ नाम। १५ पलंगके ४ नाम। १६ गेंदके २ नाम। १७ चिरागके २ नाम। १८ आसनके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]समुद्गकः सम्पुटकः [2]प्रतिग्राहः पतद्ग्रहः ।
प्रसाधनी[3] कङ्कतिका [4]पिष्टातः पटवासकः ॥१४०॥
[5]दर्पणे मुकुरादर्शौ [6]व्यजनं तालवृन्तकम् ।

इति मनुष्यवर्गः ।

७ अथ ब्रह्मवर्गः ।

[7]सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः सन्तानो [8]वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥
[9]विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।
राजबीजी[10] राजवंश्यो बीज्यस्तु[11] कुलसम्भवः ॥ २ ॥
महाकुलकुलीनार्यसभ्यसज्जनसाधवः[12] ।
ब्रह्मचारी[13] गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥ ३ ॥

---

१ बेलहराके २ नाम । २ पीकदानीके २ नाम । ३ कंघीके २ नाम । ४ बुकवाके २ नाम । ५ ऐनाके ३ नाम । ६ पंखेके २ नाम । ७ खानदानके ६ नाम । ८ वर्णका १ नाम । ९ चारों वर्णोंका १ नाम । १० राजवंशीयके २ नाम । ११ कुलमें उत्पन्नके २ नाम । १२ सज्जनके ६ नाम । १३ चारों आश्रमोंके १-१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आश्रमोऽस्त्री [1]द्विजात्यग्रजन्मभूदेववाडवाः।
विप्रश्च ब्राह्मणोऽसौ [2]षट्कर्मा यागादिभिर्वृतः ॥ ४ ॥
विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः ॥५॥
धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः।
दूरदर्शी दीर्घदर्शी [4]श्रोत्रियच्छान्दसौ समौ ॥६॥
[5]मीमांसको जैमिनीये [6]वेदान्ती ब्रह्मवादिनि।
[7]वैशेषिके स्यादौलूक्यः [8]सौगतः शून्यवादिनि ॥ ७ ॥
[9]नैयायिकस्त्वक्षपादः [10]स्यात्स्याद्वादिक आर्हकः।
[11]चार्वाकलौकायतिकौ [12]सत्कार्ये सांख्यकापिलौ ॥ ८ ॥
[13]उपाध्यायोऽध्यापकोऽथ [14]स्यान्निषेकादिकृद्गुरुः।

---

१ ब्राह्मणोंके ६ नाम। २ अध्ययनादिसे सम्पन्न ब्राह्मणका १ नाम। ३ पंडितके २२ नाम। ४ वेदपाठी ब्राह्मणके २ नाम। ५ मीमांसक पंडितके २ नाम। ६ वेदान्तीके २ नाम। ७ वैशेषिक शास्त्रके ज्ञाताके २ नाम। ८ बौद्ध पंडितके २ नाम। ९ नैयायिकका १ नाम। १० जैनी पंडितके २ नाम। ११ नास्तिक शास्त्रज्ञके २ नाम। १२ सांख्यशास्त्रज्ञके २ नाम। १३ अध्यापकके २ नाम। १४ गुरुका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[१]मन्त्रव्याख्याकृदाचार्य [२]आदेष्टा त्वध्वरे व्रती ॥ ९ ॥
यष्टा च यजमानश्च [३]स सोमवति दीक्षितः ।
[४]इज्याशीलो यायजूको [५]यज्वा तु विधिनेष्टवान् ॥१०॥
[६]स गीष्पतीष्ट्या स्थपतिः [७]सोमपीथी तु सोमपाः ।
[८]सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ।११॥
[९]अनूचानः प्रवचने सांगेऽधीती [१०]गुरोस्तु यः ।
लब्धानुज्ञः समावृत्तः [११]सुत्वा त्वभिषवे कृते ॥१२॥
[१२]छात्रान्तेवासिनौ शिष्ये [१३]शैक्षाः प्राथमकल्पिकाः ।
[१४]एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥१३॥

---

१ वेदव्याख्याताका १ नाम । २ यजमानके ३ नाम । ३ सोमयाजी यजमानका १ नाम । ४ पुनः पुनः यज्ञ करनेवालेके २ नाम । ५ विधिवत् यज्ञ करनेवालेका १ नाम । ६ बृहस्पतियज्ञकर्ताका १ नाम । ७ सोमयाजी यजमानके २ नाम । ८ अपना सर्वस्व दक्षिणामें देकर यज्ञ करनेवालेका १ नाम । ९ सांगवेदाध्यायीका १ नाम । १० गुरुकुलसे लौटे स्नातकका १ नाम । ११ स्नातकका १ नाम । १२ शिष्यके ३ नाम । १३ वेद पढ़ना प्रारम्भ करनेवालेके २ नाम । १४ एक शाखा स्वाध्यायी सहपाठीका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सतीर्थ्यास्त्वेकगुरव[2]श्चितवानग्निमग्निचित् ।
[3]पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥१४॥
[4]उपज्ञा ज्ञानमाद्यं [5]स्याज्ज्ञात्वारम्भ उपक्रमः ।
[6]यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥१५॥
[7]पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥१६॥
[8]समज्या परिषद्गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥१७॥
[9]प्राग्वंशः प्राग्घविर्गेहात्सदस्या[10] विधिदर्शिनः ।
[11]सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते ॥१८॥
[12]अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ।
आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥१९॥

---

१ एक गुरुके पास पढ़नेवालोंका १ नाम । २ अग्नि-संग्रहीताका १ नाम । ३ परम्परासे प्राप्त उपदेशके २ नाम । ४ प्रथम ज्ञानका १ नाम । ५ ग्रन्थारम्भका १ नाम । ६ यज्ञके ७ नाम । ७ पंचमहायज्ञोंका १-१ नाम । ८ सभाके ६ नाम । ९ हविर्गृहके सामनेवाली कोठरीका १ नाम । १० सदस्यके २ नाम । ११ सभ्योंके ४ नाम । १२ यजुः साम तथा अथर्व वेदके ज्ञाता ऋत्विजोंके १-१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]वेदिः परिष्कृता भूमिः [2]समे स्थण्डिलचत्वरे ।
[3]चषालो यूपकटकः कुम्बा [4]सुगहना वृतिः ॥२०॥
[5]यूपाग्रं तर्म [6]निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।
[8]दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥२१॥
[9]अग्नित्रयमिदं त्रेता [9]प्रणीतः संस्कृतोऽनलः ।
[10]समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥२२॥
[11]यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
[12]तस्मिन्नानाय्योऽथाग्नायी [13]स्वाहा च हुतभुक्प्रिया ॥२३॥
[14]ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने ।

---

१ ऋत्विजोंके २ नाम । २ यज्ञवेदीका १ नाम । ३ यज्ञके लिए परिष्कृत भूमिके २ नाम । ४ यज्ञयूपकी गंडारीके २ नाम । ५ यज्ञमें अन्त्यजोंकी दृष्टि बचानेके लिए लगी टट्टीका १ नाम । ६ यूपके अग्रभागके २ नाम । ७ अरणीका १ नाम । ८ यज्ञनिर्विशेषोंके १-१ नाम । ९ तीन अग्नियोंका १ संयुक्त नाम । १० मंत्रसंस्कृत अग्निका १ नाम । ११ अग्नि-स्थापनभूमिके ३ नाम । १२ गार्हपत्यसे निकाले हुए दक्षिणाग्निका १ नाम । १३ अग्निपत्नीके ३ नाम । १४ समिधा डालनेके मंत्रके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]गायत्रीप्रमुखं छन्दो [2]हव्यपाके चरुः पुमान् ॥२४॥
[3]आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।
[4]धवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा ॥२५॥
[5]पृषदाज्यं सदध्याज्ये [6]परमान्नं तु पायसम् ।
[7]हव्यकव्ये देवपित्र्ये अन्ने [8]पात्रं स्रुवादिकम् ॥२६॥
[9]ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ।
[10]उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥२७॥
[11]परम्पराकं शमनं प्रोक्षणं च वधार्थकम् ।
[12]वाच्यलिङ्गाः प्रमीतोपसम्पन्नप्रोक्षिता हते ॥२८॥
[13]सान्नाय्यं हविरग्नौ तु हुतं त्रिषु [14]वषट्कृतम् ।

---

१ गायत्री आदि मंत्रोंका १ नाम। २ हविष्यान्नका १ नाम। ३ गरम दही डालनेसे उत्पन्न विकारका १ नाम। ४ मृगचर्मसे बने पंखेका १ नाम। ५ दधिमिश्रित घृतका १ नाम। ६ खीरके २ नाम। ७ देवता-पितरोंको दिये जानेवाले अन्नका १-१ नाम। ८ यज्ञपात्रोंका १ नाम। ९ स्रुवाके ४ भेद। १० अभिमंत्रित करके यज्ञमें वध करनेवाले पशुका १ नाम। ११ यज्ञमें पशुवधके ३ नाम। १२ यज्ञमें मृत पशुके ३ नाम। १३ शाकल्यके २ नाम। १४ अग्निमें हवन की हुई वस्तुका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

दीक्षान्तोऽवभृथो यज्ञे तत्कर्मार्हं तु यज्ञियम् ॥२९॥
त्रिष्वथ क्रतुकर्मेष्टं पूर्तं खातादि कर्म यत् ।
अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥३०॥
त्यागो विहापितं दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥३१॥
प्रादेशनं निर्वपणमपवर्जनमंहतिः ।
मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदैहिकम् ॥३२॥
पितृदानं निवापः स्याच्छ्राद्धं तत्कर्म शास्त्रतः ।
"अन्वाहार्यं मासिकेऽ"शोऽष्टमोह्नः कुतपोऽस्त्रियाम् ॥३३॥
"पर्येषणा परीष्टिश्चा"न्वेषणा च गवेषणा ।

---

१ यज्ञान्तमें स्नानका १ नाम । २ यज्ञ योग्य वस्तुका १ नाम । ३ यज्ञादि कर्मका १ नाम । ४ स्नानादि कर्मका १ नाम । ५ यज्ञ तथा श्राद्धसे बचे अन्नके १-१ नाम । ६ दानके १२ नाम । ७ मरणोपरान्त दानका १ नाम । ८ पितरोंके उद्देश्यसे दिये दानका १ नाम । ९ श्राद्धका १ नाम । १० मासिक श्राद्धके २ नाम । ११ श्राद्धकालविशेषका १ नाम । १२ श्राद्धमें द्विजसेवाके २ नाम । १३ धर्मान्वेषणके नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]संनिस्त्वध्येषणा [2]याच्ञाऽभिशस्तिर्याचनार्थना ॥३४॥
षट् तु [3]त्रिष्वर्घ्यमर्घार्थे [4]पाद्यं पादाय वारिणि ।
[5]क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि ॥३५॥
[6]स्युरावेशिक आगन्तुरतिथिर्ना गृहागते ।
[7]प्राघूर्णिकः प्राघुणकश्चा[8]भ्युत्थानं तु गौरवम् ॥३६॥
[9]पूजा नमस्याऽपचितिः सपर्याऽर्चाऽर्हणाः समाः ।
[10]वरिवस्या तु शुश्रूषा परिचर्याप्युपासना ॥३७॥
[11]व्रज्याऽटाट्या पर्यटनं [12]चर्या त्वीर्यापथे स्थितिः ।
[13]उपस्पर्शस्त्वाचमनमथ [14]मौनमभाषणम् ॥३८॥
[15]प्राचेतसश्चादिकविः स्यान्मैत्रावरुणिश्च सः ।
वाल्मीकिश्चाथ गाधेयो विश्वामित्रश्च कौशिकः ॥३९॥

---

१ गुरुजनोंसे प्रार्थनाके २ नाम । २ माँगनेके ४ नाम । ३ पूजोपचारार्थ जलका १ नाम । ४ पाँव धोनेके जलका १ नाम । ५ आतिथ्य तथा अतिथिसेवा योग्य वस्तुका १-१ नाम । ६ मेहमानके ४ नाम । ७ पाहुनके २ नाम । ८ सम्मानार्थ खड़े होनेके २ नाम । ९ पूजाके ६ नाम । १० सेवाके ४ नाम । ११ घूमनेके ४ नाम । १२ ईर्यापथ (योगमार्ग) में स्थित योगीका १ नाम । १३ आचमनका २ नाम । १४ मौनके २ नाम । १५ वाल्मीकिके ४ और विश्वामित्रके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[1]व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः ।
आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः ॥४०॥
[2]पर्यायश्चातिपातस्तु स्यात्पर्यय उपात्ययः ।
[3]नियमो व्रतमस्त्री [4]तच्चोपवासादि पुण्यकम् ॥४१॥
[5]औपवस्तं तूपवासो विवेकः[6] पृथगात्मता ।
[7]स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धि[8]रथाञ्जलिः ॥४२॥
पाठेब्रह्माञ्जलिः [9]पाठे विप्रुषो ब्रह्मविन्दवः ।
[10]ध्यानयोगासने ब्रह्मासनं [11]कल्पे विधिक्रमौ ॥४३॥
[12]मुख्यः स्यात्प्रथमः कल्पोऽ[13]नुकल्पस्तु ततोऽधमः ।
[14]संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥४४॥

---

१ व्यासके ४ तथा परिपाटीके ५ नाम। २ क्रमभंगके ३ नाम। ३ व्रतके २ नाम। ४ चान्द्रायण आदि उपवासोंका १ नाम। ५ उपवासके २ नाम। ६ विवेकके २ नाम। ७ वेदाभ्यास तथा सदाचारसे उपार्जित सम्पदाका १ नाम। ८ वेदपाठके समय हाथ जोड़नेका १ नाम। ९ वेदपाठके समय निकले पसीनेका १ नाम। १० ध्यान तथा योगके आसनका १ नाम। ११ वैदिक विधानके ३ नाम। १२ मुख्य विधिका १ नाम। १३ गौण विधिका १ नाम। १४ संस्कारपूर्वक वेदाध्ययनका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]समे तु पादग्रहणमभिवादनमित्युभे ।
[2]भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥४५॥
[3]तपस्वी तापसः पारिकांक्षी [4]वाचंयमो मुनिः ।
[5]तपःक्लेशसहो दान्तो [6]वर्णिनो ब्रह्मचारिणः ॥४६॥
[7]ऋषयः सत्यवचसः [8]स्नातकस्त्वाप्लुतो व्रती ।
[9]ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥४७॥
[10]यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश्चाथ [11]विरजस्तमसः स्युर्द्वयातिगाः ॥४८॥
[12]पवित्रः प्रयतः पूतः [13]पाखण्डाः सर्वलिङ्गिनः ।
[14]पालाशो दण्ड आषाढो व्रते [15]राम्भस्तु वैणवः ॥४९॥

---

१ प्रणामके २ नाम। २ संन्यासीके ५ नाम। ३ तपस्वीके ३ नाम। ४ मौनव्रतीके २ नाम। ५ तपके क्लेशको सहनेवालेका १ नाम। ६ ब्रह्मचारीके २ नाम। ७ ऋषिके २ नाम। ८ जिसका समावर्तन हो चुका है, उसका १ नाम। ९ जितेन्द्रियके २ नाम। १० नियमवश भूमिपर सोनेवालेके २ नाम। ११ रजोगुण-तमोगुणसे रहित ऋषिके २ नाम। १२ पवित्रके ३ नाम। १३ पाखण्डीके २ नाम। १४ पलाश-दण्डका १ नाम। १५ बाँसके दण्डका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]अस्त्री कमण्डलुः कुण्डी [2]व्रतिनामासनं वृषी ।
[3]अजिनं चर्म कृत्तिः स्त्री [4]भैक्षं भिक्षाकदम्बकम् ॥५०॥
[5]स्वाध्यायः स्याज्जपः [6]सुत्याऽभिषवः सवनं च सा ।
[7]सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ॥५१॥
[8]दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् ।
[9]शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥५२॥
[10]नियमस्तु स यत्कर्म नित्यमागन्तुसाधनम् ।
[11]क्षौरं तु भद्राकरणं मुण्डनं वपनं त्रिपु ॥५३॥
[12]उपवीतं ब्रह्मसूत्रं प्रोद्धृते दक्षिणे करे ।

---

१ कमण्डलके २ नाम । २ व्रतियोंके आसनका १ नाम । ३ मृगचर्मके ३ नाम । ४ भिक्षाके ढेरका १ नाम । ५ वेदाभ्यासके २ नाम । ६ सोमलता कूटनेके २ नाम । ७ सर्वपापनाशक मंत्रका १ नाम । ८ अमावस-पूर्णिमाको किये जानेवाले यज्ञका १-१ नाम । ९ शरीरसाध्य नित्यकर्मका १ नाम । १० बाह्य (मिट्टी जल आदिसे) साध्य कर्मका १ नाम । ११ मुंडनके ४ नाम । १२ बायें कन्धेपर रखे और दहिने हाथपर लटकते जनेऊका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम् ॥५४॥
अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम् ।
मध्येऽङ्गुष्ठाङ्गुल्याः पित्र्यं मूले त्वङ्गुष्ठस्य ब्राह्मम् ॥५५॥
स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत्कृच्छ्रं सांतपनादिकम् ॥५६॥
संन्यासवत्यनशने पुमान्प्रायोऽथ वीरहा ।
नष्टाग्निः कुहना लोभान्मिथ्येर्यापथकल्पना ॥५७॥
व्रात्यः संस्कारहीनः स्यादस्वाध्यायो निराकृतिः ।

---

१ दहिने कन्धेपर रखे और बाये हाथमें लटकते जनेऊका १ नाम । २ मालाकी तरह लटकते जनेऊका १ नाम । ३ अंगुलीके अग्रभागका १ नाम । ४ अनामिका और तर्जनी उँगलीके अग्रभागका १ नाम । ५ अंगुष्ठ तथा तर्जनीके मध्य भागका १ नाम । ६ अंगुष्ठके मूलभागका १ नाम । ७ ब्रह्ममें लय होनेके ३ नाम । ८ देवताओंमें लय होनेके ३ नाम । ९ सान्तपन आदि व्रतोंका १ नाम । १० संन्यासपूर्वक अनशनका १ नाम । ११ अग्नित्यागीके २ नाम । १२ बगुलाभगतीका १ नाम । १३ उपनयनसंस्कारहीनका १ नाम । १४ वेदाभ्यासहीनका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]धर्मध्वजी लिङ्गवृत्तिरवकीर्णी क्षतव्रतः ॥५८॥
[3]सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ॥५९॥
[4]परिवेत्ताऽनुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ।
[5]परिवित्तिस्तु तज्ज्यायान्[6]विवाहोपयमौ समौ ॥६०॥
तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ।
[7]व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ॥६१॥
[8]त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः ।
[10]सबलैस्तैश्चतुर्भद्रं [11]जन्याः स्निग्धा वरस्य ये ॥६२॥

इति ब्रह्मवर्गः ।

---

१ जीविकार्थ जटा आदि धारण करनेवालेके २ नाम । २ ब्रह्मचर्यभ्रष्टके २ नाम । ३ सूर्यास्त तथा सूर्योदयतक सोनेवालेका १-१ नाम । ४ जिसका बड़ा भाई अविवाहित हो उसका १ नाम । ५ उस अविवाहित बड़े भाईका १ नाम । ६ विवाहके ६ नाम । ७ मैथुनके ५ नाम । ८ धर्म-अर्थ कामके समुदायका १ नाम । ६ धर्म-अर्थ-काम-मोक्षके समुदायका १ नाम । १० मनुष्योंकी अभिलाषाओं, बल, धर्म, सुख तथा धनका संयुक्त १ नाम । ११ सहबालाका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

८ अथ क्षत्रियवर्गः ।

[1]मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।
[2]राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥१॥
[3]राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ॥
[4]चक्रवर्ती सार्वभौमो [5]नृपोऽन्यो मण्डलेश्वरः ॥२॥
येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ।
शास्ति यश्चाज्ञया राज्ञः स [6]सम्राडथ [7]राजकम् ॥३॥
राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ।
[8]मन्त्री धीसचिवोऽमात्यो[9]ऽन्ये कर्मसचिवास्ततः ॥४॥
[10]महामात्राः प्रधानानि [11]पुरोधास्तु पुरोहितः ।
[12]द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥५॥

---

१ क्षत्रियके ५ नाम । २ राजाके ७ नाम । ३ देश देशान्तरके राजे जिसे प्रणाम करें उसका १ नाम । ४ चक्रवर्त राजाके २ नाम । ५ माण्डलिक राजाओंका १ नाम । ६ सम्राट्का १ नाम । ७ राजाओं और क्षत्रियगणका १-१ नाम । ८ मंत्रीके ३ नाम । ९ छोटे मंत्रीका १ नाम १० प्रधानके २ नाम । ११ पुरोहितके २ नाम । १२ न्यायाधीशके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitized by eGangotri

[1]प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।
[2]रक्षिवर्गस्त्वनीकस्थोऽथाध्यक्षाधिकृतौ [3]समौ ॥६॥
[4]स्थायुकोऽधिकृतो ग्रामे [5]गोपो ग्रामेषु भूरिषु ।
[6]भौरिकः कनकाध्यक्षो [7]रूप्याध्यक्षस्तु नैष्किकः ॥७॥
[8]अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।
[9]सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥८॥
[10]षण्ढो वर्षवरस्तुल्यो [11]सेवकार्थ्यनुजीविनः ।
[12]विषयानन्तरो राजा [13]शत्रुर्मित्रमतः परम् ॥९॥
[14]उदासीनः परतरः [15]पार्ष्णिग्राहस्तु पृष्ठतः ॥
[16]रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः ॥१०॥
द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः ।

---

१ दरवानके ५ नाम । २ राजाके अंगरक्षकके २ नाम । ३ अधिकारीके २ नाम । ४ एक गाँवके अधिकारीका १ नाम । ५ अनेक गाँवोंके अधिकारीका १ नाम । ६ सुवर्णाध्यक्षके २ नाम । ७ चाँदीके अधिकारीके २ नाम । ८ रनिवासके अध्यक्षका १ नाम । ९ रनिवासमें पहरा देनेवालेके ४ नाम । १० हिजड़ेके ३ नाम । ११ सेवकके ३ नाम । १२ पड़ोसी राजाका १ नाम । १३ शत्रुसे भिन्न राजाका १ नाम । १४ उदासीन राजाका १ नाम । १५ विजयके लिए चढ़े हुए राजापर पीछेसे हमला करनेवाले राजाका १ नाम । १६ शत्रुके १६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिघातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥११॥
¹वयस्यः स्निग्धः सवया अथ ²मित्रं सखा सुहृत् ।
सख्यं साप्तपदीनं स्यादनुरोधोऽनुवर्तनम् ॥१२॥
⁴यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः ।
चारश्च गूढपुरुषश्च ⁵आप्तप्रत्ययितौ समौ ॥१३॥
⁶सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि ।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि ॥१४॥
⁷तान्त्रिको ज्ञातसिद्धान्तः ⁸सत्री गृहपतिः समौ ।
¹⁰लिपिकारोऽक्षरचणोऽक्षरचञ्चुश्च लेखके ॥१५॥
¹⁰लिखिताक्षरसंस्थाने लिपिर्लिबिरुभे स्त्रियौ ।
¹¹स्यात्संदेशहरो दूतो ¹²दूत्यं तद्भावकर्मणि ॥१६॥
¹⁴अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।

---

१ लंगोटिया यारके ३ नाम । २ मित्रके ३ नाम । ३ अनुकूलके २ नाम । ४ गुप्तचर (खुफिया) के ७ नाम । ५ विश्वस्त व्यक्तिके २ नाम । ६ ज्योतिषीके ८ नाम । ७ शास्त्रतत्त्वज्ञके २ नाम । ८ घरके मालिकके २ नाम । ९ लेखकके ४ नाम । १० लेखके ४ नाम । ११ सन्देशवाहकके २ नाम । १३ दूतकर्मका १ नाम । १४ यात्रीके ५ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaqtion by eGangotri

[1]स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ॥१७॥
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ।
[2]सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ॥१८॥
षड्गुणाः [3]शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः ।
[4]क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥१९॥
[5]स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम् ।
[6]सामदाने भेददण्डावित्युपायचतुष्टयम् ॥२०॥
[7]साहसं तु दमो दण्डः [8]साम सान्त्वमथो समौ ।
[9]भेदोपजापावुपधा [10]धर्माद्यैर्यत्परीक्षणम् ॥२१॥
पञ्च [11]त्रिष्वषडक्षीणो यस्तृतीयाद्यगोचरः ।
[12]विविक्तविजनच्छन्ननिःशलाकास्तथा रहः ॥२२॥

---

१ राज्याङ्गके ७ नाम। २ राजा के षड्गुणोंके १-१ नाम। ३ राजाकी तीनों शक्तियोंका १ नाम। ४ नीतिज्ञोंके त्रिवर्गके ३ नाम। ५ कोष-दण्डके तेजके २ नाम। ६ राजाके चारों उपायोंके १-१ नाम। ७ दण्डके ३ नाम। ८ सामके २ नाम। ९ भेदके २ नाम। १० मंत्रियोंका भाव जाननेका १ नाम। ११ दो आदमियोंसे की गयी सलाहका १ नाम। १२ एकान्तके ५ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

रहश्चोपांशु चालिङ्गे [1]रहस्यं तद्भवे त्रिपु ।
[2]समौ विस्रम्भविश्वासौ [3]भ्रेषो भ्रंशो यथोचितात् ॥२३॥
[4]अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् ।
[5]युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥२४॥
न्याय्यं च त्रिपु षट् [6]सम्प्रधारणा तु समर्थनम् ।
[7]अपवादस्तु निर्देशो निदेशः शासनं च सः ॥२५॥
शिष्टिश्चाज्ञा च [8]संस्था तु मर्यादा धारणा स्थितिः ।
[9]आगोऽपराधो मन्तुश्च [10]समे तूद्दानबन्धने ॥२६॥
[11]द्विपाद्यो द्विगुणो दण्डो [12]भागधेयः करो बलिः ।
[13]घट्टादिदेयं शुल्कोऽस्त्री [14]प्राभृतं तु प्रदेशनम् ॥२७॥
उपायनमुपग्राह्यमुपहारस्तथोपदा ।

---

१ गुप्त बातका १ नाम । २ विश्वासके २ नाम । ३ मूलस्वरूपसे पतनके २ नाम । ४ न्यायके ५ नाम । ५ न्याययुक्त वस्तुके ६ नाम । ६ उचितानुचितकी परीक्षाके २ नाम । ७ आज्ञाके ६ नाम । ८ मर्यादाके ४ नाम । ९ अपराधके ३ नाम । १० कैदके २ नाम । ११ दूने दण्डका १ नाम । १२ मालगुजारीके ३ नाम । १३ महसूलका १ नाम । १४ भेंट देनेके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]यौतुकादि तु यद्देय सुदायो हरणं च तत् ॥२८॥
[2]तत्कालस्तु तदात्वं [3]स्यादुत्तरः काल आयतिः ।
[4]सांदृष्टिकं फलं सद्य [5]उदर्कः फलमुत्तरम् ॥२९॥
[6]अदृष्टं वह्नितोयादि [7]दृष्टं स्वपरचक्रजम् ।
[8]महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥३०॥
[9]प्रक्रिया त्वधिकारः [10]स्याच्चामरं तु प्रकीर्णकम् ।
[11]नृपासनं यत्तद्भद्रासनं [12]सिंहासनं तु तत् ॥३१॥
हैमं [13]छत्रं त्वातपत्रं राज्ञस्तु [14]नृपलक्ष्म तत् ।
[15]भद्रकुम्भः पूर्णकुम्भो [16]भृङ्गारः कनकालुका ॥३२॥

---

१ दहेजमें दी जानेवाली वस्तुके २ नाम। २ वर्तमानकालका १ नाम। ३ उत्तरकालका १ नाम। ४ सद्यः फलका १ नाम। ५ भावी कर्मफलका १ नाम। ६ अग्नि और अतिवृष्टिके उत्पातका १ नाम। ७ अपने और पराये राज्यके भयका १ नाम। ८ राजाओंके सहायकसे होनेवाले भयका १ नाम। ९ कानून चलानेके २ नाम। १० चँवरके २ नाम। ११ राजगद्दीके २ नाम। १२ सुनहली राजगद्दीके २ नाम। १३ छत्रके २ नाम। १४ राजछत्रके २ नाम। १५ भरे घटेके २ नाम। १६ झारीके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]निवेशः शिबिरं षण्ढे [2]संज्जनं तूपरक्षणम् ।
[3]हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम् ॥३३॥
[4]दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥३४॥
इभः स्तम्बेरमः पद्मी [5]यूथनाथस्तु यूथपः ।
[6]मदोत्कटो मदकलः [7]कलभः करिशावकः ॥३५॥
[8]प्रभिन्नो गर्जितो मत्तः [9]समावुद्धान्तनिर्मदौ ।
[10]हास्तिकं गजता वृन्दे [11]करिणी धेनुका वशा ॥३६॥
[12]गण्डः कटो [13]मदो दानं [14]वमथुः करशीकरः ।
[15]कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये [16]विदुः पुमान् ॥३७॥

---

१ छावनीके २ नाम । २ पहरेके २ नाम । ३ हाथी, घोड़े, रथ तथा पैदल सेनाका १ नाम । ४ हाथीके १५ नाम । ५ हाथियोंके सरदारका १ नाम । ६ मदान्ध हाथीके २ नाम । ७ हाथीके बच्चेके २ नाम । ८ मद बहानेवाले हाथीके ३ नाम । ९ मदहीन हाथीके २ नाम । १० गजसमूहके २ नाम । ११ हथिनीके ३ नाम । १२ हाथीके गालके २ नाम । १३ हाथीके मदके २ नाम । १४ सूँड़से पानी बहनेके २ नाम । १५ हाथीके मस्तकके मांसका १ नाम । १६ कुंभोंके बीचमें खाली जगहका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

अवग्रहो ललाटं स्यादीषिकां त्वक्षिकूटकम् ।
अपाङ्गदेशो निर्याणं कर्णमूलं तु चूलिका ॥३८॥
अधः कुम्भस्य वाहित्थं प्रतिमानमधोऽस्य यत् ।
आसनं स्कन्धदेशः स्यात्पद्मकं बिन्दुजालकम् ॥३९॥
पार्श्वभागः पक्षभागो दन्तभागस्तु योऽग्रतः ।
द्वौ पूर्वपश्चाज्जंघादिदेशौ गात्रावरे क्रमात् ॥४०॥
तोत्रं वेणुकमालानं बन्धस्तम्भेऽथ शृङ्खले ।
अन्दुको निगडोऽस्त्री स्यादंकुशोऽस्त्री सृणिः स्त्रियाम्॥४१॥
दूष्या कक्ष्या वरत्रा स्यात्कल्पना सज्जना समे ।

---

१ ललाटका १ नाम । २ नेत्रकी गोलाईके २ नाम । ३ हाथीके निहारनेका १ नाम । ४ कानकी जड़का १ नाम । ५ ललाटके नीचेका १ नाम । ६ वाहित्थके नीचेका १ नाम । ७ हाथीके कन्धेका १ नाम । ८ मुख आदिके बिन्दुओंका १ नाम । ९ हाथीकी बगलके २ नाम । १० हाथीके आगेका १ नाम । ११ हाथीकी जंघा तथा पिछले भागके १-१ नाम । १२ चाबुककी डंडीके २ नाम । १३ हाथीके खूँटेका १ नाम । १४ जंजीरके ३ नाम । १५ अंकुशके २ नाम । १६ हाथीकी कमरकी रस्सीके ३ नाम । १७ हाथीको सजानेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥४२॥
[2]वीतं त्वसारं [3]हस्त्यश्वं वारी तु गजबन्धनी।
[4]घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ॥४३॥
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः।
[5]आजानेयाः कुलीनाः स्युर्[6]विनीताः साधुवाहिनः ॥४४॥
[7]वनायुजाः पारसीकाः काम्बोजा वाह्लिका हयाः।
[8]ययुरश्वोऽश्वमेधीयो [9]जवनस्तु जवाधिकः ॥४५॥
[10]पृष्ठ्यः स्थौरी [11]सितः कर्को [12]रथ्यो वोढा रथस्य यः।
[13]वालः किशोरो [14]वाम्यश्वा वडवा [15]वाडवं गणे ॥४६॥
[16]त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते।

---

१ हाथीकी पीठकी गद्दीके ५ नाम। २ निर्बल हाथी-घोड़का १ नाम। ३ गजशालाका १ नाम। ४ घोड़के १३ नाम। ५ कुलीन घोड़का १ नाम। ६ सीखे घोड़के २ नाम। ७ घोड़ोंके ३ भेद। ८ अश्वमेधके घोड़का १ नाम। ९ शीघ्र-गामी घोड़का १ नाम। १० लद्दू घोड़के २ नाम। ११ सफेद घोड़का १ नाम। १२ रथके घोड़का १ नाम। १३ बछेड़का १ नाम। १४ घोड़ीके ३ नाम। १५ घोड़के झुण्डका १ नाम। १६ घोड़की १ दिनकी मंजिलका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]कश्यं तु मध्यमश्वानां [2]हेषा ह्रेषा च निस्वनः ॥४७॥
[3]निगालस्तु गलोद्देशो [4]वृन्दे त्वश्वीयमाश्ववत् ।
[5]आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥४८॥
गतयोऽमूः पञ्च धारा [6]घोणा तु प्रोथमस्त्रियाम् ।
[7]कविका तु खलीनोऽस्त्री [8]शफं क्लीबे खुरः पुमान् ॥४९॥
[9]पुच्छोऽस्त्री लूमलांगूले [10]बालहस्तश्च बालधिः ।
[11]त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ॥५०॥
[12]याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः ।
[13]असौ पुष्परथश्चक्रयानं न समराय यत् ॥५१॥
[14]कर्णीरथः प्रवहणं डयनं च समं त्रयम् ।
[15]क्लीबेऽनः शकटोऽस्त्री [16]स्याद्गन्त्री कम्बलिवाह्यकम् ॥५२॥

---

१ घोड़ेके पिछले भागका १ नाम। २ हिनहिनाहटके २ नाम। ३ घोड़ेके गलेका १ नाम। ४ घोड़ोंके झुंडका १ नाम। ५ घोड़ेकी चालके ६ भेद। ६ घोड़ेकी नाकके २ नाम। ७ लगामके २ नाम। ८ खुरके २ नाम। ९ पूँछके ३ नाम। १० बालयुक्त पूँछके २ नाम। ११ जमीनपर घोड़के लोटनेके २ नाम। १२ रथके ३ नाम। १३ सवारीके लिए सजे रथका १ नाम। १४ जनानी गाड़ीके ३ नाम। १५ सग्गड़के २ नाम। १६ बैलगाड़ीके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]शिबिका याप्ययानं [2]स्याद्दोला प्रेङ्खादिकाः स्त्रियाम्।
[3]उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥५३॥
पाण्डुकम्बलसंवीतः [4]स्यन्दनः पाण्डुकम्बली।
रथे [5]काम्बलवास्त्राद्याः कम्बलादिभिरावृते ॥५४॥
त्रिषु द्वैपादयो [6]रथ्या रथकट्या रथव्रजे।
[7]धूः स्त्री क्लीबे यानमुखं [8]स्याद्रथाङ्गमपस्करः ॥५५॥
[9]चक्रं रथाङ्गं [10]तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्।
[11]पिण्डिका [12]नाभिरक्षाग्रकीलके तु द्वयोरणिः ॥५६॥
[13]रथगुप्तिर्वरूथो [14]ना कूबरस्तु युगन्धरः।
[15]अनुकर्षो दार्वधः [16]स्थं प्रासङ्गो ना युगान्तरम् ॥५७॥

---

१ पालके २ नाम। २ डोलीके ३ नाम। ३ बाघम्बरसे ढके रथके २ नाम। ४ सफेद कम्बलसे ढके रथका १ नाम। ५ कम्बल तथा कपड़ेसे ढके रथका १ नाम। ६ रथसमूहके २ नाम। ७ रथके अवयवके २ नाम। ८ धुराके २ नाम। ९ पहियाके २ नाम। १० हालके २ नाम। ११ नाहके २ नाम। १२ कुलावाके २ नाम। १३ बखतरदार रथके २ नाम। १४ जुएके काठका २ नाम। १५ रथके निचले काठका १ नाम। १६ जुएका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[१]सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् ।
[२]परम्परावाहनं यत्तद्वैनीतकमस्त्रियाम् ॥५८॥
[३]आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।
[४]नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥५९॥
सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ।
[५]रथिनः स्यान्दनारोहा [६]अश्वारोहास्तु सादिनः ॥६०॥
[७]भटा योधाश्च योद्धारः [८]सेनारक्षास्तु सैनिकाः ॥
[९]सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥६१॥
[१०]बलिनो ये सहस्रेण साहस्रास्ते सहस्रिणः ।
[११]परिधिस्थः परिचरः [१२]सेनानीर्वाहिनीपतिः ॥६२॥
[१३]कञ्चुको वारबाणोऽस्त्री यत्तु मध्ये सकञ्चुकाः ।
[१४]बध्नन्ति तत्सारसनमधिकाङ्गोऽथ [१५]शीर्षकम् ॥६३॥

---

१ सवारीके ५ नाम । २ पालकीरिक्साका १ नाम । ३-फीलवानके ४ नाम । ४ गाड़ीवानके ८ नाम । ५ रथपर सवार योधाके २ नाम । ६ घुड़सवारके २ नाम । ७ योधाके ३ नाम । ८ सेनारक्षकके २ नाम । ९ सैनिकके २ नाम । १० हजार सैनिकोंके अफसरका २ नाम । ११ सूबेदारके २ नाम । १२ सेनापतिके २ नाम । १३ जिरहबखतरके २ नाम । १४ कमरपेटीके २ नाम । १५ टोपके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

शीर्षण्यं च शिरस्त्रेऽथ [1]तनुत्रं वर्म दंशनम् ।
उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥६४॥
[3]आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ।
सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥६५॥
त्रिष्वामुक्तादयो [3]वर्मभृतां कावचिकं गणे ।
[4]पदातिपत्तिपदगपादातिकपदातयः ॥६६॥
पद्गश्च पदिकश्चाथ [5]पादातं पत्तिसंहतिः ।
[6]शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ॥६७॥
[7]कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् ।
[8]अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः ॥६८॥
[9]धन्वी धनुष्मान्धानुष्को निषङ्ग्यस्त्री धनुर्धरः ।
स्यात्काण्डवांस्तु काण्डीरः [11]शाक्तीकः शक्तिहेतिकः ॥६९॥

---

१ कवचके ७ नाम । २ कवच पहने सैनिकके ६ नाम । ३ कवचधारियोंके झुण्डका १ नाम । ४ पैदल सैनिकके ७ नाम । ५ पैदल सैनिकोंके समूहके २ नाम । ६ युद्धजीवीके ४ नाम । ७ अच्छे निशानेबाजके ३ नाम । ८ निशाना चूके हुए निशानेबाजका १ नाम । ९ धनुर्धारीके ६ नाम । १० बाणधारीके २ नाम । ११ बर्छीधारीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

१याष्टीकपारश्वधिकौ यष्टिपार्श्वधहेतिकौ।
२नैस्त्रिंशिकोऽसिहेतिः स्यात्समौ ३प्रासिककौन्तिकौ ॥७०॥
४चर्मी फलकपाणिः स्यात्५पताकी वैजयन्तिकः।
६अनुप्लवः सहायश्चानुचरोऽभिचरः समाः ॥७१॥
७पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः।
पुरोगमः पुरोगामी ८मन्दगामी तु मन्थरः ॥७२॥
९जंघालोऽतिजवस्तुल्यौ १०जंघाकरिकजांघिकौ।
११तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥७३॥
१२जय्यो यः शक्यते जेतुं १३जेयो जेतव्यमात्रके।
१४जैत्रस्तु जेता १५यो गच्छत्यलं विद्विषतः प्रति ॥७४॥

---

१ लट्ठधारी और फरसाधारीके १-१ नाम। २ तलवार बाँधनेवालेके २ नाम। ३ बल्लम और भालाधारीके १-१ नाम। ४ ढाल बाँधनेवालेके २ नाम। ५ झण्डेवालेके २ नाम। ६ सहायकके ४ नाम। ७ अगुवाके ७ नाम। ८ धीरे चलनेवालेके २ नाम। ९ तेज चलनेवालेके २ नाम। १० हरकारेके २ नाम। ११ जल्दबाजके ६ नाम। १२ जीतने योग्य शत्रुका १ नाम। १३ जीतने लायकका १ नाम। १४ जीतनेवालेके २ नाम। १५ शत्रुके सन्मुख जानेवाले वीरके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि ।
[1]ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ॥७५॥
[2]स्यादुरस्वानुरसिलो [3]रथिनो रथिको रथी ।
[4]कामङ्गाम्यनुकामीनो [5]ह्यत्यन्तीनस्तथा भृशम् ॥७६॥
[6]शूरो वीरश्च विक्रान्तो [7]जेता जिष्णुश्च जित्वरः ।
[8]सांयुगीनो रणे साधुः [9]शस्त्राजीवादयस्त्रिषु ॥७७॥
ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः ।
वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् ॥७८॥
[10]व्यूहस्तु बलविन्यासो [11]भेदा दण्डादयो युधि ।
[12]प्रत्यासारो व्यूहपार्ष्णिः [13]सैन्यपृष्ठे प्रतिग्रहः ॥७९॥
[14]एकैभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
[15]पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥८०॥

---

१ विशेष बलीके २ नाम । २ विशाल छातीवालेके २ नाम । ३ रथवालेके ३ नाम । ४ मनमाफिक चलनेवालेका १ नाम । ५ अधिक चलनेवालेका १ नाम । ६ वीरके ३ नाम । ७ विजयीके ३ नाम । ८ रणकुशलके १ नाम । ९ सेनाके ११ नाम । १० किलेबन्दीके २ नाम । ११ सेनाभेदका १ नाम । १२ व्यूहके पृष्ठभागके २ नाम । १३ सेनाके पृष्ठभागके २ नाम । १४ सेनाविशेषका १ नाम । १५ सेनाके ७ भेद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी [१]दशानीकिन्यक्षौहिण्यथ [२]सम्पदि ॥८१॥
सम्पत्तिः श्रीश्च लक्ष्मीश्च [३]विपत्त्यां विपदापदौ ।
आयु[४]धं तु प्रहरणं शस्त्रमस्त्र[५]मथास्त्रियौ ॥८२॥
धनुश्चापौ धन्वशरासनकोदण्डाकार्मुकम् ।
इष्वासोऽप्यथ [६]कर्णस्य कालपृष्ठं शरासनम् ॥८३॥
[७]कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसकौ ।
कोटि[८]र्स्याटनी गो[९]धातले ज्याघातवारणे ॥८४॥
[१०]लस्तकस्तु धनुर्मध्यं [११]मौर्वी ज्या शिञ्जिनी गुणः ।
[१२]स्यात्प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ॥८५॥
[१३]लक्षं लक्ष्यं शरव्यं च [१४]शराभ्यास उपासनम् ।

---

१ दस सेनाओंके ३ नाम । २ सम्पत्तिके ४ नाम । ३ विपत्तिके ३ नाम । ४ शास्त्रके ४ नाम । ५ धनुषके ७ नाम । ६ कर्णके धनुषका १ नाम । ७ अर्जुनके धनुषके २ नाम । ८ धनुषके कोनोंके २ नाम । ९ धनुर्धरके दस्तानेके २ नाम । १० धनुषके मध्यभागका १ नाम । ११ धनुषकी डोरीके ४ नाम । १२ धनुषधारीके पैतरोंके ५ भेद । १३ लक्ष्यके ३ नाम । १४ बाण चलाना सीखनेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पृषत्कबाणविशिखा अजिह्मगखगाऽऽशुगाः ॥८६॥
कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः ।
प्रक्ष्वेडनास्तु नाराचाः पक्षो वाजस्त्रिपूत्तरे ॥८७॥
निरस्तः प्रहिते बाणे विषाक्ते दिग्धलिप्तकौ ।
तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ॥८८॥
तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ।
कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् ॥८९॥
त्सरुः खड्गादिमुष्टौ स्यान्मेखला तन्निबन्धनम् ।
[10]फलकोऽस्त्री फलं चर्म[11] संग्राहो मुष्टिरस्य यः ॥९०॥
[12]द्रुघणो मुद्गरघनौ [13]स्यादीली करवालिका ।
[14]भिन्दिपालः सृगस्तुल्यौ [15]परिघः परिघातिनः ॥९१॥

---

१ बाणके १२ नाम। २ लोहबाणके २ नाम। ३ बाणमें लगे पंखके २ नाम। ४ छूटे हुए बाणका १ नाम। ५ विषैले बाणके ३ नाम। ६ तरकसके ६ नाम। ७ तलवारके ८ नाम। ८ तलवारकी मुठियाका १ नाम। ९ म्यानका १ नाम। १० ढालके ३ नाम। ११ ढालकी मूठका १ नाम। १२ मुद्गरके ३ नाम। १३ खाँडेके २ नाम। १४ ढेलवाँसके २ नाम। १५ परिघके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ।
[2]स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ॥९२॥
[3]वा पुंसि शल्यं शंकुर्ना [4]सर्वला तोमरोऽस्त्रियाम् ।
[5]प्रासस्तु कुन्तः [6]कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥९३॥
[7]सर्वाभिसारः सर्वौघः सर्वसन्नहनार्थकः ।
[8]लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ॥९४॥
[9]यत्सेनयाभिगमनमरौ तदभिषेणनम् ।
[10]यात्रा व्रज्याऽभिनिर्याणं प्रस्थानं गमनं गमः ॥९५॥
[11]स्यादासारः प्रसरणं [12]प्रचक्रं चलितार्थकम् ।
[13]अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः ॥९६॥
[14]वैतालिका बोधकराश्चा[15]क्रिका घाण्टिकार्थकाः ।

---

१ कुठारके ४ नाम । २ छुरीके ४ नाम । ३ बर्छीके २ नाम । ४ गँड़ासेके २ नाम । ५ भालेके २ नाम । ६ खड्ग आदिकी नोकके ४ नाम ७ सेनासंघटनके ३ नाम । ८ दशमी आदिके पर्वपर राजाको अस्त्र अर्पणका १ नाम । ९ सेना लेकर शत्रुपर चढ़ाई करनेका १ नाम । १० यात्राके ६ नाम । ११ सेनाकी फैलावके २ नाम । १२ प्रस्थित सेनाके २ नाम । १३ निर्भीकभावसे शत्रुपर चढ़ाईका १ नाम । १४ भाँटके २ नाम । १५ घण्टा बजानेवालेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[१]स्युर्मागधास्तु मगधा [२]बन्दिनः स्तुतिपाठकाः ॥९७॥
[३]संशप्तकास्तु समयात्संग्रामादनिवर्तिनः ।
[४]रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः ॥९८॥
[५]चूर्णे क्षोदः [६]समुदिञ्जपिञ्जलौ भृशमाकुले ।
[७]पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम् ॥९९॥
[८]सा वीराशंसनं युद्धभूमिर्याऽतिभयप्रदा ।
[९]अहम्पूर्वमहम्पूर्वमित्यहम्पूर्विका स्त्रियाम् ॥१००॥
[१०]आहोपुरुषिका दर्पाद्या स्यात्सम्भावनात्मनि ।
[११]अहमहमिका तु सा स्यात्परस्परं यो भवत्यहङ्कारः॥१०१॥

---

१ वंशावरी वर्णन करनेवालेके २ नाम । २ वन्दीजनके २ नाम । ३ शपथ करके रणभूमिमें जानेवाले सैनिकका १ नाम । ४ धूलके ४ नाम । ५ चूर्णके २ नाम । ६ अति भयभीत सेनाके २ नाम । ७ झंडेके ४ नाम । ८ भयावनी रणभूमिका १ नाम । ९ जिस सेनामें 'पहले मैं लड़ूंगा' कहकर उत्साह प्रकट करनेवाले सैनिक हों उसका १ नाम । १० 'मैं पुरुष हूँ' इस अभिमानसे होनेवाली लड़ाईका १ नाम । ११ 'मैं बली हूँ' यह भाव प्रकट करनेवाली लड़ाईका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च ।
शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता ॥१०२॥
वीरपानं तु यत्पानं वृत्ते भाविनि वा रणे ।
युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥१०३॥
मृधमास्कन्दनं संख्यं समीकं साम्परायिकम् ।
अस्त्रियां समरानीकरणाः कलहविग्रहौ ॥१०४॥
सम्प्रहाराभिसम्पातकलिसंस्फोटसंयुगाः ।
अभ्यामर्दसमाघातसंग्रामाभ्यागमाऽऽहवाः ॥१०५॥
समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ।
नियुद्धं बाहुयुद्धेऽथ तुमुलं रणसंकुले ॥१०६॥
क्ष्वेडा तु सिंहनादः स्यात्करिणां घटना घटा ।
क्रन्दनं योधसंरावो बृंहितं करिगर्जितम् ॥१०७॥

---

१ पराक्रमके १० नाम। २ अत्यन्त पराक्रमके २ नाम। ३ युद्धमें किये जानेवाले नशा-पानीके २ नाम। ४ युद्धके ३१ नाम। ५ हाथोंहाथ युद्धका १ नाम। ६ घोर युद्धका १ नाम। ७ वीरगर्जनके २ नाम। ८ हाथियोंकी कतारके २ नाम। ९ शत्रुको ललकारनेका १ नाम। १० हाथियोंकी चिंघाड़का २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]विस्फारो धनुषः स्वानः [2]पटहाडम्बरौ समौ ।
[3]प्रसभं तु बलात्कारो हठोऽथ [4]स्खलितं छलम् ॥१०८॥
[5]अजन्यं क्लीबमुत्पात उपसर्गः समं त्रयम् ।
[6]मूर्छा तु कश्मलं मोहोऽप्यव[7]मर्दस्तु पीडनम् ॥१०९॥
[8]अभ्यवस्कन्दनं त्वाभ्यासादनं [9]विजयो जयः ।
[10]वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ॥११०॥
[11]प्रद्रावोद्रावसन्द्रावसन्दावा विद्रवो द्रवः ।
अपक्रमोऽपयानं च [12]रणे भङ्गः पराजयः ॥१११॥
[13]पराजितपराभूतौ त्रिषु [14]नष्टतिरोहितौ ।
[15]प्रमापणं निबर्हणं निकारणं विशारणम् ॥११२॥
[16]प्रवासनं परासनं निषूदनं निहिंसनम् ।

---

१ धनुषके शब्दका १ नाम । २ संग्रामकी ध्वनिके २ नाम । ३ हठके ३ नाम । ४ धोखेके २ नाम । ५ उत्पातके ३ नाम । ६ मोहके ३ नाम । ७ तहस-नहसके २ नाम । ८ छलके साथ आक्रमणके २ नाम । ९ जीतके ३ नाम । १० वैर मिटानेके ३ नाम । ११ युद्धसे भागनेके ८ नाम । १२ हारका १ नाम । १३ हारे हुएके २ नाम । १४ छिपे हुएके २ नाम । १५ वधके ३१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ॥११३॥
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ।
निर्वापणं विशसनं मारणं प्रतिघातनम् ॥११४॥
उद्वासनप्रमथनक्रथनोज्जासनानि च ।
आलम्भपिञ्जविशरघातोन्माथवधा अपि ॥११५॥
[1]स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ॥११६॥
[2]परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।
मृतप्रमीतौ त्रिष्वेते [3]चिता चित्या चितिः स्त्रियाम् ॥११७॥
[4]कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् ।
[5]श्मशानं स्यात्पितृवनं [6]कुणपः शवमस्त्रियाम् ।११८॥
[7]प्रग्रहोपग्रहौ बन्द्यां [8]कारा स्याद्बन्धनालये ।
[9]पुंसि भूम्न्यसवः प्राणाश्चैवं [10]जीवोऽसुधारणम् ॥११९॥
[11]आयुर्जीवितकालो ना [12]जीवातुर्जीवनौषधम् ।

---

१ मौतके १० नाम । २ मरे हुएके ७ नाम । ३ चिताके ३ नाम । ४ धड़का १ नाम । ५ श्मशानके २ नाम । ६ शवके २ नाम । ७ कैदीके ३ नाम । ८ जेलका १ नाम । ९ प्राणके २ नाम । १० जीवके २ नाम । ११ जीवनके २ नाम । १२ जीवनरक्षक औषधका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

९ अथ वैश्यवर्गः ।

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।
आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ १ ॥
स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः ।
सेवा श्ववृत्तिरनृतं कृषिरुञ्छशिलं त्वृतम् ॥ २ ॥
द्वे याचितायाचितयोर्यथासंख्यं मृतामृते ।
सत्यानृतं वणिग्भावः स्यादृणं पर्युदञ्चनम् ॥ ३ ॥
उद्धारोऽर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।
याञ्चयाप्तं याचितकं निमयादापमित्यकम् ॥ ४ ॥
उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।

---

१ वैश्यके ५ नाम। २ जीविकाके ६ नाम। ३ वृत्तिभेदके ३ नाम। ४ नौकरीके २ नाम। ५ खेतीका १ नाम। ६ उञ्छवृत्तिका १ नाम। ७ माँगनेपर मिली वस्तुका १ और विना माँगे मिली वस्तुका १ नाम। ८ वाणिज्यका १ नाम। ९ ऋणके ३ नाम। १० सूदके ३ नाम। ११ माँगनेपर मिली वस्तुका १ नाम। १२ बदलेमें मिली वस्तुका १ नाम। १३ साहूकारका १ और कर्जदारका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुसीदिको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥
[2]क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः ।
[3]क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥
[4]यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि यत् ।
[5]तिल्यं तैलीनवन्माषोमाणुभंगा द्विरूपता ॥ ७ ॥
[6]मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम् ।
शाकक्षेत्रादिके शाकशाकटं शाकशाकिनम् ॥ ८ ॥
बीजाकृतं तूप्तकृष्टे [8]सीत्यं कृष्टं च हल्यवत् ।
[9]त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन् ९
[10]द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह ।
[11]द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ॥१०॥

---

१ सूदखोरके ४ नाम। २ किसानके ४ नाम। ३ धानके खेतका १ नाम। ४ जौके खेतका १ नाम। ५ तिलके खेतके २ नाम तथा उड़द, तीसी, अरवा चावल तथा भाँगके खेतके २-२ नाम। ६ मूँगके खेतके २ और कोदोके खेतका १ नाम। ७ बीज बोकर जोते जानेवाले खेतके २ नाम। ८ जोते हुए खेतके ३ नाम। ९ तीन बार जोते खेतके ४ नाम। १० दो बार जोते खेतके ५ नाम। ११ सोलह, चार एवं एक द्रोण बीज जिन खेतोंमें बोया जाय उनके १-१ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]खारीवापस्तु खारीक [2]उत्तमर्णादयस्त्रिषु ।
पुन्नपुंसकयोर्वप्रः केदारः क्षेत्र[3]मस्य तु ॥ ११ ॥
कैदारकं स्यात्कैदार्यं क्षेत्रं कैदारिकं गणे ।
[4]लोष्टानि लेष्टवः पुंसि [5]कोटिशो लोष्टभेदनः ॥ १२ ॥
प्राजनं तोदनं तोत्रं [6]खनित्रमवदारणे ।
[8]दात्रं लवित्रमाबन्धो योत्रं [9]योक्त्रमथो फलम् ॥ १३ ॥
निरीशं कुटकं फालः कृषको [11]लांगलं हलम् ।
गोदारणं च सीरोऽथ[12]शम्या स्त्री युगकीलकः ॥ १४ ॥
[13]ईषा लाङ्गलदण्डः स्यात्सीता[14] लाङ्गलपद्धतिः ।
[15]पुंसि मेधिः खले दारु न्यस्तं यत्पशुबन्धने ॥१५॥

---

१ जिस खेतमें खारी भर (१ मन ८ सेर) बीज बोया जाय उसका १ नाम । २ खेतके ३ नाम । ३ क्षेत्रसमूहके ४ नाम । ४ ढेलेके २ नाम । ५ मुँगरीके २ नाम । ६ बैल हाँकनेवाले पैनेके ३ नाम । ७ कुदालके २ नाम । ८ खुरपा, हँसुआ, फावड़ा आदिके २ नाम । ९ बैल नाथनेवाली डोरीके ३ नाम । १० हलके फालके ५ नाम । ११ हलके ४ नाम । १२ जुएमें लगनेवाली कील (सैल) के २ नाम । १३ हरिसके २ नाम । १४ कूँड़के २ नाम । १५ खलिहानमें पशु बाँधनेके लिए गड़े खूँटेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आशुर्व्रीहिः पाटलः [2]स्याच्छितशूकयवौ समौ ।
[3]तोक्मस्तु तत्र हरितं [4]कलायस्तु सतीनकः ॥१६॥

हरेणुखण्डिकौ चास्मिन्[5]कोरदूषस्तु कोद्रवः ।
मङ्गल्यको [6]मसूरोऽथ [7]मकुष्टकमयुष्टकौ ॥१७॥

वनमुद्गो [8]सर्षपे तु द्वौ तन्तुभकदम्बकौ ।
[9]सिद्धार्थस्त्वेष,धवलो [10]गोधूमः सुमनः समौ ॥१८॥

[11]स्याद्यावकस्तु [12]कुल्माषश्चणको हरिमन्थकः ।
[13]द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ॥१९॥

[14]क्षवः क्षुताभिजननो राजिका कृष्णिकासुरी ।
[15]स्त्रियौ कंगुप्रियंगू द्वे [16]अतसी स्यादुमा क्षुमा ॥२०॥

---

१ साठी धनके ३ नाम। २ जौके २ नाम। ३ हरे जौके २ नाम। ४ मटरके ४ नाम। ५ कोदोंके २ नाम। ६ मसुरके २ नाम। ७ मोठके ३ नाम। ८ सरसोंके ३ नाम। ९ सफेद सरसोंका १ नाम। १० गेहूँके २ नाम। ११ कुलथीके २ नाम। १२ चनेके २ नाम। १३ बाँझ तिलके २ नाम। १४ राईके ५ नाम। १५ ककुनीके २ नाम। १६ तीसीके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]मातुलानी तु भङ्गायां [2]व्रीहिभेदस्त्वणुः पुमान् ।
[3]किंशारुः सस्यशूकं स्यात्[4]कणिशं सस्यमञ्जरी ॥२१॥
[5]धान्यं व्रीहिः स्तम्बकरिः [6]स्तम्बो गुच्छस्तृणादिनः ।
[7]नाडी नालं च काण्डोऽस्य [8]पलालोऽस्त्री सनिष्फलः ॥२२॥
[9]कडङ्गरो बुसं क्लीवे [10]धान्यत्वचि तुषः पुमान् ।
[11]शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे [12]शमी शिम्बा त्रिषूत्तरे ॥२३॥
[13]ऋद्धमावसितं धान्यं [14]पूतं तु बहुलीकृतम् ।
[15]माषादयः शमीधान्ये [16]शूकधान्ये यवादयः ॥२४॥
[17]शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी ।

---

१ भाँगके २ नाम। २ सावाँके २ नाम। ३ जौ-धान आदिके टूँडके २ नाम। ४ धान आदिके बालके २ नाम। ५ धानके ३ नाम। ६ जौ आदि गुच्छोंके २ नाम। ७ गुच्छोंके डंठलके २ नाम। ८ पुआलके २ नाम। ९ भूसेके २ नाम। १० भूसीका १ नाम। ११ धानके टूँडका १ नाम। १२ उड़द-मटर आदिकी छीमीके २ नाम। १३ पुआलसे निकले धानके २ नाम। १४ ओसाये धानके दो नाम। १५ शमीधान्यका १ नाम। १६ शूकधान्यका १ नाम। १७ शालिधान्यके भेद।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

¹तृणधान्यानि नीवाराः ²स्त्री गवेधुर्गवेधुका ॥२५॥
³अयोग्रं मुसलोऽस्त्री ⁴स्यादुदूखलमुलूखलम् ।
⁵प्रस्फोटनं शूर्पमस्त्री ⁶चालनी तितउः पुमान् ॥२६॥
⁷स्यूतप्रसेवौ ⁸कण्डोलपिटौ ⁹कटकिलिञ्जकौ ।
समानौ ¹⁰रसवत्यां तु पाकस्थानमहानसे ॥२७॥
¹¹पौरोगवस्तदध्यक्षः ¹²सूपकारास्तु बल्लवाः ।
आरालिका आन्धसिकाः सूदा औदनिका गुणाः ॥२८॥
¹³आपूपिकः कान्दविको भक्ष्यकार इमे त्रिषु ।
¹⁴अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका ॥२९॥
¹⁵अङ्गारधानिकाऽङ्गारशकट्यपि हसन्त्यपि ।
हसन्यप्यथ न स्त्री ¹⁶स्यादङ्गारोऽलातमुल्मुकम् ॥३०॥

---

१ तिन्नी-साँवाँ आदिका १ नाम। २ मुन्यन्नविशेषके २ नाम। ३ मूसलके २ नाम। ४ ओखलीके २ नाम। ५ सूपके २ नाम। ६ चलनीके २ नाम। ७ बोरेके २ नाम। ८ टोकरीके २ नाम। ९ चटाईके २ नाम। १० रसोईघरके ३ नाम। ११ बड़े रसोईदारके २ नाम। १२ रसोइएके ७ नाम। १३ पुआ बनानेवालेके ३ नाम। १४ चूल्हेके ५ नाम। १५ अँगीठीके ४ नाम। १६ अंगारके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]क्लीबेऽम्बरीषं भ्राष्ट्रो ना [2]कन्दुर्वा स्वेदनी स्त्रियाम् ।
[3]अलिञ्जरः स्यान्मणिकः [4]कर्कर्यालुर्गलन्तिका ॥३१॥
[5]पिठरः स्थाल्युखा कुण्डं [6]कलशस्तु त्रिषु द्वयोः ।
[7]घटः कुटनिपावस्त्री [8]शरावो वर्धमानकः ॥३२॥
ऋजीषं [9]पिष्टपचनं [10]कंसोऽस्त्री पानभाजनम् ।
[11]कुतूः कृत्तेः स्नेहपात्रं [12]सैवाल्पा कुतुपः पुमान् ॥३३॥
[13]सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम् ।
[14]दर्विः कम्बिः खजाका च [15]स्यात्तर्दूर्दारुहस्तकः ॥३४॥
[16]अस्त्री शाकं हरितकं [17]शिग्रुरस्य तु नाडिका ।
कलम्बश्च कडम्बश्च [18]वेषवार उपस्करः ॥३५॥

---

१ लुआठीके २ नाम । २ भाड़के २ नाम । ३ कड़ाहीके २ नाम । ४ मटकेके २ नाम । ५ कठौतेके २ नाम । ६ बटलोईके ४ नाम । ७ गगरेके ४ नाम । ८ कसोरेके २ नाम । ९ तवेके २ नाम । १० कटोरीके २ नाम । ११ कुप्पेका १ नाम । १२ कुप्पीका १ नाम । १३ बरतनके ५ नाम । १४ कलछुलके ३ नाम । १५ काठकी कलछुलके २ नाम । १६ सागके ३ नाम । १७ सागके डंठलके ३ नाम । १८ शाकमें पड़नेवाले मसालेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]तिन्तिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लजम् ।
[2]मरीचं कोलकं कृष्णमूषणं धर्मपत्तनम् ॥३६॥
जीरको जरणोऽजाजी कणा [3]कृष्णे तु जीरके ।
सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका ॥३७॥
[4]आर्द्रकं शृङ्गवेरं स्यादथ [5]छत्रा वितुन्नकम् ।
कुस्तुम्बरु च धान्याकमथ [6]शुण्ठी महौषधम् ॥३८॥
स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ।
[7]आरनालकसौवीरकुल्माषाभिषुतानि च ॥३९॥
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके ।
[8]सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम् ॥४०॥
[9]तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ।
[10]निशाख्या[11] काञ्चनी पीता हरिद्रा वरवर्णिनी ॥४१॥
[12]सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ।

---

१ अमचुरके ३ नाम । २ काली मिर्चके ६ नाम । ३ जीरेके ४ नाम । ४ काले जीरेके ६ नाम । ५ आदीके २ नाम । ६ धनियाके ४ नाम । ७ सोंठके ५ नाम । ८ काँजीके ७ नाम । ९ हींगके ५ नाम । १० हिंगुवृक्षकी पत्तीके ५ नाम । ११ हल्दीके ५ नाम । १२ समुद्री नमकके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सैन्धवोऽस्त्री शीतशिवं मणिमन्थं च सिन्धुजे ॥४२॥
रौमकं वसुकं [2]पाक्यं विडं च कृतके द्वयम् ।
सौवर्चलेऽक्षरुचके तिलकं तत्र मेचके ॥४३॥
मत्स्यण्डी फाणितं खण्डविकारः शर्करा सिता ।
कूर्चिका क्षीरविकृतिः स्याद्रसाला तु मार्जिता ॥४४॥
[10]स्यात्तेमनं तु निष्ठानं त्रिलिङ्गा वासितावधेः ।
[11]शूलाकृतं भटित्रं स्याच्छूल्यमुख्यं[12] तु पैठरम् ॥४५॥
[13]प्रणीतमुपसम्पन्नं [14]प्रयस्तं स्यात्सुसंस्कृतम् ।
स्यात्पिच्छिलं[15] तु विजिलं [16]सम्मृष्टं शोधितं समे ॥४६॥

---

१ सेंधा नमकके ४ नाम । २ साँभर नोनके २ नाम । ३ खारी नमकके २ नाम । ४ सोंचल नमकके ३ नाम । ५ काले नमकका १ नाम । ६ रावके २ नाम । ७ मिश्रीके २ नाम । ८ खोयेके २ नाम । ९ सिखरनके १ नाम । १० कढ़ीके २ नाम । ११ कवावके ३ नाम । १२ यटलोईमें पके मांसके २ नाम । १३ तैयार रसोईके २ नाम । १४ प्रयत्न करके बनाये पकवानके २ नाम । १५ पनिहालो रसोईके २ नाम । १६ बीनकर साफ किये अन्नके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते ।
आपक्वं पौलिरभ्यूषो लाजाः पुम्भूम्नि चाक्षताः ॥४७॥
पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः ।
पूपोऽपूपः पिष्टकः स्यात्करम्भो दधिसक्तवः ॥४८॥
भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ।
[10]भिस्सटा दग्धिका [11]सर्वरसाग्रे मण्डमस्त्रियाम् ॥४९॥
[12]मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ।
[13]यवागूरुष्णिका श्राणा विलेपी तरला च सा ॥५०॥
[14]म्रक्षणाभ्यञ्जने तैलं [15]कृसरस्तु तिलौदनः ।
[16]गव्यं त्रिषु गवां सर्वं [17]गोविट् गोमयमस्त्रियाम् ॥५१॥
[18]तत्तु शुष्कं करीषोऽस्त्री [19]दुग्धं क्षीरं पयः समम् ।

---

१ चिकनेके ३ नाम। २ छौंकी चीजके २ नाम। ३ तली हुई चीजके २ नाम। ४ लावाका १ नाम। ५ चिउड़ेके २ नाम। ६ भुने जौ (बहुरी) के २ नाम। ७ पुएके ३ नाम। ८ दहीसे सने सत्तूके २ नाम। ९ भातके ६ नाम। १० जले अन्नके २ नाम। ११ माड़का १ नाम। १२ भातसे निकले माड़के ३ नाम। १३ पतले भातके ५ नाम। १४ तेलके २ नाम। १५ खिचड़ीके २ नाम। १६ गौसे उत्पन्न वस्तुका १ नाम। १७ गोबरके २ नाम। १८ कंडेके २ नाम। १९ दूधके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

पैयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरत् ॥५२॥
घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतम् ।
तत्तु हैयङ्गवीनं यद्ध्योगोदोहोद्भवं घृतम् ॥५३॥
दण्डाहतं कालशेयमरिष्टमपि गोरसः ।
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥५४॥
मण्डं दधिभवं मस्तु पीयूषोऽभिनवं पयः ।
[10]अशनाया बुभुक्षा क्षुद्[11]ग्रासस्तु कवलः पुमान् ॥५५॥
[12]सपीतिः स्त्री तुल्यपानं [13]सग्धिः स्त्री सहभोजनम् ।
[14]उदन्या तु पिपासा तृट् तर्षो [15]जग्धिस्तु भोजनम् ॥५६॥
जेमनं लेह आहारो निघासो न्याद इत्यपि ।

---

१ दूधसे बनी वस्तुका १ नाम। २ पतले दहीका १ नाम। ३ घीके ४ नाम। ४ मक्खनके २ नाम। ५ एक दिन पहलेके दूधसे निकले घीका २ नाम। ६ मट्ठेके ४ नाम। ७ एक चौथाई पानी मिले मट्ठेका १ नाम। ८ दहीके तोडका १ नाम। ९ पेउस दूधका १ नाम। १० भूखके ३ नाम। ११ कौरके २ नाम। १२ साथ पी जानेवाली वस्तुके २ नाम। १३ एक साथ भोजनके २ नाम। १४ प्यासके ४ नाम। १५ भोजनके ७ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]सौहित्यं तर्पणं तृप्तिः फेलं[2] भुक्तसमुज्झितम् ॥५७॥
[3]कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।
[4]गोपे गोपालगोसंख्यगोधुगाभीरवल्लवाः ॥५८॥
[5]गोमहिष्यादिकं पादबन्धनं [6]द्वौ गवीश्वरे ।
गोमान्[7]गोमी गोकुलं तु गोधनं स्याद्गवां व्रजे ॥५९॥
[8]त्रिष्वाशितङ्गवीनं तद्गावो यत्राशिताः पुरा ।
[9]उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥६०॥
अनड्वान्सौरभेयो गौ[10]रुक्ष्णां संहतिरौक्षकम् ।
[11]गव्या गोत्रा गवां [12]वत्सधेन्वोर्वात्सकधैनुके ॥६१॥
[13]वृषो महान्महोक्षः स्याद्[14]वृद्धोक्षस्तु जरद्गवः ।

---

१ तृप्तिके ३ नाम । २ जूठनका १ नाम । ३ इच्छाके ६ नाम । ४ ग्वालेके ६ नाम । ५ गाय-भैंस आदि चौपायोंका १ नाम । ६ गायके मालिकके २ नाम । ७ गायोंके झुंडके २ नाम । ८ जहाँ पहले कभी गैया खिलायी गयी हो, उस स्थानका १ नाम । ९ बैलके ९ नाम । १० वृषभसमूहका १ नाम । ११ गोसमुदायके २ नाम । १२ बछड़ोंके झुण्डका १ और गायोंके झुण्डका १ नाम । १३ बड़े बैलका १ नाम । १४ बूढ़े बैलके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

उत्पन्न उक्षा जातोक्षः सद्योजातस्तु तर्णकः ॥६२॥
शकृत्करिस्तु वत्सः स्याद्दम्यवत्सतरौ समौ ।
आर्षभ्यः षण्डतायोग्यः षण्डो गोपतिरिट्चरः ॥६३॥
स्कन्धदेशे त्वस्य वहः सास्ना तु गलकम्बलः ।
स्यान्नस्तितस्तु नस्योतः प्रष्ठवाड् युगपार्श्वगः ॥६४॥
युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः ।
खनति तेन तद्वोढास्येदं हालिकसैरिकौ ॥६५॥
धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः ।
उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६६ ॥
स तु सर्वधुरीणः स्याद्यो वै सर्वधुरावहः ।

---

१ युवा बछड़ेका १ नाम । २ तुरन्त उत्पन्न बछड़ेका १ नाम । ३ बछड़ेके २ नाम । ४ नौजवान बछड़ेके २ नाम । ५ बधिया करने योग्य बछड़ेका १ नाम । ६ साँड़के ३ नाम । ७ बैलके कन्धेका १ नाम । ८ गलेके चमड़ेके २ नाम । ९ नाथे बैलके २ नाम । १० बैलको साधनेवाले जुएके २ नाम । ११ बैलोंके ३ भेद । १२ खेत जोतनेवाले बैलके २ नाम । १३ बोझा ढोनेवाले बैलके ५ नाम । १४ लद्दू बैलके ३ नाम । १५ सब प्रकारके बोझ ढोनेवाले बैलके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥६७॥
अर्जुन्यघ्न्या रोहिणी स्यादुत्तमा गोषु नैचिकी ।
वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ॥६८॥
द्विहायनी द्विवर्षा गौरेकाब्दा त्वेकहायनी ।
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायनी ॥६९॥
वशा वन्ध्याऽवतोका तु स्रवद्गर्भाऽथ "सन्धिनी ।
आक्रान्ता वृषभेणाथ" वेहद्गर्भोपघातिनी ॥७०॥
"काल्योपसर्या प्रजने "प्रष्ठौही बालगर्भिणी ।
"स्यादचण्डी तु सुकरा "बहुसूतिः परेष्टुका ॥७१॥

---

१ गायके ६ नाम । २ उत्तम गौका १ नाम । ३ गायके रंगभेद । ४ दो वर्षकी गायके २ नाम । ५ एक वर्षकी गायका १ नाम । ६ चार वर्षकी गायके २ नाम । ७ तीन वर्षकी गायके २ नाम । ८ बाँझ गौके २ नाम । ९ जिसका गर्भ गिर गया हो, उस गायका १ नाम । १० गाभिन गौका १ नाम । ११ साँडके संसर्गसे गर्भ गिरा देनेवाली गायका १ नाम । १२ बरदाने योग्य गायका १ नाम । १३ बालगर्भिणी गायका १ नाम । १४ सीधी गायके २ नाम । १५ बहुत बार ब्यायी गायके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]चिरप्रसूता बष्कयणी [2]धेनुः स्यान्नवसूतिका।
[3]सुव्रता सुखसन्दोह्या [4]पीनोध्नी पीवरस्तनी ॥७२॥
[5]द्रोणक्षीरा द्रोणदुग्धा [6]धेनुष्या बन्धके स्थिता।
[7]समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥७३॥
[8]ऊधस्तु क्लीबमापीनं [9]समौ शिवककीलकौ।
[10]न पुंसि दाम सन्दानं [11]पशुरज्जुस्तु दामनी ॥७४॥
[12]वैशाखमन्थमन्थानमन्थानो मन्थदण्डके।
[13]कुठरो दण्डविष्कम्भो [14]मन्थनी गर्गरी समे ॥७५॥

---

१ बहुत दिनकी ब्यायी गौके २ नाम। २ नयी ब्यायी गायके २ नाम। ३ आरामसे दुही जानेवाली गायके २ नाम। ४ मोटे स्तनवाली गायके २ नाम। ५ द्रोण (१२ सेर) दूध देनेवाली गायके २ नाम। ६ गिरवी रखी गायका १ नाम। ७ हर साल ब्यानेवाली गायका १ नाम। ८ गायके थनके २ नाम। ९ खूँटेके २ नाम। १० पगहाके २ नाम। ११ जिसमें बहुतसे पशु एक साथ बँधें उस रस्सीके २ नाम। १२ मन्थनदण्डके २ नाम। १३ मन्थनदण्डके खम्भेके १ नाम। १४ दहीके पात्रके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]उष्ट्रे क्रमेलकमयमहाङ्गाः [2]करभः शिशुः ।
[3]करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥७६॥
[4]अजा छागी [5]शुभच्छागबस्तच्छगलका अजे ।
[6]मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ॥७७॥
[7]उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।
चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः ॥७८॥
[8]वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् ।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ॥७९॥
[9]विक्रेता स्याद्विक्रयिकः [10]क्रायकक्रयिकौ समौ ।
[11]वाणिज्यं तु वणिज्या [12]स्यान्मूल्यं वस्नोऽप्यवक्रयः ॥८०॥
[13]नीवी परिपणो मूलधने [14]लाभोऽधिकं फलम् ।

---

१ ऊँटके ४ नाम । २ ऊँटके बच्चेका १ नाम । ३ जिस बच्चेका पैर बाँधा जाय, उसका १ नाम । ४ बकरीके २ नाम । ५ बकरेके ५ नाम । ६ मेढ़ेके ७ नाम । ७ ऊँट, मेढ़े और बकरेके समुदायका १-१ नाम । ८ बनियेके ८ नाम । ९ विक्रेताके २ नाम । १० खरीदारके २ नाम । ११ व्यापारके २ नाम । १२ दामके ३ नाम । १३ पूँजीके ३ नाम । १४ लाभका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

परिदानं परीवर्त्तो नैमेयनिमयावपि ॥८१॥
पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणम् ।
क्रये प्रसारितं क्रय्यं क्रेयं क्रेतव्यमात्रके ॥८२॥
विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिपु ।
क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियाम् ॥८३॥
विपणो विक्रयः संख्याः संख्येये ह्यादश त्रिपु ।
विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥८४॥
संख्यार्थे द्विबहुत्वे स्तस्तासु चानवतेः स्त्रियः ।
पंक्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् ॥८५॥
यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।
मानं तुलांगुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥८६॥
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ।

---

१ लेनदेनके ४ नाम । २ धरोहरके २ नाम । ३ धरोहर लौटानेका १ नाम । ४ विक्रयके लिए फैलायी वस्तुका १ नाम । ५ खरीदी जानेवाली वस्तुका १ नाम । ६ बिकाऊ चीजके ३ नाम । ७ बयानाके ३ नाम । ८ बिक्रीके २ नाम । ९ तौलके ३ नाम । १० मानभेद । ११ माशाका १ नाम । १२ कर्षके २ नाम । १३ चार कर्षका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

सुवर्णबिस्तौ हेम्नोऽक्षे कुरुबिस्तस्तु तत्पले ॥८७॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ।
आचितो दश भाराः स्युः शाकटो भार आचितः ॥८८॥
कार्षापणः कार्षिकः स्यात्कार्षिके ताम्रिके पणः ।
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥८९॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।
[10]पादस्तुरीयो भागः [11]स्यादंशभागौ तु वण्टके ॥९०॥
[12]द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥९१॥
[13]स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते ।
[14]ताभ्यां यदन्यत्तत्कुप्यं [15]रूप्यं तद्द्वयमाहतम् ॥९२॥

---

१ एक कर्षके सुवर्णका २ नाम। २ एक पल सुवर्णका १ नाम। ३ सौ पलका १ नाम। ४ बीस तुलाका १ नाम। ५ दस भारका १ नाम। ६ बैलगाड़ीके बोझका १ नाम। ७ कर्ष भर चाँदीके सिक्केका २ नाम। ८ कर्षभर तांबेके सिक्केका १ नाम। ९ आढक द्रोण आदि ६ भेद। १० चौथाईका १ नाम। ११ अंशके ३ नाम। १२ धनके १३ नाम। १३ सोने-चाँदीके २ नाम। १४ अन्य धातुओंका १ नाम। १५ ताँबा और रूपाके मेलका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।
[2]शोणरत्नं लोहितकः पद्मरागोऽथ[3] मौक्तिकम् ॥ ९३ ॥
मुक्ताऽथ[4] विद्रुमः पुंसि प्रवालं पुन्नपुंसकम् ।
[5]रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥९४॥
[6]स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥९५॥
चामीकरं जातरूपं महारजतकाञ्चने ।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥९६॥
[7]अलङ्कारसुवर्णं यच्छृङ्गीकनकमित्यदः ।
[8]दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥९७॥
[9]रीतिः स्त्रियामारकूटो न स्त्रियामथ [10]ताम्रकम् ।
शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ॥९८॥
[11]लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
[12]अश्मसारोऽथ मण्डूरं सिंहाणमपि तन्मले ॥९९॥

---

१ मरकत मणिके ४ नाम। २ माणिक्यके ३ नाम। ३ मोतीके २ नाम। ४ मूँगेके २ नाम। ५ मणियोंके २ नाम। ६ सुवर्णके १९ नाम। ७ सोनेके गहनेका १ नाम। ८ चाँदीके ५ नाम। ९ पीतलके २ नाम। १० तामेके ६ नाम। ११ लोहेके ७ नाम। १२ लोहके मैलके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

सर्वं च तैजसं [1]लोहं [2]विकारस्त्वयसः कुशी।
[3]क्षार: काचोऽथ [4]चपलो रसः सूतश्च पारदे ॥१००॥
[5]गवलं माहिषं शृङ्गम[6]भ्रकं गिरिजामले।
[7]स्रोतोञ्जनं तु सौवीरं कापोताञ्जनयामुने ॥१०१॥
[8]तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके।
[9]कर्परी दार्विकाक्वाथोद्भवं तुत्थं [10]रसाञ्जनम् ॥१०२॥
रसगर्भं तार्क्ष्यशैलं [11]गन्धाश्मनि तु गन्धिकः।
सौगन्धिकश्च [12]चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥१०३॥
[13]रीतिपुष्पं पुष्पकेतु पुष्पकं कुसुमाञ्जनम्।
[14]पिञ्जरं पीतनं तालमालं च हरितालके ॥१०४॥
[15]गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु।
[16]बोलगन्धरसप्राणपिण्डगोपरसाः समाः ॥१०५॥

---

१ धातुमात्रका १ नाम। २ लोहके फालका १ नाम। ३ काँचके २ नाम। ४ पारेके ४ नाम। ५ भैंसेकी सींगका १ नाम। ६ अबरखके ३ नाम। ७ सुरमेके ४ नाम। ८ तूतियाके ४ नाम। ९ तूतियाके ४ भेद। १० रसौतके ३ नाम। ११ गन्धकके ३ नाम। १२ काले सुरमेके ३ नाम। १३ तपाये पीतलके अंजनके ४ नाम। १४ हरितालके ५ नाम। १५ शिलाजीतके ५ नाम। १६ गन्धरसके ५ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]डिण्डीरोऽब्धिकफः फेनः [2]सिन्दूरं नागसम्भवम् ।
[3]नागसीसकयोगेष्टवप्राणि [4]त्रपु पिच्चटम् ॥१०६॥
रङ्गवङ्गे अथ [5]पिचुस्तूलोऽथ [6]कमलोत्तरम् ।
स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥१०७॥
मेषकम्बल [7]ऊर्णायुः [8]शशोर्णं शशलोमनि ।
[9]मधु क्षौद्रं माक्षिकादि [10]मधूच्छिष्टं तु सिक्थकम् ॥१०८॥
[11]मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला [12]यवक्षारो यवाग्रजः ॥१०९॥
पाक्योऽथ [13]सर्जिकाक्षारः कापोतः सुखवर्चकः ।
[14]सौवर्चलं स्याद्रुचकं [15]त्वक्क्षीरी वंशरोचना ॥११०॥
[16]शिग्रुजं श्वेतमरिचं [17]मोरटं मूलमैक्षवम् ।

---

१ समुद्रफेनके ४ नाम । २ सिन्दूरके ३ नाम । ३ सीसाके ४ नाम । ४ राँगेके ४ नाम । ५ रुईके २ नाम । ६ कुसुम्भके ४ नाम । ७ कम्बलके २ नाम । ८ खरगोशके ऊनके २ नाम । ९ शहदके ३ नाम । १० मोमके २ नाम । ११ मैनसिलके ७ नाम । १२ जवाखारके ३ नाम । १३ सज्जीके ३ नाम । १४ सोंचल खारके २ नाम । १५ वंशलोचनके २ नाम । १६ सफेद मिर्चके २ नाम । १७ ऊँखकी जड़का १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

ग्रन्थिकं पिप्पलीमूलं चटिकाशिर इत्यपि ॥१११॥
गोलोमी भूतकेशो ना पत्राङ्गं रक्तचन्दनम्।
त्रिकटु त्र्यूषणं व्योषं त्रिफला तु फलत्रिकम् ॥११२॥

इति वैश्यवर्गः।

१० अथ शूद्रवर्गः।

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः।
आचण्डालात्तु सङ्कीर्णा अम्बष्ठकरणादयः ॥१॥
शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः।
शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः ॥२॥

---

१ पिपरामूलके ३ नाम। २ जटामासीके २ नाम। ३ पतंगके २ नाम। ४ त्रिकटुके ३ नाम। ५ त्रिफलाके २ नाम। ६ शूद्रके ४ नाम। ७ चण्डाल और संकीर्ण जातिके १-१ नाम। ८ शूद्रा स्त्री और वैश्य पुरुषके पुत्रका १ नाम। ९ वैश्या स्त्री और विप्र पुरुषके पुत्रका १ नाम। १० शूद्रा स्त्री और क्षत्रिय पुरुषके पुत्रका १ नाम। ११ क्षत्रिया स्त्री और वैश्य पुरुषके पुत्रका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

माहिषोऽर्याक्षत्रिययोः [2]क्षत्ताऽर्याशूद्रयोः सुतः।
[3]ब्राह्मण्यां क्षत्रियात्सूतस्[4]तस्यां वैदेहको विशः ॥३॥
[5]रथकारस्तु माहिष्यात्करण्यां यस्य सम्भवः।
[6]स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥४॥
[7]कारुः शिल्पी [8]संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः।
[9]कुलकः स्यात्कुलश्रेष्ठी [10]मालाकारस्तु मालिकः ॥५॥
[11]कुम्भकारः कुलालः स्यात्पलगण्डस्तु[12] लेपकः।
[13]तन्तुवायः कुविन्दः स्यात्तुन्नवायस्तु[14] सौचिकः ॥६॥
[15]रङ्गाजीवश्चित्रकरः [16]शस्त्रमार्जोऽसिधावकः।

---

१ वैश्य स्त्री और क्षत्रिय पुरुषके पुत्रका १ नाम। २ वैश्य स्त्री और शूद्र पुरुषके पुत्रका १ नाम। ३ ब्राह्मणीमें क्षत्रियसे उत्पन्न पुत्रका १ नाम। ४ ब्राह्मणीमें वैश्यसे उत्पन्न पुत्रका १ नाम। ५ करणी स्त्रीमें वैश्यसे उत्पन्न सन्ततिका १ नाम। ६ ब्राह्मणीमें शूद्रसे उत्पन्न पुत्रका १ नाम। ७ कारीगरके २ नाम। ८ शिल्पियोंके समुदायका १ नाम। ९ शिल्पियोंके अध्यक्षका १ नाम। १० मालीके २ नाम। ११ कुम्हारके २ नाम। १२ पुताईका काम करनेवालेके २ नाम। १३ जुलाहेके २ नाम। १४ दरजीके २ नाम। १५ रंगरेजके २ नाम। १६ शस्त्र साफ करनेवालेके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[1]पादूकृच्चर्मकारः स्याद्[2]व्योकारो लोहकारकः ॥ ७ ॥
[3]नाडिन्धमः स्वर्णकारः कलादो रुक्मकारकः ।
स्याच्छाङ्खिकः[4] काम्बविकः शौल्विकः[5]स्ताम्रकुट्टकः ॥८॥
[6]तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट् ।
[7]ग्रामाधीनो ग्रामतक्षः कौटतक्षो[8]ऽनधीनकः ॥ ९ ॥
[9]क्षुरी मुण्डी दिवाकीर्तिर्नापितान्तावसायिनः ।
[10]निर्णेजकः स्याद्रजकः [11]शौण्डिको मण्डहारकः ॥१०॥
[12]जाबालः स्यादजाजीवो [13]देवाजीवस्तु देवलः ।
[14]स्यान्माया शाम्बरी [15]मायाकारस्तु प्रतिहारकः ॥११॥
[16]शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः ।

---

१ चमारके २ नाम । २ लोहारके २ नाम । ३ सोनारके ४ नाम । ४ मनिहारके २ नाम । ५ ठठेरेके २ नाम । ६ बढ़ईके ५ नाम । ७ ग्रामीण बढ़ईके २ नाम । ८ स्वतन्त्र बढ़ईके २ नाम । ९ नाईके ५ नाम । १० धोबीके २ नाम । ११ कलवारके २ नाम । १२ गडेरियेके २ नाम । १३ पण्डेके २ नाम । १४ नजरबन्दीके २ नाम । १५ मदारीके २ नाम । १६ नटके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

भरता इत्यपि नटाश्चारणास्तु कुशीलवाः ॥१२॥
[1]मार्दङ्गिका मौरजिकाः [2]पाणिवादास्तु पाणिघाः ।
[3]वेणुध्माः स्युर्वैणविका [4]वीणावादास्तु वैणिकाः ॥१३॥
[5]जीवान्तकः शाकुनिको [6]द्वौ वागुरिकजालिकौ ।
[7]वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥१४॥
[8]भृतको भृतिभुक्कर्मकरो वैतनिकोऽपि सः ।
[10]वार्तावहो वैदधिको [11]भारवाहस्तु भारिकः ॥१५॥
[12]विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥१६॥
[13]भृत्ये दासेरदासेयदासगोप्यकचेटकाः ।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥१७॥
[14]पराचितपरास्कन्दपरजातपरैधिताः ।

---

१ वन्दीजनके २ नाम । २ मृदंग बजानेवालेके २ नाम । ३ ताली बजानेबालेके २ नाम । ४ वंशी बजानेवालेके २ नाम । ५ वीणावादकके २ नाम । ६ चिड़ीमारके २ नाम । ७ बहेलियेके २ नाम । ८ कसाईके ३ नाम । ६ मजदूरके ४ नाम । १० सन्देशियाके २ नाम । ११ बोझा ढोनेवालेके २ नाम । १२ नीचके १० नाम । १३ सेवकके ११ नाम । १४ पराई कमाईपर जीनेवालेके ४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

In Public Domain. Digitization by eGangotri

[1]मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ॥१८॥
[2]दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च ।
[3]चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमाः ॥१९॥
निषादश्वपचावन्तेवासिचण्डालपुक्कसाः ।
[4]भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ॥२०॥
[5]व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ।
[6]कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥२१॥
शुनको भषकः श्वा [7]स्यादलर्कस्तु स योगितः ।
[8]श्वा विश्वकद्रुर्मृगयाकुशलः [9]सरमा शुनी ॥२२॥
[10]विट्चर सूकरो ग्राम्यो [11]वर्करस्तरुणः पशुः ।
[12]आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ॥२३॥
[13]दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ।

---

१ आलसीके ६ नाम। २ चतुरके ५ नाम। ३ चण्डालके १० नाम। ४ चण्डालके ३ भेद। ५ मृगवधिकके ४ नाम। ६ कुत्तेके ७ नाम। ७ शिकारमें उन्मत्त कुत्तेका १ नाम। ८ शिकारी कुत्तेके २ नाम। ९ कुतियाके २ नाम। १० गाँवके सुअरके २ नाम। ११ जवान पशुका १ नाम। १२ शिकारके ४ नाम। १३ दहिने अंगमें घायल मृगका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]चौरैकागारिकस्तेनदस्युतस्करमोषकाः ॥२४॥
प्रतिरोधिपराास्कन्दिपाटच्चरमलिम्लुचाः ।
[2]चौरिका स्तैन्यचौर्ये च स्तेयं [3]लोप्त्रं तु तद्धने ॥२५॥
[4]वीतसंस्तूपकरणं बन्धने मृगपक्षिणाम् ।
[5]उन्माथः कूटयन्त्रं [6]स्याद्वागुरा मृगबन्धनी ॥२६॥
[7]शुल्वं वराटकं स्त्री तु रज्जुस्त्रिषु वटी गुणः ।
[8]उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥२७॥
[9]पुंसि वेमा वायदण्डः [10]सूत्राणि नरि तन्तवः ।
[11]वाणिर्व्यूतिः स्त्रियौ तुल्ये [12]पुस्तं लेप्यादिकर्मणि ॥२८॥
[13]पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता ।
[14]जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिपु ॥२९॥

---

१ चोरके १० नाम । २ चोरीके ४ नाम । ३ चोरीके मालका १ नाम । ४ मृगपक्षियोंको फँसानेकी सामग्रीका १ नाम । ५ फन्देके २ नाम । ६ जालके २ नाम । ७ रस्सीके ५ नाम । ८ रहटके २ नाम । ९ करघेके २ नाम । १० सूतके २ नाम । ११ कपड़ा बुननेके २ नाम । १२ लीपने-पोतनेके २ नाम । १३ गुड़ियाके २ नाम । १४ लाख तथा राँगेकी बनी वस्तुके १-१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitized by eGangotri

पिटकः पेटकः पेटा मञ्जूषाऽथ विहङ्गिका ।
भारयष्टिस्तदालम्बि शिक्यं काचोऽथ पादुका ॥३०॥
पादूरुपानत्स्त्री सैवानुपदीना पदायता ।
नध्री वध्री वरत्रा स्यादश्वादेस्ताडनी कशा ॥३१॥
चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ।
नाराची स्यादेषणिका "शाणस्तु निकषः कषः ॥३२॥
"व्रश्चनः पत्रपरशुरीषिका" तूलिका समे ।
"तैजसावर्तनी मूषा "भस्त्रा चर्मप्रसेविका ॥३३॥
"आस्फोटनी वेधनिका "कृपाणी कर्तरी समे ।
"वृक्षादनी वृक्षभेदी "टङ्कः पाषाणदारणः ॥३४॥

---

१ पेटारेके ४ नाम । २ बँहगीके २ नाम । ३ छींकेके २ नाम । ४ जूतेके ३ नाम । ५ मोजेका १ नाम । ६ चमड़ेकी रस्सीके ३ नाम । ७ चाबुकका १ नाम । ८ किंगिरीके ३ नाम । ९ सोनारके काँटे तराजूके २ नाम । १० कसौटीके ३ नाम । ११ रेतीके २ नाम । १२ सलाईके २ नाम । १३ घरियाके २ नाम । १४ भाथीके २ नाम । १५ बर्माके २ नाम । १६ कैंचीके २ नाम । १७ बसुलेके २ नाम । १८ बड़ी छीनीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]क्रकचोऽस्त्री [2]करपत्रमारा चर्मप्रभेदिका ।
[3]सूर्मी स्थूणाऽयःप्रतिमा [4]शिल्पं कर्म कलादिकम् ॥३५॥
[5]प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया
प्रतिकृतिरर्चापुंसि प्रतिनिधिरु[6]पमोपमानं स्यात् ॥३६॥
[7]वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ।
[8]साधारणः समानश्च स्युरुत्तरपदे त्वमी ॥३७॥
निभसङ्काशनीकाशप्रतीकाशोपमादयः ।
[9]कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम् ॥३८॥
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ।
[10]सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा ॥३९॥
गन्धोत्तमा प्रसन्नेराकादम्बर्यः परिस्रुता ।
मदिरा कश्यमद्ये [11]चाप्यवदंशस्तु भक्षणम् ॥४०॥

---

१ आराके २ नाम । २ चमारकी छुरीके २ नाम । ३ लोहमूर्तिके ३ नाम । ४ कारीगरीके कामका १ नाम । ५ प्रतिमाके ८ नाम । ६ मिसालके २ नाम । ७ बराबरीके ७ नाम । ८ समानके ५ नाम । ९ वर्तनके ११ नाम । १० मदिराके १३ नाम । ११ मदिराके साथ खायी जानेवाली चीजका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]शुण्डापानं मदस्थानं [2]मधुवारा मधुक्रमाः ।
[3]मध्वासवो माधवको मधु माध्वीकमद्वयोः ॥४१॥
[4]मैरेयमासवः सीधुर्[5]मेदको जगलः समौ ॥
[6]सन्धानं स्यादभिषवः [7]किण्वं पुंसि तु नग्नहूः ॥४२॥
[8]कारोत्तरः सुरामण्ड [9]आपानं पानगोष्ठिका ।
[10]चषकोऽस्त्री पानपात्रं [11]सरकोऽप्यनुतर्पणम् ॥४३॥
[12]धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ।
[13]स्युर्लग्नकाः प्रतिभुवः [14]सभिका द्यूतकारकाः ॥४४॥
[15]द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ।
[16]पणोऽक्षेषु [17]ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते ॥४५॥

---

१ कलवरियाके २ नाम । २ मद्यपानके समयके २ नाम । ३ महुआकी शराबके ४ नाम । ४ गुड़-शाकादिसे बनी मदिराके ३ नाम । ५ शराबके काढ़ेके २ नाम । ६ मद्य-निर्माणके २ नाम । ७ चावल आदिकी मदिराके २ नाम । ८ मदिराके माण्डके २ नाम । ९ शराबियोंकी मंडलीके २ नाम । १० प्यालेके २ नाम । ११ मदिरापानके २ नाम । १२ जुआरीके ५ नाम । १३ जमानतदारके २ नाम । १४ फड़-बाजके २ नाम । १५ जुएके ४ नाम । १६ बाजीके २ नाम । १७ पाँसेके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ।
अष्टापदं शारिफलं [2] प्राणिद्यूतं समाह्वयः ॥४६॥
उक्ता भूरिप्रयोगत्वादेकस्मिन्येऽत्र यौगिकाः ।
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥४७॥

इति शूद्रवर्गः ।

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
द्वितीयकाण्डो भूम्यादिः साङ्ग एव समर्थितः ॥१॥

---

१ पाँसा फेंकनेका १ नाम । २ चौपड़के २ नाम । ३ मुरगा-तीतर आदि जानवरोंपर लगी बाजीके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ तृतीयं काण्डम् ।

वर्गभेदाः ।

विशेष्यनिघ्नैः सङ्कीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥१॥

परिभाषा ।

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥ १ ॥

१ अथ विशेष्यनिघ्नवर्गः ।

सुकृती पुण्यवान्धन्यो महेच्छस्तु महाशयः ।
हृदयालुः सुहृदयो महोत्साहो महोद्यमः ॥१॥
प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥२॥

---

१ भाग्यवानके ३ नाम । २ उदारके २ नाम । ३ सहृदयके २ नाम । ४ उत्साहीके २ नाम । ५ प्रवीणके १० नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः ।
दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥३॥
स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।
जैवातृकः स्यादायुष्मानन्तर्वाणिस्तु शास्त्रवित् ॥४॥
परीक्षकः कारणिको वरदस्तु समर्धकः ।
हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ५ ॥
[10]दुर्मना विमना अन्तर्मनाः [11]स्यादुत्क उन्मनाः ।
[12]दक्षिणे सरलोदारौ [13]सुकलो दातृभोक्तरि ॥ ६ ॥
[14]तत्परे प्रसितासक्ताविष्टार्थोद्युक्त[15] उत्सुकः ।
[16]प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ७ ॥

---

१ मान्यके २ नाम। २ शक्कीके २ नाम। ३ दक्षिणा पाने योग्य व्यक्तिके ३ नाम। ४ दानवीरके ४ नाम। ५ दीर्घायुके २ नाम। ६ शास्त्रज्ञके २ नाम। ७ पारखीके २ नाम। ८ वरदायकके २ नाम। ९ प्रसन्न चित्तके ४ नाम। १० उदासके ३ नाम। ११ उत्कण्ठितके २ नाम। १२ सीधेके ३ नाम। १३ देने और भोगनेवालेका १ नाम। १४ कामकाजी आदमीके ३ नाम। १५ इच्छापूर्तिके उद्योगमें लगे पुरुषके २ नाम। १६ विख्यात व्यक्तिके ६ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]गुणैः प्रतीते तु कृतलक्षणाऽऽहतलक्षणौ ।
[2]इभ्य आढ्यो धनी [3]स्वामी त्वीश्वरः पतिरीशिता ॥८॥
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।
[4]अधिकर्द्धिः समृद्धः स्यात्[5]कुटुम्बव्यापृतस्तु यः ॥ ९ ॥
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।
[6]वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥१०॥
[7]निर्वार्यः कार्यकर्ता यः सम्पन्नः सत्त्वसम्पदा ।
[8]अवाचि मूकोऽथ [9]मनोजवसः पितृसन्निभः ॥११॥
[10]सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।
[11]लक्ष्मीवाँल्लक्ष्मणः श्रीलः श्रीमान्[12]स्निग्धस्तु वत्सलः ॥१२॥

---

१ गुणोंसे विख्यात व्यक्तिके २ नाम। २ धनीके ३ नाम। ३ स्वामीके १० नाम। ४ समृद्धके २ नाम। ५ कुटुम्बपालनमें लगे व्यक्तिके ३ नाम। ६ सुन्दर व्यक्तिका १ नाम। ७ दुखमें भी प्रसन्न व्यक्तिका १ नाम। ८ गूँगेके २ नाम। ९ पितातुल्य व्यक्तिके २ नाम। १० सत्कारपूर्वक कन्यादाताका १ नाम। ११ लक्ष्मीवान्‌के ४ नाम। १२ स्नेही व्यक्तिके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।
[2]स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥१३॥
[3]परतन्त्रः पराधीनः परवान्नाथवानपि ।
[4]अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥१४॥
[5]खलपूः स्याद्बहुकरो [6]दीर्घसूत्रश्चिरक्रियः ।
[7]जाल्मोऽसमीक्ष्यकारी स्यात्[8]कुण्ठो मन्दः क्रियासु यः ॥१५॥
[9]कर्मक्षमोऽलङ्कर्मीणः [10]क्रियावान्कर्मसूद्यतः ।
[11]स कार्मः कर्मशीलो यः [12]कर्मशूरस्तु कर्मठः ॥१६॥
[13]भरण्यभुक्कर्मकरः [14]कर्मकारस्तु तत्क्रियः ।

---

१ कृपालुके ४ नाम । २ स्वतन्त्रके ५ नाम । ३ पराधीनके ४ नाम । ४ अधीनके ५ नाम । ५ झाड़ू लगानेवालेके २ नाम । ६ देरसे काम करनेवालेके २ नाम । ७ विना विचारे काम करनेवालेके २ नाम । ८ कुन्दबुद्धिके २ नाम । ९ काम करनेमें समर्थके २ नाम । १० काममें लगे मनुष्यका १ नाम । ११ सदा काममें लगे व्यक्तिके २ नाम । १२ यत्नपूर्वक काम पूरा करनेवालेके २ नाम । १३ मजदूरके २ नाम । १४ बेगार करनेवालेका १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain. Digitization by eGangotri

[1]अपस्नातो मृतस्नात [2]आमिषाशी तु शौष्कुलः ॥१७॥
[3]बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ।
[4]परान्नः परपिण्डादो [5]भक्षको घस्मरोऽद्मरः ॥१८॥
[6]आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ।
[7]उभौ त्वात्मम्भरिः कुक्षिम्भरिः स्वोदरपूरके ॥१९॥
[8]सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः ।
[9]लुब्धोऽभिलाषुकस्तृष्णक्समौ[10] लोलुपलोलुभौ ॥२०॥
[11]सोन्मादस्तून्मदिष्णुः [12]स्यादविनीतः समुद्धतः ।
[13]मत्ते शौण्डोत्कटक्षीबाः [14]कामुके कमितानुकः ॥२१॥
कम्रः कामयिताऽभीकः कमनः कामनोऽभिकः ।

---

१ किसीके मरनेपर स्नान किये व्यक्तिके २ नाम । २ मांसाहारीके २ नाम । ३ भूखे व्यक्तिके ४ नाम । ४ पराये अन्नपर जीनेवालेके २ नाम । ५ पेटूके ३ नाम । ६ भूखसे अत्यन्त व्याकुलके २ नाम । ७ पेट पालनेवालेके २ नाम । ८ सर्वभक्षीके २ नाम । ९ लोभीके ५ नाम । १० अति लोभीके २ नाम । ११ पागलके २ नाम । १२ अक्खड़के २ नाम । १३ मतवालेके ४ नाम । १४ कामी पुरुषके ९ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विधेयो विनयग्राही वचने स्थित आश्रवः ॥२२॥
[2]वश्यः प्रणेयो [3]निभृतविनीतप्रश्रिताः समाः ।
[4]धृष्टे धृष्णग्वियातश्च [5]प्रगल्भः प्रतिभान्विते ॥२३॥
स्याद[6]धृष्टे तु शालीनो [7]विलक्षो विस्मयान्विते ।
[8]अधीरे [9]कातरस्त्रस्ते भीरुभीरुकभीलुकाः ॥२४॥
[10]आशंशुराशंसितरि [11]गृहयालुर्ग्रहीतरि ।
[12]श्रद्धालुः श्रद्धया युक्ते [13]पतयालुस्तु पातुके ॥२५॥
[14]लज्जाशीलेऽपत्रपिष्णुर्[15]वन्दारुरभिवादके ।
[16]शरारुर्घातुको हिंस्रः [17]स्याद्वर्धिष्णुस्तु वर्धनः ॥२६॥

---

१ बात माननेवालेके ४ नाम । २ वशीभूत व्यक्तिके २ नाम । ३ विनीत व्यक्तिके ३ नाम । ४ ढीठके ३ नाम । ५ अति निर्भीकके २ नाम । ६ लजीले व्यक्तिके २ नाम । ७ सोचमें पड़े व्यक्तिके २ नाम । ८ घबड़ाये मनुष्यके २ नाम । ९ डरपोकके ३ नाम । १० वांछाशील व्यक्तिके २ नाम । ११ लेनेवालेके २ नाम । १२ श्रद्धावान्का १ नाम । १३ पतनशीलके २ नाम । १४ लज्जावालेके २ नाम । १५ वन्दनशीलके २ नाम । १६ हत्यारेके ३ नाम । १७ बढ़नेवालेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]उत्पतिष्णुस्तूत्पतिताऽ[2]लङ्करिष्णुस्तु मण्डनः ।
[3]भूष्णुर्भविष्णुर्भविता [4]वर्तिष्णुर्वर्तनः समौ ॥२७॥
[5]निराकरिष्णुः क्षिप्नुः स्यात्[6]सान्द्रस्निग्धस्तु मेदुरः ।
[7]ज्ञाता तु विदुरो विन्दुर्[8]विकासी तु विकस्वरः ॥२८॥
[9]विसृत्वरो विसृमरः प्रसारी च विसारिणि ।
[10]सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥२९॥
[11]क्रोधनोऽमर्षणः कोपी [12]चण्डस्त्वत्यन्तकोपनः ।
[13]जागरूको जागरिता [14]घूर्णितः प्रचलायितः ॥३०॥
[15]स्वप्नक्शयालुर्निद्रालुर्निद्राणशयितौ[16] समौ ।
[17]पराङ्मुखः पराचीनः [18]स्यादवाङप्यधोमुखः ॥३१॥

---

१ कूदनेवालेके २ नाम । २ अलंकरणशीलके २ नाम । ३ होनेकी इच्छावालेके २ नाम । ४ वर्तनशीलके २ नाम । ५ तिरस्करणशीलके २ नाम । ६ चिकनी चीजका १ नाम । ७ ज्ञाताके ३ नाम । ८ विकासशीलके २ नाम । ९ प्रसरणशीलके ८ नाम । १० क्षमताशीलके ६ नाम । ११ क्रोधीके ३ नाम । १२ अति क्रोधीके २ नाम । १३ जागरणशीलके २ नाम । १४ नींदसे आँखें नचानेके २ नाम । १५ निद्राशीलके ३ नाम । १६ सोये हुए व्यक्तिके २ नाम । १७ विमुखके २ नाम । १८ अधोमुखके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

देवानञ्चति[1] देवद्र्यङ् [2]विष्वद्र्यङ् विष्वगञ्चति ।
[3]यः सहाञ्चति सध्र्यङ् स स तिर्यङ्[4] यस्तिरोऽञ्चति ॥३२॥
[5]वदो वदावदो वक्ता [6]वागीशो वाक्पतिः समौ ।
[7]वाचोयुक्तिपटुर्वाग्मी [8]वावदूकोऽतिवक्तरि ॥३३॥
[9]स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।
[10]दुर्मुखे मुखराबद्धमुखौ [11]शक्लः प्रियम्वदे ॥३४॥
[12]लोहलः स्यादस्फुटवाग्गर्ह्यवादी[13] तु कद्वदः ।
[14]समौ कुवादकुचरौ [15]स्यादसौम्यस्वरोऽस्वरः ॥३५॥
[16]रवणः शब्दनो [17]नान्दीवादी नान्दीकरः समौ ।

---

१ देवपूजकका १ नाम । २ चारों ओर जानेवालेका १ नाम । ३ साथ चलनेवालेका १ नाम । ४ टेढ़े चलनेवालेका १ नाम । ५ वक्ताके ३ नाम । ६ उग्रभाषीके २ नाम । ७ नैयायिकके २ नाम । ८ बकवादीके २ नाम । ९ निन्द्य-भाषीके ३ नाम । १० अप्रियवादीके ३ नाम । ११ मृदुभाषीके २ नाम । १२ अस्पष्टवादीके २ नाम । १३ निश्चित बात कहनेवालेके २ नाम । १४ खुचुर निकालनेवालेके २ नाम । १५ कटु स्वरवालेके २ नाम । १६ चिल्लानेवालेके २ नाम । १७ नाटकके आदिमें मंगलाचरण करनेवालेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]जडोऽज्ञ [2]एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ॥३६॥
[3]तूष्णींशीलस्तु तूष्णीको [4]नग्नोऽवासा दिगम्बरे ।
[5]निष्कासितोऽवकृष्टः स्या[6]दपध्वस्तस्तु धिक्कृतः ॥३७॥
[7]आत्तगर्वोऽभिभूतः स्या[8]द्दापितः साधितः समौ ।
[9]प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥३८॥
[10]निकृतः स्याद्विप्रकृतो [11]विप्रलब्धस्तु वञ्चितः ।
[12]मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥३९॥
[13]अधिक्षिप्तः प्रतिक्षिप्तो [14]बद्धे कीलितसंयतौ ।
[15]आपन्न आपत्प्राप्तः स्यात्कान्दिशीको[16] भयद्रुतः ॥४०॥

---

१ मूर्खके २ नाम । २ गूँगे-बहरेका १ नाम । ३ चुप रहनेके २ नाम । ४ नंगेके ३ नाम । ५ निकाले हुएके २ नाम । ६ धिक्कृतके २ नाम । ७ जिसका घमंड दूर कर दिया गया हो उसके २ नाम । ८ धन आदि देकर वशमें किये व्यक्तिके २ नाम । ९ अपमानित व्यक्तिके ४ नाम । १० जिसका चेहरा बिगाड़ दिया गया हो उसके २ नाम । ११ ठगे गये मनुष्यके २ नाम । १२ मन मारे हुए मनुष्यके ४ नाम । १३ जिसपर आक्षेप किया गया हो, उसके २ नाम । १४ बँधुआके २ नाम । १५ आपद्ग्रस्तके २ नाम । १६ भयसे भागे व्यक्तिके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]आक्षारितः क्षारितोऽभिशस्ते [2]सङ्कसुकोऽस्थिरे ।
[3]व्यसनार्तोपरक्तौ द्वौ [4]विहस्तव्याकुलौ समौ ॥४१॥
विक्लवो[5] विह्वलः स्यात्तु [6]विवशोऽरिष्टदुष्टधीः ।
[7]कश्यः कशार्हः [8]सन्नद्धे त्वाततायी वधोद्यते ॥४२॥
[9]द्वेष्ये त्वक्षिगतो [10]वध्यः शीर्षच्छेद्य इमौ समौ ।
विष्यो[11] विषेण यो वध्यो [12]मुसल्यो मुसलेन यः ॥४३॥
[13]शिश्विदानोऽकृष्णकर्मा [14]चपलश्चिकुरः समौ ।
[15]दोषैकदृक्पुरोभागी [16]निकृतस्त्वनृजुः शठः ॥४४॥

---

१ लोकापवादसे दूषित व्यक्तिके २ नाम। २ चंचल प्रकृति व्यक्तिके २ नाम। ३ व्यसनसे पीड़ित व्यक्तिके २ नाम। ४ शोकसे जिसकी मति मारी गयी हो उसके २ नाम। ५ शोकसे अंगभंग हुए व्यक्तिके २ नाम। ६ मौत समीप आनेसे भ्रष्ट बुद्धि व्यक्तिके २ नाम। ७ कोड़े लगने योग्य व्यक्तिके २ नाम। ८ हत्या करनेको उद्यत व्यक्तिके २ नाम। ९ द्वेष्यके २ नाम। १० वध्य व्यक्तिके २ नाम। ११ विषसे वध्य व्यक्तिके १ नाम। १२ मूसरसे वध्य व्यक्तिका १ नाम। १३ पुण्यकर्मके २ नाम। १४ विना विचारे पण्यके २ नाम। १५ दोषदर्शीके २ नाम। १६ कुटिलके ३ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]कर्णेजपः सूचकः स्यात्पिशुनो [2]दुर्जनः खलः ।
[3]नृशंसो घातुकः क्रूरः पापो [4]धूर्तस्तु वञ्चकः ॥४५॥
[5]अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।
[6]कदर्ये कृपणक्षुद्रकिंपचानमितम्पचाः ॥४६॥
[7]निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।
[8]वनीयको याचनको मार्गणो याचकार्थिनौ ॥४७॥
[9]अहंकारवानहंयुः [10]शुभंयुस्तु शुभान्वितः ।
[11]दिव्योपपादुको देवा [12]नृगवाद्या जरायुजाः ॥४८॥
[13]स्वेदजाः कृमिदंशाद्याः [14]पक्षिसर्पादयोऽण्डजाः ।
[15]उद्भिदस्तरुगुल्माद्या [16]उद्भिदुद्भिज्जमुद्भिदम् ॥४९॥

---

१ चुगलखोरके २ नाम । २ फूट डालनेवालेके ३ नाम । ३ क्रूरके ४ नाम । ४ ठगके ४ नाम । ५ मूर्खके ६ नाम । ६ कंजूसके ५ नाम । ७ दरिद्रके ५ नाम । ८ याचकके ५ नाम । ९ घमंडीके २ नाम । १० कल्याणयुक्तके २ नाम । ११ कुलदेवका १ नाम । १२ गर्भाशयसे उत्पन्न होनेवाले जीवोंका १ नाम । १३ कीड़े-मच्छड़ आदिका १ नाम । १४ पक्षी-साँप आदिका १ नाम । १५ वृक्ष-लता आदिका १ नाम । १६ उद्भिदके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥५०॥
[2]तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।
[3]अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥५१॥
[4]निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।
कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥५२॥
[5]मलीमसं तु मलिनं कच्चरं मलदूषितम् ।
[6]पूतं पवित्रं मेध्यं च [7]वीध्रं तु विमलार्थकम् ॥५३॥
[8]निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्करम् ।
[9]असारं फल्गु [10]शून्यं तु वशिकं तुच्छरिक्तके ॥५४॥
[11]क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रवर्होऽनवराध्यवत् ॥५५॥

---

१ सुन्दरके २ नाम । २ जिसको देखकर मन और नेत्र तृप्त न हो सकें, उसका १ नाम । ३ प्यारेके ६ नाम । ४ अधमके १२ नाम । ५ मैली चीजके ४ नाम । ६ साफके ३ नाम । ७ स्वभावतः निर्मलका १ नाम । ८ साफकी हुई वस्तुके ५ नाम । ९ असार वस्तुके २ नाम । १० शून्यके ४ नाम । ११ प्रधानके १७ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

परार्घ्याग्र्यप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ।
[1]श्रेयाञ्श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥५६॥
[2]स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥५७॥
[3]अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।
[4]विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ॥५८॥
[5]वड्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे ।
[6]स्तोकाल्पक्षुल्लकाः [7]सूक्ष्मं श्लक्ष्णं दभ्रं कृशं तनु ॥५९॥
स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः ।
[8]अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥६०॥
[9]प्रभूत प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥६१॥
[10]परःशताद्यास्ते येषां परा संख्या शतादिकात् ।

---

१ अतिशय सुन्दरके ५ नाम । २ श्रेष्ठार्थवाचक ४ शब्द । ३ अप्रधानके ३ नाम । ४ विशालके ६ नाम । ५ मोटेके ४ नाम । ६ थोड़ेके ३ नाम । ७ महीन वस्तुके ११ नाम । ८ बहुत थोड़ेके ५ नाम । ९ अधिकके १२ नाम । १० सौ और हजारसे अधिकके १-१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]गणनीयं तु गणेयं [2]संख्याते गणितमथ [3]समं सर्वम् ६२
विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् ।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥६३॥
[4]घनं निरन्तरं सान्द्रं [5]पेलवं विरलं तनु ।
[6]समीपे निकटासन्नसन्निकृष्टसनीडवत् ॥६४॥
सदेशाभ्याशसविधसमर्यादसदेशवत् ।
उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ॥६५॥
[7]संसक्ते त्वव्यवहितमपदान्तरमित्यपि ।
[8]नेदिष्ठमन्तिकतमं [9]स्याद्दूरं विप्रकृष्टकम् ॥६६॥
[10]दवीयश्च दविष्ठं च सुदूरं [11]दीर्घमायतम् ।
[12]वर्तुलं निस्तलं वृत्तं [13]बन्धुरं तून्नतानतम् ॥६७॥
[14]उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गेऽथ [15]वामने ।

---

१ गिनने योग्यके वस्तुके २ नाम। २ गिनी वस्तुके २ नाम। ३ समग्रके १४ नाम। ४ घनेके ३ नाम। ५ अलग-अलगके ३ नाम। ६ समीपके १५ नाम। ७ सँटे हुएके ३ नाम। ८ अति निकटके २ नाम। ९ दूरके २ नाम। १० बहुत दूरके ३ नाम। ११ लम्बेके २ नाम। १२ गोलके ३ नाम। १३ तीखेके ३ नाम। १४ उँचाईके ६ नाम। १५ छोटाईके ५ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

न्यङ्नीचखर्वह्रस्वाः स्युरवाग्रेऽवनतानतम् ॥६८॥
अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ।
आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥६९॥
[3]ऋजावजिह्मप्रगुणौ [4]व्यस्ते त्वप्रगुणाकुलौ ।
[5]शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ॥७०॥
[6]स्थास्नुः स्थिरतरः स्थेयानेकरूपतया तु यः ।
[7]कालव्यापी स कूटस्थः [8]स्थावरो जङ्गमेतरः ॥७१॥
[9]चरिष्णु जङ्गमचरं त्रसमिङ्गं चराचरम् ।
[10]चलनं कम्पनं कम्प्रं [11]चलं लोलं चलाचलम् ॥७२॥
चञ्चलं तरलं चैव पारिप्लवपरिप्लवे ।
[12]अतिरिक्तः समधिको [13]दृढसन्धिस्तु संहतः ॥७३॥
[14]कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ।

---

१ औंधे मुँहके ३ नाम। २ टेढ़ाईके ११ नाम। ३ सिधाईके ३ नाम। ४ आकुलके ३ नाम। ५ नित्यके ५ नाम। ६ अति स्थिरके ३ नाम। ७ निश्चलका १ नाम। ८ अचल वस्तुके २ नाम। ९ चल वस्तुके ६ नाम। १० काँपनेवाली वस्तुके ३ नाम। ११ चपलताके ७ नाम। १२ अधिकके २ नाम। १३ मजबूत जोड़वाली वस्तुके २ नाम। १४ कठिनके ६ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]जरठं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितम् ॥७४॥
[2]पुराणे प्रतनप्रत्नपुरातनचिरन्तनाः ।
[3]प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥७५॥
नूत्नश्च [4]सुकुमारं तु कोमलं मृदुलं मृदु ।
[5]अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ॥७६॥
[6]प्रत्यक्षं स्यादैन्द्रियकम[7]प्रत्यक्षमतीन्द्रियम् ।
[8]एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ॥७७॥
अप्येकसर्ग एकाग्र्योऽप्येकायनगतोऽपि सः ।
पुंस्या[9]दिः पूर्वपौरस्त्यप्रथमाद्या [10]अथास्त्रियाम् ॥७८॥
अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमाः ।
[11]मोघं निरर्थकं [12]स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ॥७९॥
[13]साधारणं तु [14]सामान्यमेकाकी त्वेक एककः ।

---

१ बहुत बढ़े हुएके ३ नाम । २ पुरातनके ५ नाम । ३ नवीनके ७ नाम । ४ कोमलके ४ नाम । ५ पीछेके ४ नाम । ६ प्रत्यक्ष वस्तुके २ नाम । ७ अप्रत्यक्ष वस्तुके २ नाम । ८ एकाग्रताके ७ नाम । ९ आदिके ५ नाम । १० अन्तके ६ नाम । ११ व्यर्थके २ नाम । १२ स्पष्टके ४ नाम । १३ साधारणके २ नाम । १४ अकेलेके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि ॥८०॥
[2]उच्चावचं नैकभेदमुच्चण्डमविलम्बितम् ।
[3]अरुन्तुदस्तु [4]मर्मस्पृगबाधं तु निरर्गलम् ॥८१॥
[6]प्रसव्य प्रतिकूलं स्यादपसव्यमपष्टु च ।
[7]वामं शरीरं सव्यं [8]स्यादपसव्यं तु दक्षिणम् ॥८२॥
[9]सङ्कटं ना तु सम्बाधः [10]कलिलं गहनं समे ।
[11]सङ्कीर्णे सङ्कुलाकीर्णे [12]मुण्डितं परिवापितम् ॥८३॥
[13]ग्रन्थितं सन्दितं दृब्धं [14]विसृतं विस्तृतं ततम् ।
[15]अन्तर्गतं विस्मृतं [16]स्यात्प्राप्तप्रणिहिते समे ॥८४॥
[17]वेल्लितप्रेङ्खिताऽऽधूतचलिताऽऽकम्पिता धुते ।
[18]नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः ॥८५॥

---

१ भिन्नके ६ नाम। २ बहुत तरहके २ नाम। ३ तुरन्तके २ नाम। ४ मर्मभेदीके २ नाम। ५ निर्वाधके २ नाम। ६ विपरीतके ४ नाम। ७ बायें अंगका १ नाम। ८ दहिने अंगका १ नाम। ९ सकरेपनके २ नाम। १० दुष्प्रवेशके २ नाम। ११ खचाखच भरे हुएके ३ नाम। १२ सिर मुड़ाये हुए मनुष्यके ३ नाम। १३ गुथे हुएके ३ नाम। १४ फैलावके ३ नाम। १५ भूली बातके २ नाम। १६ प्राप्त वस्तुके ३ नाम। १७ थोड़ा काँपनेके ६ नाम। १८ प्रेरितके ७ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

परिक्षिप्तं तु निवृतं मूषितं मुषितार्थकम् ।
प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताहते ॥८६॥
[6]निदिग्धोपचिते गूढगुप्ते [8]गुण्ठितरूषिते ।
[9]द्रुतावदीर्णे [10]उद्गूर्णोद्यते [11]काचितशिक्यिते ॥८७॥
[12]घ्राणघ्राते [13]दिग्धलिप्ते [14]समुदक्तोद्धृते समे ।
[15]वेष्टितं स्याद्वलयितं सम्वीतं रुद्धमावृतम् ॥८८॥
[16]रुग्णं भुग्नेऽथ [17]निशितक्ष्णुतशातानि तेजिते ।
[18]स्याद्विनाशोन्मुखं पक्वं [19]ह्रीणह्रीतो तु लज्जिते ॥८९॥

---

१ चौतरफा घिरे स्थानके २ नाम । २ चोरी चली गयी वस्तुके २ नाम । ३ फैलायी चीजके २ नाम । ४ धरोहरमें रखी वस्तुके २ नाम । ५ गुणा की हुई संख्याके २ नाम । ६ समृद्धके २ नाम । ७ छिपी वस्तुके २ नाम । ८ धूलसे सनी चीजके २ नाम । ९ द्रवीभूत वस्तुके २ नाम । १० मारनेको शस्त्र उठाये हुएके २ नाम । ११ सिकहर पर रखी वस्तुके २ नाम । १२ सूँघी वस्तुके २ नाम । १३ कीचड़में सनी वस्तुके २ नाम । १४ बाहर निकाली वस्तुके २ नाम । १५ घिरे नगर आदिके ५ नाम । १६ रोगीके २ नाम । १७ तेजकी हुई छुरी आदिके ४ नाम । १८ विनाशोन्मुख वस्तुका १ नाम । १९ लज्जित व्यक्तिके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

[1]वृत्ते तु वृतव्यावृत्तौ [2]संयोजित उपाहितः।
[3]प्राप्यं गम्यं समासाद्यं [4]स्यन्नं रीणं स्नुतं स्रुतम् ॥९०॥
[5]संगूढः स्यात्सङ्कलितोऽवगीर्तः [6]ख्यातगर्हणः।
[7]विविधः स्याद्बहुविधो नानारूपः पृथग्विधः ॥९१॥
[8]अवरीणो धिक्कृतश्चाप्यवध्वस्तोऽ[9]वचूर्णितः।
[10]अनायासकृतं फाण्टं [11]स्वनितं ध्वनितं समे ॥९२॥
[12]बद्धे सन्दानितं मूतमुद्दितं सन्दितं सितम्।
[13]निष्पक्वं क्वथितं पाके क्षीराज्यहविषां [14]श्रृतम् ॥९३॥
[15]निर्वाणो मुनिवह्न्यादौ [16]निर्वातस्तु गतेऽनिले।

---

१ वरण की हुई कन्या आदिके ३ नाम। २ मिलायी हुई वस्तुके २ नाम। ३ मिलने लायक चीजके २ नाम। ४ पिघलकर टपकती हुई वस्तुके ४ नाम। ५ जोड़ी हुई संख्या आदिके २ नाम। ६ निन्दित मनुष्यादिके २ नाम। ७ नाना प्रकारके ४ नाम। ८ निन्दितके २ नाम ९ पीसी चीजके २ नाम। १० फाण्टका १ नाम। ११ किये हुए शब्दके २ नाम। १२ बँधे हुएके ६ नाम। १३ अच्छी तरह पकी वस्तुके २ नाम। १४ दूध आदिमे पकी वस्तुका १ नाम। १५ मुनि-अग्नि आदिके लिए प्रयुक्त होनेवाले शब्दका १ नाम। १६ हवा निकली वस्तुका १ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]पक्वं परिणते [2]गूनं हन्ने [3]मीढं तु मूत्रिते ॥९४॥
[4]पुष्टे तु पुषितं [5]सोढे [6]क्षान्तमुद्वान्तमुद्गते ।
[7]दान्तस्तु दमिते [8]शान्तः शमिते [9]प्रार्थितेऽर्दितः ॥९५॥
[10]ज्ञप्तस्तु ज्ञपिते [11]छन्नश्छादिते [12]पूजितेऽञ्चितः ।
[13]पूर्णस्तु पूरिते [14]क्लिष्टः [15]क्लिशितेऽवसिते सितः ॥९६॥
[16]प्रुष्टप्लुष्टोषिता दग्धे [17]तष्टत्वष्टौ तनूकृते ।
[18]वेधितच्छिद्रितौ विद्धे [19]विन्नवित्तौ विचारिते ॥९७॥
[20]निष्प्रभे विगतारोकौ [21]विलीने विद्रुतद्रुतौ ।

---

१ पकी हुई वस्तुके २ नाम । २ मलद्वारसे निकली वस्तुके २ नाम । ३ पेशाबके २ नाम । ४ मोटेके २ नाम । ५ क्षमाप्राप्त व्यक्तिके २ नाम । ६ कै की हुई वस्तुके २ नाम । ७ इन्द्रियजितके २ नाम । ८ मिट जानेके २ नाम । ९ माँगे हुएके २ नाम । १० ज्ञान प्राप्त कराये हुएके २ नाम । ११ टँकी वस्तुके २ नाम । १२ पूजित व्यक्तिके २ नाम । १३ पूर्णके २ नाम । १४ क्लेशितके २ नाम । १५ समाप्तके २ नाम । १६ दग्धके ४ नाम । १७ छीलकर पतली की हुई वस्तुके ३ नाम । १८ बिंधी वस्तुके ३ नाम । १९ विचारित वस्तुके ३ नाम । २० निस्तेजके ३ नाम । २१ पिघले घी आदिके ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]सिद्धे निर्वृत्तनिष्पन्नौ [2]दारिते भिन्नभेदितौ ॥९८॥
[3]ऊतं स्यूतमुतं चेति त्रितयं तन्तुसन्तते ।
[4]स्यादर्हिते नमस्यितनमसितमपचायितार्चितापचितम् ॥९९॥
[5]वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ।
[6]सन्तापितसन्तप्तौ धूपितधूपायितौ च दूनश्च ॥१००॥
[7]हृष्टे मत्तस्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ।
[8]छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ॥१०१॥
[9]स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ।
[10]लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ॥१०२॥
[11]अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ।
[12]आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नतमुत्तं च ॥१०३॥
[13]त्रातं त्राणं रक्षितमवितं गोपायितं च गुप्तं च ।

---

१ सिद्ध वस्तुके ३ नाम । २ फाड़ी हुई वस्तुके ३ नाम । ३ सिने सूतके ३ नाम । ४ पूजित वस्तुके ६ नाम । ५ सेवित व्यक्तिके ६ नाम । ६ सन्तापित व्यक्तिके ५ नाम । ७ प्रसन्न मनुष्यके ६ नाम । ८ कटे हुएके ८ नाम । ९ गिरे हुएके ७ नाम । १० प्राप्त वस्तुके ६ नाम । ११ खोजी वस्तुके ५ नाम । १२ भीगी वस्तुके ७ नाम । १३ रक्षित वस्तुके ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अवगणितमवमतावज्ञाते अवमानितं च परिभूते ॥१०४॥
[2]त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे ।
[3]उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् १०५
[4]बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ।
[5]ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥१०६॥
सङ्गीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ।
[6]ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि ।१०७।
अपि गीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि ।
[7]भक्षित चर्वितलीढप्रत्यवसितगिलितखादितप्सातम् ॥१०८॥
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितं भुक्तम् ।
[8]क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ॥१०९॥
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः ।

---

१ अपमानित वस्तुके ५ नाम । २ त्यक्त वस्तुके ६ नाम । ३ कही बातके ६ नाम । ४ जानी हुई बातके ७ नाम । ५ अंगीकृतके ११ नाम । ६ स्तुतिके अर्थमें प्रयुक्त वाक्यके १२ नाम । ७ खाये हुए अन्नके १४ नाम । ८ जल्दबाजी आदिके अर्थमें प्रयुक्त होनेवाले ६ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठा ॥११०॥
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ।

इति विशेष्यनिघ्नवर्गः ।

---

२ अथ सङ्कीर्णवर्गः ।

प्रकृतिप्रत्ययार्थाद्यैः सङ्कीर्णे लिङ्गमुन्नयेत् ।
क[2]र्म क्रिया त[3]त्सातत्ये गम्ये स्युरपरस्पराः ॥ १ ॥
सा[4]कल्यासङ्गवचने पारायणपरायणे ।
य[5]दृच्छा स्वैरिता हेतु[6]शून्या त्वास्या विलक्षणम् ॥ २ ॥
श[7]मथस्तु शमः शान्तिर्दा[8]न्तिस्तु दमथो दमः ।
अ[9]वदानं कर्म वृत्तं [10]काम्यदानं प्रवारणम् ॥३॥

---

१ 'अच्छा' आदिके अर्थमें प्रयुक्त होनेवाले ५ नाम। २ कर्मके २ नाम। ३ क्रिया तथा क्रियावान्‌का १ नाम। ४ साकल्य एवं आसक्तिवचनका १-१ नाम। ५ स्वच्छन्दताके २ नाम। ६ अकारणकी स्थितिका १ नाम। ७ मनःशक्तिके ३ नाम। ८ इन्द्रियदमनके ३ नाम। ९ भूतपूर्व चरित्र अथवा शुभकर्मका १ नाम। १० सकाम दानके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

वशक्रिया संवननं मूलकर्म तु कार्मणम्।
विधूननं विधुवनं तर्पणं प्रीणनावनम् ॥४॥
पर्याप्तिः स्यात्परित्राणं हस्तवारणमित्यपि।
सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भिदा ॥५॥
आक्रोशनमभीषङ्गः संवेदो वेदना न ना।
सम्मूर्च्छनमभिव्याप्तिर्याच्ञा भिक्षाऽर्थनाऽर्दना ॥६॥
वर्धनं छेदनेऽथ द्वे आनन्दनसभाजने।
आप्रच्छन्नम थाम्नायः सम्प्रदायः क्षये क्षिया ॥७॥
ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रणः क्वणे।

---

१ वशीकरणके २ नाम। २ औषधि आदि जड़से उखाड़नेके २ नाम। ३ कम्पनके २ नाम। ४ तृप्तिके ३ नाम। ५ किसीको मार डालनेके लिए उद्यत व्यक्तिको रोकनेके ३ नाम। ६ सिलाईके ३ नाम। ७ दो टुकड़े हो जानेके ३ नाम। ८ गाली देनेके २ नाम। ९ अनुभवके २ नाम। १० सर्वथा व्याप्तिके २ नाम। ११ माँगनेके ४ नाम। १२ काटनेके २ नाम। १३ स्वागतपूर्वक कुशल-प्रश्नके ३ नाम। १४ गुरुपरम्परासे प्राप्त उपदेशके २ नाम। १५ घटतीके २ नाम। १६ पकड़नेके २ नाम। १७ इच्छाके २ नाम १८ रक्षा करनेके २ नाम। १९ शब्द करनेके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitized by eGangotri

[1]व्यधो वेधे [2]पचा पाके [3]हवो हूतौ [4]वरो वृतौ ॥८॥
[5]शोषः प्लोषे [6]नयो नाये [7]ज्यानिर्जीर्णौ [8]भ्रमो भ्रमौ ।
[9]स्फातिर्वृद्धौ [10]प्रथा ख्यातौ [11]स्पृष्टिः पृक्तौ [12]स्नवः स्रवे ॥९॥
[13]एधा समृद्धौ [14]स्फुरणे स्फुरणा [15]प्रमितौ प्रमा ।
[16]प्रसूतिः प्रसवे [17]श्च्योते प्राघारः [18]क्लमथः क्लमे ॥१०॥
[19]उत्कर्षोऽतिशये [20]सन्धिः श्लेषे [21]विषय आश्रये ।
[22]क्षिपायां क्षेपणं [23]गीर्णिर्गिरौ [24]गुरणमुद्यमे ॥११॥
[25]उन्नाय उन्नये [26]श्रायः श्रयणे [27]जयने जयः ।

---

१ बींधनेके २ नाम । २ पकानेके २ नाम । ३ पुकारनेके २ नाम । ४ चुनावके २ नाम । ५ दाहके २ नाम । ६ नीतिके २ नाम । ७ पुरानेपनके २ नाम । ८ भूलके २ नाम । ९ वृद्धिके २ नाम । १० प्रसिद्धिके २ नाम । ११ स्पर्शके २ नाम । १२ झरनेके २ नाम । १३ समृद्धिके २ नाम । १४ फड़कनेके २ नाम । १५ सत्यज्ञानके २ नाम । १६ प्रसवके २ नाम । १७ घी आदि बहनेके २ नाम । १८ ग्लानिके २ नाम । १९ बड़ाईके २ नाम । २० मेलके २ नाम । २१ सहारेके २ नाम । २२ फेंकनेके २ नाम । २३ निगलनेके २ नाम । २४ उद्यम करनेके २ नाम । २५ उंठानेके २ नाम । २६ सेवाके २ नाम । २७ जयके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]निगादो निगदे [2]मादो मद [3]उद्वेग उद्भ्रमे ॥१२॥
[4]विमर्दनं परिमलो[5]ऽभ्युपपत्तिरनुग्रहः ।
[6]निग्रहस्तद्विरुद्धः स्या[7]दभियोगस्त्वभिग्रहः ॥१३॥
[8]मुष्टिबन्धस्तु संग्राहो [9]डिम्बे डमरविप्लवौ ।
[10]बन्धनं प्रसितिश्चारः [11]स्पशः स्प्रष्टोपतप्तरि ॥१४॥
[12]निकारो विप्रकारः [13]स्यादाकारस्त्विङ्ग इङ्गितम् ।
[14]परिणामो विकारो द्वे समे [15]विकृतिविक्रिये ॥१५॥
[16]अपहारस्त्वपचयः [17]समाहारः समुच्चयः ।
[18]प्रत्याहार उपादानं [19]विहारस्तु परिक्रमः ॥१६॥

---

१ कथनके २ नाम । २ खुशीके २ नाम । ३ उद्वेगके २ नाम । ४ कुमकुम आदि मलनेके २ नाम । ५ स्वीकृतिके २ नाम । ६ विरोधका १ नाम । ७ लड़ाईमें ललकारनेके २ नाम । ८ कसकर पकड़नेके २ नाम । ९ मनुष्योंको लूटनेके ३ नाम । १० बन्धनके ३ नाम । ११ उपताप रोगके ३ नाम । १२ अपकारके २ नाम । १३ इशारेके ३ नाम । १४ प्रकृतिपरिवर्तनके २ नाम । १५ विरुद्ध कर्मके २ नाम । १६ छीन लेनेके २ नाम । १७ इकट्ठा करनेके २ नाम । १८ इन्द्रियोंको विषयोंसे समेटनेके २ नाम । १९ पैरसे चलनेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अभिहारोऽभिग्रहणं [2]निर्हारोऽभ्यवकर्षणम् ।
[3]अनुहारोऽनुकारः [4]स्यादर्थस्यापगमे व्ययः ॥१७॥
प्र[5]वाहस्तु प्रवृत्तिः [6]स्यात्प्रवहो गमनं बहिः ।
वि[7]यामो वियमो यामो यमः संयामसंयमौ॥१८॥
हिं[8]साकर्माऽभिचारः स्याज्जा[9]गर्या जागरा द्वयोः ।
विघ्नोऽन्त[10]रायः प्रत्यूहः [11]स्यादुपघ्नोऽन्तिकाश्रये ॥१९॥
[12]निर्वेश उपभोगः [13]स्यात्परिसर्पः परिक्रिया ।
[14]विधुरं तु प्रविश्लेषेऽ[15]भिप्रायश्छन्द आशयः ॥२०॥
[16]संक्षेपणं समसनं [17]पर्यवस्था विरोधनम् ।

---

१ चोरी करनेके २ नाम । २ काँटा आदि निकालनेके २ नाम । ३ नकल करनेके २ नाम । ४ खर्चका १ नाम । ५ निरन्तर बहावके २ नाम । ६ जल आदि बाहर निकालनेका १ नाम । ७ संयमके ६ नाम । ८ मारण आदि हिंसामय कर्मका १ नाम । ९ जागरणके २ नाम । १० विघ्नके ३ नाम । ११ समीप निवासके २ नाम । १२ उपभोगके २ नाम । १३ परिवार समेट रखनेके २ नाम । १४ अत्यन्त वियोगके २ नाम । १५ अभिप्रायके ३ नाम । १६ संक्षेपके २ नाम । १७ विरोधके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]परिसर्या परीसारः [2]स्यादास्या त्वासना स्थितिः ॥२१॥
[3]विस्तारो विग्रहो व्यासः [4]स च शब्दस्य विस्तरः ।
[5]संवाहनं मर्दनं [6]स्याद्विनाशः [7]स्याददर्शनम् ॥२२॥
संस्तवः स्यात्परिचयः [8]प्रसरस्तु विसर्पणम् ।
[9]नीवाकस्तु प्रयामः [10]स्यात्सन्निधिः सन्निकर्षणम् ॥२३॥
[11]लवोऽभिलावो लवने [12]निष्पावः पवने पवः ।
[13]प्रस्तावः स्यादवसरस्त्र[14]सरः सूत्रवेष्टनम् ॥२४॥
[15]प्रजनः स्यादुपसरः [16]प्रश्रयप्रणयौ समौ ।
[17]धीशक्तिर्निष्क्रमोऽस्त्री तु [18]संक्रमो दुर्गसञ्चरः ॥२५॥

---

१ चौतरफा फैलावके २ नाम । २ बैठनेके ३ नाम । ३ विस्तारके ३ नाम । ४ शब्दविस्तारका १ नाम । ५ शरीर दबानेके ३ नाम । ६ विनाशके २ नाम । ७ परिचयके २ नाम । ८ घाव फैलनेके २ नाम । ९ धन-धान्यादिसे आदर पानेके २ नाम । १० समीपताके २ नाम । ११ खेतसे धान्य काटनेके ३ नाम । १२ धान्य माड़नेके ३ नाम । १३ प्रसंगके २ नाम । १४ जुलाहेकी नरीके २ नाम । १५ गर्भधारणके २ नाम । १६ प्रेमके २ नाम । १७ बुद्धिसामर्थ्यके २ नाम । १८ दुर्गम मार्गके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रत्युत्क्रमः प्रयोगार्थः [2]प्रक्रमः स्यादुपक्रमः ।
[3]स्यादभ्यादानमुद्घात आरम्भः [4]संभ्रमस्त्वरा ॥२६॥
[5]प्रतिबन्धः प्रतिष्टम्भोऽ[6]वनायस्तु निपातनम् ।
[7]उपलम्भस्त्वनुभवः [8]समालम्भो विलेपनम् ॥२७॥
[9]विप्रलम्भो विप्रयोगो [10]विलम्भस्त्वतिसर्जनम् ।
[11]विश्रावस्तु प्रतिख्याति[12]रवेक्षा प्रतिजागरः ॥२८॥
[13]निपाठनिपठौ पाठे [14]तेमस्तेमौ समुन्दने ।
[15]आदीनवास्रवौ क्लेशे [16]मेलके सङ्गसङ्गमौ ॥२९॥
[17]सम्वीक्षणं विचयनं मार्गणं मृगणा मृगः ।
[18]परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥३०॥

---

१ अति युद्धोद्योगके २ नाम । २ प्रथम आरम्भ के २ नाम । ३ आरम्भमात्रके ३ नाम । ४ जल्दबाजीके २ नाम । ५ रुकावटके २ नाम । ६ नीचे गिरानेके २ नाम । ७ साक्षात्कारके २ नाम । ८ कुंकुमादि लेपनके २ नाम । ९ वियोग के २ नाम । १० अति दानके २ नाम । ११ अतिशय प्रसिद्धि के २ नाम । १२ देख-भालके २ नाम । १३ पढ़नेके ३ नाम । १४ नरम हो जानेके ३ नाम । १५ क्लेशके ३ नाम । १६ मेल-मिलापके ३ नाम । १७ किसी मतलबसे छानबीनके ५ नाम । १८ लिपटानेके ४ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।
[2]प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥३१॥
[3]उपशायो विशायश्च पर्यायशयनार्थकौ ।
[4]अर्तनं च ऋतीया च हृणीया च घृणार्थकाः ॥३२॥
[5]स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये ।
[6]पर्ययोऽतिक्रमस्तस्मिन्नतिपात उपात्ययः ॥३३॥
[7]प्रेषणं यत्समाहूय तत्र स्यात्प्रतिशासनम् ।
[8]स संस्तावः क्रतुषु या स्तुतिभूमिर्द्विजन्मनाम् ॥३४॥
[9]निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।
स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥३५॥
[10]आविधो विध्यते येन [11]तत्र विष्वक्समे निघः ।
[12]उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ॥३६॥

---

१ देखनेके ५ नाम । २ ठुकरानेके ४ नाम । ३ पहरा देनेवालोंके बारी बारी सोनेके २ नाम । ४ घृणाके ४ नाम । ५ उलट-पलटके ४ नाम । ६ अतिक्रमके ४ नाम । ७ दूत आदि भेजनेका १ नाम । ८ यज्ञमें स्तावकके बैठनेकी जगहका १ नाम । ९ खुरके २ नाम । १० लकड़ी छेदनेवाले बरमाका १ नाम । ११ चौतरफा बराबर वृक्षका १ नाम । १२ अनाज आदि फटकनेके २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

नि[1]गारोद्गारविक्षावोद्ग्राहास्तु गरणादिषु ।
आ[2]रत्यवरतिविरतय उ[3]परामेऽथास्त्रियां तु निष्ठेवः ॥३७॥
निष्ठ्यूतिर्निष्ठेवनं निष्ठीवनमित्यभिन्नानि ।
ज[4]वने जूतिः सा[5]तिस्त्ववसाने स्यादथ ज्व[6]रे जूर्तिः ॥३८॥
उ[7]दजस्तु पशुप्रेरण[8]मकरणिरित्यादयः शापे ।
गोत्रान्तेभ्यस्तस्य वृन्दमित्यौपगवकादिकम् ॥३९॥

आ[9]पूपिकं शाष्कुलिकमेवमाद्यमचेतसाम् ।
[10]माणवानां तु माणव्यं [11]सहायानां सहायता ॥४०॥
[12]हल्या हलानां [13]ब्राह्मण्यवाडव्ये तु द्विजन्मनाम् ।
[14]द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्यमनुक्रमात् ॥४१॥

---

१ निगलनेका १ उगलनेका १ खाँसने-छींकनेका १ और डकारनेका १ नाम । २ विश्रामके ४ नाम । ३ थूकनेके ४ नाम । ४ वेगके २ नाम । ५ अन्तके २ नाम । ६ ज्वरके २ नाम । ७ जानवर हाँकनेका १ नाम । ८ शापके अर्थमें प्रयुक्त होनेवाले शब्दका १ नाम । ९ अपूप आदिके समूहके १-१ नाम । १० बालकसमूहके २ नाम । ११ मित्रसमूहका १ नाम । १२ हलोंके समूहका १ नाम । १३ द्विजसमूहके २ नाम । १४ पसलियों और पीठोंके समूहका १-१ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[१]खलानां खलिनी खल्याऽप्यथ [२]मानुष्यकं नृणाम्।
[३]ग्रामता जनता धूम्या पाश्या गल्या पृथक्पृथक् ॥४२॥
[४]अपि साहस्रकारीषवार्मणाथर्वणादिकम्।

इति संकीर्णवर्गः।

—*—

३ अथ नानार्थवर्गः।

नानार्थाः[५] केऽपि कान्तादिवर्गेष्वेवात्र कीर्तिताः।
भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते ॥१॥
आकाशे त्रिदिवे नाको[६] लोकस्तु[७] भुवने जने।
पद्ये यशसि च श्लोकः[८] शरे खड्गे च सायकः[९] ॥२॥

---

१ खलोंके समूहके २ नाम। २ मनुष्योंके समूहका १ नाम। ३ ग्रामादिके समूहोंका १-१ नाम। ४ सहस्रादि समूहोंका १-१ नाम। ५ यहाँसे उन शब्दोंका संग्रह है जिनका प्रयोग कई अर्थोंमें होता है। जैसे लोक–जगत् और मनुष्यमें व्यवहृत होता है। ६ नाक–आकाश तथा स्वर्ग। ७ लोक-जगत् मनुष्य। ८ श्लोक–पद्य कीर्ति। ९सायक–बाण, तलवार।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]जम्बुकौ क्रोष्टुवरुणौ [2]पृथुकौ चिपिटार्भकौ ।
[3]आलोकौ दर्शनद्योतौ भेरीपटह[4]मानकौ ॥३॥
[5]उत्सङ्गचिह्नयोरङ्कः [6]कलङ्कोऽङ्कापवादयोः ।
[7]तक्षको नागवर्धक्योर[8]र्कः स्फटिकसूर्ययोः ॥४॥
मारुते वेधसि ब्रध्ने [9]पुंसि कः [10]कं शिरोऽम्बुनोः ।
[11]स्यात्पुलाकस्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥५॥
उलूके करिणः पुच्छमूलोपान्ते च [12]पेचकः ।
कमण्डलौ च [13]करकः सुगते च [14]विनायकः ॥६॥
[15]किष्कुर्हस्ते वितस्तौ च शूककीटे च [16]वृश्चिकः ।

---

१ जम्बुक-सियार, वरुण । २ पृथुक—चिउड़ा, बालक । ३ आलोक-दर्शन, प्रकाश । ४ आनक—धौंसा, नगाड़ा । ५ अंक-गोद, चिह्न । ६ कलङ्क—चिह्न, अपयश । ७ तक्षक-नाग, बढ़ई । ८ अर्क—स्फटिक, सूर्य । ९ कः—वायु, ब्रह्मा, सूर्य । १० कं—सिर, जल । ११ पुलाक—तिन्नी, धान, संक्षेप आदि । १२ पेचक—उल्लू, हाथीका पुच्छभाग । १३ करक—कमण्डल, करवा । १४ विनायक-बुद्ध, गणेश, गरुड़ । १५ किष्कु—हाथ भर, एक बित्ता । १६ वृश्चिक—बिच्छू, आठवीं राशि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

प्रतिकूले [1]प्रतीकस्त्रिष्वेकदेशे तु पुंस्यथम् ॥७॥
स्याद्[2]भूतिकं तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च ।
ज्योत्स्निकायां च घोषे च [3]कोशातक्यथ कट्फले ॥८॥
सिते च खदिरे [4]सोमवल्कः स्यादथ सिह्लके ।
तिलकल्के च [5]पिण्याको [6]बाह्लीकं रामठेऽपि च ॥९॥
महेन्द्रगुग्गुलूलूकव्यालग्राहिषु [7]कौशिकः ।
रुक्तापशङ्कास्व[8]ातङ्कः स्वल्पेऽपि [9]क्षुल्लकस्त्रिषु ॥१०॥
[10]जैवातृकः शशाङ्केऽपि खुरेऽप्यश्वस्य [11]वर्तकः ।
व्याघ्रेऽपि [12]पुण्डरीको ना यवान्यामपि [13]दीपकः ॥११॥
[14]शालावृकाः कपिक्रोष्टुश्वानः स्वर्णेऽपि [15]गैरिकम् ।

---

१ प्रतीक-प्रतिकूल, अंग । २ भूतिक-चिरायता, कुकुरमुत्ता । ३ कोशातकी-परवल, चिचिंडा । ४ सोमवल्क-कायफर, खैर । ५ पिण्याक-सेल्हा, तिलकी खली । ६ वाह्लीक-हींग, घोड़ा, धैर्यशाली मनुष्य । ७ कौशिक-इन्द्र, गूगुल, उल्लू, सँपेरा । ८ आतंक-रोग सन्ताप, शंका । ९ क्षुल्लक-थोड़ा, नीच आदि । १० जैवातृक-चन्द्रमा, कृश आदि । ११ घोड़ेका खुर, बटेर । १२ बाघ, सफेद कमल आदि । १३ अजवाइन, प्रकाश । १४ बन्दर, सियार, कुत्ता । १५ गेरू, सोना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पीडार्थेऽपि [1]व्यलीकं [2]स्यादलीकं त्वप्रियेऽनृते ॥१२॥
शीलान्वयाव[3]नूके द्वे [4]शल्के शकलवल्कले ।
साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥१३॥
दीनारेऽपि च [5]निष्कोऽस्त्री [6]कल्कोऽस्त्री शमलैनसोः ।
दम्भेऽप्यथ [7]पिनाकोऽस्त्री शूलशङ्करधन्वनोः ॥१४॥
[8]धेनुका तु करेण्वां च मेघजाले च [9]कालिका ।
[10]कारिका यातनावृत्त्योः [11]कर्णिका कर्णभूषणे ॥१५॥
करिहस्तेऽङ्गुलौ पद्मबीजकोश्यां त्रिषूत्तरे ।
[12]वृन्दारकौ रूपिमुख्यावेके[13] मुख्यान्यकेवलाः ॥१६॥
स्याद्दाम्भिकः [14]कौक्कुटिको यश्चादूरेरितेक्षणः ।
[15]लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः ॥१७॥
भूभृन्नितम्बवलयचक्रेषु [16]कटकोऽस्त्रियाम् ।

---

१ पीड़ा, क्रूर कर्म । २ झूठ, अप्रिय । ३ स्वभाव, वंश, पूर्व जन्म । ४ खण्ड, पेड़का छिलका । ५ एक सौ आठ कर्ष सोना, आभूषण । ६ पाप, पाखण्ड । ७ त्रिशूल, शिवधनुष । ८ हथिनी, जल्द ब्यायी गाय । ९ मेघसमूह, काली देवी । १० नरककष्ट, विवरणके श्लोक । ११ कर्णफूल, सूँड । १२ रूप, मुख्य । १३ मुख्य, अन्य, केवल । १४ पाखण्डी, समीपदर्शी । १५ मुँहदेखा, आलसी । १६ राजा, नितम्बप्रदेश ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः ॥१८॥
[2]पाकौ पक्तिशिशू [3]मध्यरत्ने नेतरि नायकः ।
[4]पर्यङ्कः स्यात्परिकरे स्याद्व्याघ्रेऽपि च [5]लुब्धकः ॥१९॥
[6]पेटकस्त्रिषु वृन्देऽपि गुरौ देश्ये च [7]देशिकः ।
[8]खेटकौ ग्रामफलकौ धीवरेऽपि च [9]जालिकः ॥२०॥
पुष्परेणौ च [10]किञ्जल्कः [11]शुल्कोऽस्त्री स्त्रीधनेऽपि च ।
[12]स्यात्कल्लोलेऽप्युत्कलिका[12] [13]वार्द्धकं भाववृन्दयोः ॥२१॥
करिण्यां चापि [14]गणिका [15]दारकौ बालभेदकौ ।
अन्धेऽप्यनेड[16]मूकः [17]स्यात्टङ्कौ दर्पाश्मदारणौ ॥२२॥
[18]मयूखस्त्विट्करज्वालास्वलिबाणौ [19]शिलीमुखौ ।
[20]शङ्खो निधौ ललाटास्थ्नि कम्बौ न [21]स्त्रीन्द्रियेऽपि खम् २३

---

१ सुईकी नोक, क्षुद्रशत्रु, रोमांच । २ रसोई, बच्चा । ३ मध्य रत्न, नेता । ४ सेज, सामान । ५ लोभी, व्याघ्र । ६ पेटारा, समूह । ७ गुरु । ८ खेत, ग्रामफलक । ९ जालिया, केवट । १० पुष्पकी केसर । ११ महसूल, स्त्रीधन । १२ भावावेश, कल्लोल । १३ बुढ़ापा, बढ़ती । १४ वेश्या, हथिनी । १५ फाटनेवाला, बालक । १६ अन्धा, बहरा, गूँगा । १७ घमंड, छेनी । १८ कान्ति, किरण, लपट । १९ भौंरा, बाण । २० खजाना, मस्तककी हड्डी, शंख । २१ इन्द्रिय, नगर, आकाश ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

घृणिज्वाले अपि [1]शिखे शैलवृक्षौ [2]नगावगौ ।
[3]आशुगौ वायुविशिखौ शरार्कविहगाः [4]खगाः ॥२४॥
[5]पतङ्गौ पक्षिसूर्यौ च [6]पूगः क्रमुकवृन्दयोः ।
पशवोऽपि [7]मृगा [8]वेगः प्रवाहजवयोरपि ॥२५॥
[9]पराग: कौसुमे रेणौ स्नानीयादौ रजस्यपि ।
गजेऽपि [10]नागमातङ्गावपाङ्गस्[11]तिलकेऽपि च ॥२६॥
[12]सर्गः स्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु ।
[13]योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु ॥२७॥
[14]भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः ।
चातके हरिणे पुंसि [15]सारङ्गः शबले त्रिषु ॥२८॥

---

१ आगकी लपट, चोटी। २ पर्वत, वृक्ष। ३ वायु, बाण। ४ सूर्य, बाण, पक्षी। ५ पक्षी, सूर्य। ६ सुपारी, समूह। ७ हरिण, वनपशु, मृगशिरा नक्षत्र ८ प्रवाह, वेग। ९ फूलकी केसर, स्नानका सामान, धूल। १० हाथी, चाण्डाल। ११ नेत्रकोण, तिलक, अंगहीन। १२ स्वभाव, त्याग, अध्याय, सृष्टि, निश्चय। १३ कवच, सामादि नीति, चित्तकी चंचलता रोकना, मिलाप, युक्ति। १४ सुख, सर्पका फन, शरीर। १५ पपीहा, हिरन, चितकबरा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कपौ च [1]प्लवगः शापे [2]त्वभिषङ्गः पराभवे ।
यानाद्यङ्गे [3]युगः पुंसि [4]युगं युग्मे कृतादिषु ॥ २९ ॥
[5]स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
लक्षदृष्ट्या स्त्रियां पुंसि गौर्लिङ्गं[6] चिह्नशेफसोः ॥३०॥
[7]शृङ्गं प्राधान्यसान्वोश्च [8]वराङ्गं मूर्धगुह्ययोः ।
[9]भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ॥३१॥
[10]परिघः परिघातेऽस्त्रेऽ[11]प्योघो वृन्देऽम्भसां रये ।
मूल्ये पूजाविधा[12]वर्घोंहोदुःखव्यसनेष्व[13]घम् ॥ ३२ ॥
त्रिष्विष्टेऽल्पे [14]लघुः [15]काचाः शिक्यमृद्भेददृग्रुजः ।
विपर्यासे विस्तरे च [16]प्रपञ्चः पावके [17]शुचिः ॥३३॥

---

१ वानर, मेढक । २ शाप, अपमान । ३ रथका जुआ, चार हाथकी नाप । ४ दोकी संख्या, सत्यादि युग । ५ वाण, स्वर्ग आदि । ६ चिह्न, मूत्रेन्द्रिय । ७ श्रेष्ठ, पशुकी सींग । ८ मस्तक, योनि । ९ लक्ष्मी, पराक्रम आदि । १० गँड़ासा, लोहाँगी । ११ समूह, जलप्रवाहादि । १२ पूजाका सामान, दाम आदि । १३ पाप, दुःख आदि । १४ प्रिय, छोटा, थोड़ा । १५ सिकहर, मट्टी, रोगविशेष । १६ उलटा, विस्तार, फसाद । १७ अग्नि, मंत्री, पवित्र आदि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मास्यमात्ये चाप्युपधे पुंसि मेध्ये सिते त्रिषु ।
अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम् ॥३४॥
प्रसन्ने भल्लुकेऽप्यच्छो गुच्छः स्तबकहारयोः ।
परिधानाञ्चले कच्छो जलप्रान्ते त्रिलिङ्गकः ॥३५॥
केकिताक्ष्यावहिभुजौ दन्तविप्राण्डजा द्विजाः ।
अजा विष्णुहरच्छागा गोष्ठाध्वनिवहा व्रजाः ॥ ३६ ॥
धर्मराजो जिनयमौ कुञ्जो दन्तेऽपि न स्त्रियाम् ।
[10]वलजे क्षेत्रपूर्द्वारे [11]वलजा वल्गुदर्शना ॥३७॥
समे क्ष्मांशे रणेऽ[12]प्याजिः [13]प्रजा स्यात्सन्ततौ जने ।
[14]अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये [15]निजं त्रिषु ॥३८॥
पुंस्यात्मनि प्रवीणे च [16]क्षेत्रज्ञो वाच्यलिङ्गकः ।

---

१ अच्छा, किरण आदि । २ प्रसन्न, भालू, स्फटिक मणि । ३ समुदाय, फूलका गुच्छा । ४ कछार, धोतीकी लाँग । ५ मोर, गरुड़, दाँत आदि । ६ विष्णु, शिव, बकरा आदि । ७ गोशाला, रास्ता । ८ बुद्ध, यम, युधिष्ठिर । ९ हाथीका दाँत, लतागृह । १० खेत, नगरका द्वार । ११ सुन्दरी स्त्री । १२ समभूमि, संग्राम । १३ सन्तान, प्रजा । १४ शंख, चन्द्रमा, कमल । १५ अपना, नित्य । १६ पुरुष प्रवीण आदि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ॥ ३९ ॥
[2]काकेभगण्डौ करटौ [3]गजगण्डकटौ कटौ ।
[4]शिपिविष्टस्तु खलतौ दुश्चर्मणि महेश्वरे ॥ ४० ॥
[5]देवशिल्पिन्यपि त्वष्टा [6]दिष्टं दैवेऽपि न द्वयोः ।
[7]रसे कटुः कट्वकार्ये त्रिषु मत्सरतीक्ष्णयोः ॥ ४१ ॥
[8]रिष्टं क्षेमाशुभाभावेष्व[9]रिष्टे तु शुभाशुभे ।
[10]मायानिश्चलयन्त्रेषु कैतवानृतराशिषु ॥ ४२ ॥
अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम् ।
सूक्ष्मैलायां [11]त्रुटिः स्त्री स्यात्कालेऽल्पे संशयेऽपि सा ॥ ४३ ॥
अत्युत्कर्षाश्रयः [12]कोट्यो मूले लग्नकचे [13]जटा ।
[14]व्युष्टिः फले समृद्धौ च [15]दृष्टिर्ज्ञानेऽक्ष्णि दर्शने ॥ ४४ ॥

---

१ होश, हाथ-भौं आदिका संकेत । २ कौआ, हाथीका गण्डस्थल । ३ गजगण्डस्थल, कमर । ४ गंजा, शिव । ५ बढ़ई, विश्वकर्मा । ६ भाग्य, समय । ७ औषधि, बुरा काम, ईर्ष्या, तीखा । ८ कल्याण, अभाव, अमंगल । ९ शुभ-अशुभ । १० माया, मंत्र, कपट आदि । ११ छोटी इलायची, थोड़ा, सन्देह । १२ पीड़ा, उन्नति, कोना । १३ जड़, वेदका पाठ-विशेष । १४ फल, समृद्धि । १५ ज्ञान, आँख, दर्शन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]इष्टिर्यागेच्छयोः [2]सृष्टं निश्चिते बहुनि त्रिषु ।
[3]कष्टे तु कृच्छ्रगहने [4]दक्षामन्दागदेषु च ॥ ४५ ॥
पटुर्द्वौ वाच्यलिङ्गौ च [5]नीलकण्ठः शिवेऽपि च ।
पुंसि [6]कोष्ठोऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा ॥ ४६ ॥
[7]निष्ठा निष्पत्तिनाशान्ताः [8]काष्ठोत्कर्षे स्थितौ दिशि ।
त्रिषु [9]ज्येष्ठोऽतिशस्तेऽपि [10]कनिष्ठोऽतियुवाल्पयोः ॥ ४७ ॥
[11]दण्डोऽस्त्री लगुडेऽपि स्याद् [12]गुडो गोलेक्षुपाकयोः ।
सर्पमांसात्पशू [13]व्याडौ गोभूवाचास्त्विडा[14] इलाः ॥ ४८ ॥
[15]क्ष्वेडा वंशशलाकाऽपि [16]नाडी नालेऽपि षट्क्षणे ।
[17]काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु ॥ ४९ ॥
स्याद्भा[18]ण्डमश्वाभरणेऽमत्रे मूलवणिग्धने ।

---

१ यज्ञ, इच्छा । २ निश्चित, अधिक । ३ कठिनाई, घना वन । ४ चतुर, आरोग्य । ५ शिव, मयूर । ६ पेटका भीतरी भाग, कोठिला । ७ उपपत्ति, विनाश । ८ वृद्धि, दिशा । ९ बहुत अच्छा, बड़ा लड़का या बड़ा भाई । १० छोटा पुत्र, छोटा भाई । ११ लाठी, सेना, घोड़ा आदि । १२ मिट्टीका गोला, गुड़ । १३ सर्प, मांसाहारी पशु । १४ गाय, पृथ्वी आदि । १५ बांसकी तीली, सूप आदि । १६ क्षण, डंठल, नसें । १७ [illegible] प्रतिज्ञा स्वीकार ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भृशप्रतिज्ञयोर्बाढं[1] प्रगाढं[2] भृशकृच्छ्रयोः ॥ ५० ॥
शक्तस्थूलौ त्रिपु [3]दृढो व्यूढौ[4] विन्यस्तसंहतौ ।
भ्रूणोऽर्भके[5] स्त्रैणगर्भे बाणो[6] बलिसुते शरे । ५१ ॥
कणोऽतिसूक्ष्मे[7] धान्यांशे संघाते प्रमथे गणः[8] ।
पणो[9] द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ॥ ५२ ॥
मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके [10]गुणः ।
निर्व्यापारस्थितौ कालविशेषोत्सवयोः [11]क्षणः ॥ ५३ ॥
[12]वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाऽक्षरे ।
[13]अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिपु ॥ ५४ ॥
[14]स्थाणुः शर्वेऽप्यथ [15]द्रोणः काकेऽप्याजौ रवे [16]रणः ।

---

१ अतिशय, प्रतिज्ञा, स्वीकार । २ दृढ़, कठिनाई । ३ सामर्थ्य, मोटाई । ४ दृढ़, सटा हुआ, सेनाकी किलेबन्दी । ५ बच्चा, गर्भ । ६ बलिका पुत्र, तीर । ७ सूक्ष्म, कण । ८ समूह, शिवगण । ९ व्यय किया धन, जुएकी बाजी आदि । १० धनुषकी डोरी, रस-गन्ध आदि । ११ बेकारी, उत्सवका समय । १२ ब्राह्मणादि वर्ण, रंग, स्तुति, अक्षर । १३ सूर्य-सारथि, रंग । १४ शिव, खम्भा, वृक्ष आदि । १५ कौआ, द्रोणाचार्य, परिमाणविशेष । १६ शब्द, युद्ध ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizaqtion by eGangotri

[1]ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ॥ ५५ ॥
[2]ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः ।
[3]हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥ ५६ ॥
त्रिषु पाण्डौ च [4]हरिणः [5]स्थूणा स्तम्भेऽपि वेश्मनः ।
[6]तृष्णे स्पृहापिपासे द्वे [7]जुगुप्साकरुणे घृणे ॥ ५७ ॥
[8]वणिक्पथे च विपणिः [9]सुरा प्रत्यक्च वारुणी ।
[10]करेणुरिभ्यां स्त्री नेभे [11]द्रविणं तु बलं धनम् ॥ ५८ ॥
[12]शरणं गृहरक्षित्रोः [13]श्रीपर्णं कमलेऽपि च ।
[14]विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु ॥ ५९ ॥
[15]प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु ।
[16]करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि ॥ ६० ॥

---

१ नाई, ग्रामपति । २ ऊन, भौंहोंकी भौंरी । ३ हरिणी, हरी प्रतिमा । ४ मृग, पाण्डुर वर्ण । ५ खूँटा, खम्भा, लोह-प्रतिमा । ६ कामना, प्यास । ७ निन्दा, दया । ८ बाजारकी गली, दुकान । ९ मदिरा, पश्चिम दिशा । १० हाथी, हथिनी । ११ बल, धन । १२ घर, रक्षक । १३ कमल, शमी । १४ विष, युद्ध, लोहा, तीखा, नपुंसक । १५ कारण, सीमा, ज्ञानी । १६ मूल कारण, खेत, शरीर, इन्द्रिय ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

प्राण्युत्पादे [1]संसरणमसम्बाधचमूगतौ ।
घण्टापथेऽथ वान्तान्ने [2]समुद्गिरणमुन्नये ॥ ६१ ॥
अतस्त्रिषु [3]विषाणं स्यात्पशुशृंगेभदन्तयोः ।
[4]प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ॥ ६२ ॥
[5]संकीर्णौ निचिताशुद्धावीरिणं [6]शून्यमूषरम् ।
(सेतौ च वरणो वेणी नदीभेदे कचोच्चये) ॥ ६३ ॥
देवसूर्यौ [7]विवस्वन्तौ [8]सरस्वन्तौ नदार्णवौ ।
पक्षितार्क्ष्यौ [9]गरुत्मन्तौ [10]शकुन्तौ भासपक्षिणौ ॥६४॥
अग्न्युत्पातौ [11]धूमकेतू [12]जीमूतौ मेघपर्वतौ ।
[13]हस्तौ तु पाणिनक्षत्रे [14]मरुतौ पवनामरौ ॥ ६५ ॥
[15]यन्ता हस्तिपके सूते [16]भर्ता धातरि पोष्टरि ।

---

१ जन्म, बिना रुकावट सेनाका बढ़ाव। २ वमनका अन्न, ऊपर उठाना। ३ सींग, हाथीका दाँत। ४ ढलुई भूमि, नम्र, चौराहा। ५ गहन, अशुद्ध, वर्णसंकर। ६ निराधार, ऊसर। ७ देवता, सूर्य। ८ नद, समुद्र। ९ पक्षी, गरुड़। १० भास, पक्षी। ११ अग्नि, उत्पात नक्षत्र। १२ मेघ, पर्वत। १३ हाथ, हस्त नक्षत्र। १४ वायु, देवता। १५ महावत, सारथी। १६ ब्रह्मा, स्वामी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यानपात्रे शिशौ [1]पोतः [2]प्रेतः प्राण्यन्तरे मृते ॥६६॥
ग्रहभेदे ध्वजे [3]केतुः पार्थिवे तनये [4]सुतः ।
[5]स्थपतिः कारुभेदेऽपि [6]भूभृद्भूमिधरे नृपे ॥ ६७ ॥
मूर्धाभिषिक्तो भूपेऽपि [8]ऋतुः स्त्रीकुसुमेऽपि च ।
विष्णावप्यजिता [9]व्यक्तौ [10]सूतस्त्वष्टरि सारथौ ॥ ६८ ॥
[11]व्यक्तः प्राज्ञेऽपि [12]दृष्टान्तावुभौ शास्त्रनिदर्शने ।
क्षत्ता[13] स्यात्सारथौ द्वाःस्थे क्षत्त्रियायां च शूद्रजे ॥६९॥
[14]वृत्तान्तः स्यात्प्रकरणे प्रकारे कार्त्स्न्यवार्तयोः ।
[15]आनर्तः समरे नृत्यस्थाननीवृद्विशेषयोः ॥ ७० ॥
[16]कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ।
[17]श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ॥ ७१ ॥

---

१ जहाज, बालक । २ जन्मान्तर, मृतक । ३ ग्रह, पताका । ४ राजा, पुत्र । ५ कारीगर, कंचुकी । ६ पर्वत, राजा । ७ राजा, क्षत्रिय । ८ स्त्रीरज, वसन्तादि ऋतु । ९ विष्णु, शिव, विजयी । १० बढ़ई, सारथी । ११ पंडित, स्पष्ट, स्थूल । १२ शास्त्र, उदाहरण । १३ द्वारपाल, शूद्रसे क्षत्रियामें उत्पन्न सन्तति । १४ प्रकरण, प्रकार, सन्देश । १५ संग्राम, द्वारका । १६ यम, सिद्धान्त आदि । १७ वातादि दोष ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन्द्रियाण्यश्मविकाराः शब्दयोनिश्च [1]धातवः ।
कक्षान्तरेऽपि [2]शुद्धान्तो नृपस्यासर्वगोचरे ॥ ७२ ॥
कासूसामर्थ्ययोः शक्ति[4]र्मूर्तिः काठिन्यकाययोः ।
[5]विस्तारवल्ल्योर्व्रततिर्[6]वसती रात्रिवेश्मनोः ॥ ७३ ॥
क्षयार्चयोरपचितिः सातिर्दानावसानयोः ।
अर्तिः पीडाधनुष्कोट्योर्जातिः [10]सामान्यजन्मनोः ॥ ७४ ॥
प्रचारस्यन्दयो [11]रीति[12]रीतिर्डिम्बप्रवासयोः ।
उदयेऽधिगमे [13]प्राप्ति[14]स्त्रेता त्वग्नित्रये युगे ॥ ७५ ॥
वीणाभेदेऽपि [15]महती [16]भूतिर्भस्मनि सम्पदि ।
नदीनगर्योर्नागानां [17]भोगवत्यथ सङ्गरे ॥ ७६ ॥

---

१ इन्द्रिय, सुवर्ण, रस-रक्त आदि । २ रनिवास, अशौचान्त । ३ साँगा, बर्छी, सामर्थ्य । ४ स्वरूप, शारीरिक मजबूती । ५ फैलाव, लता । ६ रात्रि, घर । ७ हानि, पूजा । ८ दान, अन्त । ९ पीड़ा, धनुषका अग्रभाग । १० मनुष्य-पशु आदि जाति, जन्म । ११ शैली, पीतल । १२ विप्लव, विदेश । १३ उदय लाभ । १४ तीनों अग्नि, त्रेता युग । १५ नारदकी वीणा, महिमामयी नारी । १६ उत्पत्ति, लाभ अणिमा-महिमादि सिद्धियाँ, भस्म, सम्पदा । १७ नदी, सर्पपुरी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सङ्गे[1] सभायां संमितिः क्षयवासावपि[2] क्षितौ ।
रवेरर्चिश्च शस्त्रं च वह्निज्वाला च[3] हेतयः ॥ ७७ ॥
जगती[4] जगति च्छन्दोविशेषेऽपि क्षितावपि ।
पंक्तिश्छन्दोऽपि[5] दशमं स्यात्प्रभावेऽपि[6] चायतिः ॥७८॥
पत्तिर्गतौ[7] च मूले तु पक्षतिः[8] पक्षभेदयोः ।
प्रकृतिर्योनिलिङ्गे[9] च कैशिक्याद्याश्च[10] वृत्तयः ॥ ७९ ॥
सिकताः[11] स्युर्वालुकापि वेदे श्रवसि च[12] श्रुतिः ।
वनिता[13] जनितात्यर्थानुरागायां च योषिति ॥ ८० ॥
गुप्तिः[14] क्षितिव्युदासेऽपि[15] धृतिर्धारणधैर्ययोः ।
बृहती[16] क्षुद्रवार्ताकी छन्दोभेदे महत्यपि ॥ ८१ ॥

---

१ संग्राम, सभा, संग । २ नाश, निवास, भूमि । ३ सूर्यकी किरणें, शस्त्र, लपट । ४ संसार, छन्दोविशेष, भूमि । ५ छन्दविशेष, श्रेणी । ६ भविष्य, प्रभाव । ७ पैदल सेना, यात्रा । ८ प्रतिपदा, पंखकी जड़ । ९ योनि, लिंग । १० कैशिकी आदि वृत्तियाँ, सूत्रका विवरण । ११ बालू, रेगिस्तान । १२ वेद, कान, श्रवण । १३ स्त्री, प्रिय पत्नी । १४ गुफा, जेल । १५ धारणा, धैर्य । १६ भंटा, छन्द-विशेष, बड़ी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]वासिता स्त्रीकरिण्योश्च [2]वार्ता वृत्तौ जनश्रुतौ ।
[3]वार्तं फल्गुन्यरोगे च त्रिष्वप्सु च [4]घृतामृते ॥ ८२ ॥
[5]कलधौतं रूप्यहेम्नोर्निमित्तं[6] हेतुलक्ष्मणोः ।
[7]श्रुतं शास्त्रावधृतयोर्युगपर्याप्तयोः [8]कृतम् ॥ ८३ ॥
[9]अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ।
[10]युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ॥ ८४ ॥
[11]वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ।
[12]महद्राज्यं [13]चावगीतं जन्ये स्याद्गर्हिते त्रिषु ॥ ८५ ॥
[14]श्वेतं रूप्येऽपि [15]रजतं हेम्नि रूप्ये सिते त्रिषु ।
त्रिष्वतो [16]जगदिङ्गेऽपि [17]रक्तं नील्यादिरागि च ॥ ८६॥

---

१ स्त्री, हथिनी । २ जीविका, समाचार । ३ कुशल, आरोग्य । ४ घी, जल । ५ चाँदी, सोना । ६ कारण, चिह्न । ७ शास्त्र सुनी बात । ८ सत्ययुग, पर्याप्त । ९ बड़ा भय, साहसका काम । १० सत्य, प्राणी, भूतकाल । ११ श्लोक, चरित्र, भूतकाल, मजबूत, गोल । १२ राज्य, बड़ा । १३ बदनाम, बदनामी । १४ चाँदी, सफेद रंग, द्वीपविशेष । १५ सोना-चाँदी, सफेद रंग । १६ संहार, जंगम प्राणी । १७ नील आदि रंग, रुधिर, प्रेमी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaqtion by eGangotri

[1]अवदातः सिते पीते शुद्धे [2]बद्धार्जुनौ सितौ ।
[3]युक्तेऽतिसंस्कृते मर्षिण्य[4]भिनीतोऽथ संस्कृतम् ॥ ८७ ॥
कृत्रिमे लक्षणोपेतेऽप्य[5]नन्तोऽनवधावपि ।
[6]ख्याते हृष्टे प्रतीतो[7]ऽभिजातस्तु कुलजे बुधे ॥ ८८ ॥
[8]विविक्तौ पूतविजनौ [9]मूर्च्छितौ मूढसोच्छ्रयौ ।
द्वौ चाम्लपुरुषौ [10]शुक्तौ [11]शिती धवलमेचकौ ॥ ८९ ॥
[12]सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् ।
[13]पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते ॥ ९० ॥
[14]निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत् ।
[15]जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिता [16]उत्थितास्त्वमी ॥ ९१ ॥

---

१ उज्ज्वल वस्तु, पीला रंग, शुद्ध । २ कैदी, सफेद रंग । ३ युक्त अति श्रेष्ठ, क्षमावान् । ४ संस्कार युक्त, बनावटी, लक्षणयुक्त । ५ असीम, शेषनाग, विष्णु भगवान । ६ प्रसिद्ध, प्रसन्न । ७ कुलीन, पंडित । ८ पुनीत, एकान्त, निर्जन । ९ बेहोश, वृद्धियुक्त । १० चूक, कठोर । ११ उज्ज्वल, काला । १२ सत्य, साधु, विद्यमान, पूज्य । १३ अगुआ, पूजित, शत्रुसे त्रस्त । १४ निवासस्थान, वायुहीन, कवच । १५ उत्पन्न, प्रवृद्ध, ऊंचा । १६ प्रवृद्ध, उदयोन्मुख, उत्पन्न ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

वृद्धिमत्प्रोद्यतोत्पन्ना [1]आदृतौ सादरार्चितौ ।
[2]अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ॥ ९२ ॥
[3]निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ ।
[4]समर्थस्त्रिषु शक्तिस्थे सम्बद्धार्थे हितेऽपि च ॥ ९३ ॥
[5]दशमीस्थौ क्षीणरागवृद्धौ [6]वीथी पदव्यपि ।
[7]आस्थानीयत्नयोरास्था [8]प्रस्थोऽस्त्री सानुमानयोः ॥९४॥
(शास्त्रद्रविणयोर्ग्रन्थः संस्थाधारे स्थिता मृतौ)
[9]अभिप्रायवशौ छन्दा[10]वब्दौ जीमूतवत्सरौ ॥ ९५ ॥
[11]अपवादौ तु निन्दाज्ञे [12]दायादौ सुतबान्धवौ ।
[13]पादा रश्म्यङ्घ्रितुर्यांशा[14]श्चन्द्राग्न्यर्कास्तमोनुदः ॥९६॥
[15]निर्वादो जनवादेऽपि [16]शादो जम्बालशष्पयोः ।

---

१ पूजित । २ अभिप्राय, धन, वस्तु, प्रयोजन । ३ पौसरा, शास्त्र, ऋषिसेवित जल, गुरु । ४ बलवान, सम्बद्ध अर्थ, अनुकूल । ५ रागहीन, अतिवृद्ध । ६ रास्ता, पंक्ति । ७ सभा, उपाय । ८ पर्वतकी चोटी, एक सेर । ९ अभिप्राय, अधीन, पद्य । १० मेघ, वर्ष, इन्द्र ११ निन्दा, आज्ञा । १२ पुत्र, जाति, बान्धव, सपिण्ड । १३ किरण, पाँव, चतुर्थांश । १४ चन्द्रमा, आग, सूर्य । १५ लोकापवाद, सिद्धान्तवाद । १६ कीचड़, घास ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

¹आरावे रुदिते त्रातर्याक्रन्दो दारुणे रणे ॥ ९७ ॥
²स्यात्प्रसादोऽनुरागेऽपि ³सूदः स्याद्व्यञ्जनेऽपि च ।
⁴गोष्ठाध्यक्षेऽपि गोविन्दो ⁵हर्षेऽप्यामोदवन्मदः ॥ ९८ ॥
⁶प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।
⁷स्त्री संविज्ज्ञानसम्भाषाक्रियाकाराजिनामसु ॥ ९९ ॥
⁸धर्मे रहस्युपनिषत्स्यादृतौ ⁹वत्सरे शरत् ।
¹⁰पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु ॥१००॥
¹¹गोष्पदं सेविते माने ¹²प्रतिष्ठाकृत्यमास्पदम् ।
¹³त्रिष्विष्टमधुरौ स्वादू ¹⁴मृदू चातीक्ष्णकोमलौ ॥१०१॥
¹⁵मूढाल्पापटुनिर्भाग्या मन्दाः स्युर्द्वौ तु ¹⁶शारदौ ।

---

१ दयनीय, स्वर, रोदन, रक्षक, संग्राम। २ कृपा, प्रसन्नता, काव्यका गुण, नैवेद्य। ३ रसोई, रसोइया। ४ गोशालाका मालिक, कृष्ण। ५ हर्ष, मनको मस्त कर देनेवाली सुगन्धि। ६ प्रधान, राजचिह्न, बैलका कन्धा। ७ ज्ञान, सम्भाषण, नियम, युद्ध, संज्ञा, संकेत। ८ धर्म, एकान्त, वेदान्त। ९ शरदृतु, वर्ष। १० व्यवसाय, रक्षा, स्थान चिह्न, पैर, वस्तु। ११ गोसेवित प्रदेश, गौके खुरभर जमीन। १२ प्रतिष्ठा, कार्य। १३ प्रिय, मीठा। १४ अतीक्ष्ण, कोमल। १५ मूर्ख, थोड़ा, अनाड़ी, अभागा। १६ नवीन, डरपोक, वर्ष।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

प्रत्यग्राप्रतिभौ [1]विद्वत्सुप्रगल्भौ विशारदौ ॥ १०२ ॥
[2]व्यामो वटश्च न्यग्रोधा[3]वुत्सेधः काय उन्नतिः ।
[4]पर्याहारश्च मार्गश्च [5]विवधौ वीवधौ च तौ ॥ १०३ ॥
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
बन्धकं व्यसनं चेतःपीडाधिष्ठानमाधयः[6] ॥ १०४ ॥
स्युः समर्थननीवाकनियमाश्च समाधयः[7] ।
दोषोत्पादेऽनुबन्धः स्यात्प्रकृत्यादिविनश्वरे ॥ १०५ ॥
मुख्यानुयायिनि शिशोः प्रकृतस्यानुवर्तने[8] ।
[9]विधुर्विष्णौ चन्द्रमसि परिच्छेदे बिलेऽ[10]वधिः ॥१०६॥
[11]विधिर्विधाने दैवेऽपि [12]प्रणिधिः प्रार्थने चरे ।
[13]बुधवृद्धौ पण्डितेऽपि [14]स्कन्धः समुदयेऽपि च ॥१०७॥

---

१ विद्वान्, ढीठ । २ बरगद, अँकवार । ३ शरीर, ऊँचाई । ४ ध्यान, रास्ता, बोझ । ५ समिधा, चन्द्र-सूर्य-मण्डल । ६ बन्धक, व्यसन, मानसिक कष्ट, आश्रय । ७ समाधान, स्वीकार । ८ दोषोत्पत्ति, बड़ोंका अनुयायी बालक । ९ विष्णु, चन्द्रमा, कपूर । १० सीमा, बिल । ११ विधान, ब्रह्मा । १२ प्रार्थना, दूत । १३ पंडित, वृद्ध, ग्रहविशेष । १४ समूह, कन्धा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

देशे नदविशेषेऽब्धौ[1] सिन्धुर्ना सरिति स्त्रियाम् ।
[2]विधा विधौ प्रकारे च [3]साधू रम्येऽपि च त्रिषु ॥१०८॥
[4]वधूर्जाया स्नुषा स्त्री च [5]सुधा लेपोऽमृतं स्नुही ।
[6]सन्धा प्रतिज्ञा मर्यादा [7]श्रद्धा सम्प्रत्ययः स्पृहा ॥१०९॥
मधु[8] मद्ये पुष्परसे क्षौद्रेऽप्यन्धं[9] तमस्यपि ।
अतस्त्रिषु [10]समुन्नद्धौ पण्डितम्मन्यगर्वितौ ॥११०॥
[11]ब्रह्मबन्धुरधिक्षेपे निर्देशेऽथावलम्बितः ।
अविदूरोऽप्य[12]वष्टब्धः [13]प्रसिद्धौ ख्यातभूषितौ ॥१११॥
सूर्यवह्नी [14]चित्रभानू [15]भानू रश्मिदिवाकरौ ।
[16]भूतात्मानौ धातृदेहौ [17]मूर्खनीचौ पृथग्जनौ ॥११२॥

---

१ सिन्ध देश, नदविशेष, समुद्र, नदी । २ विधान, प्रकार । ३ सज्जन, कुलीन । ४ स्त्री, पतोहू । ५ चूना, अमृत, सेंहुड़ । ६ प्रतिज्ञा, मर्यादा । ७ आदर, विश्वास, आकांक्षा । ८ मदिरा, पुष्परस, शहद । ९ अँधेरा, अन्धा मनुष्य । १० पण्डितम्मन्य, घमंडी । ११ निन्दा, आदेश । १२ अधीन, समीपवर्ती । १३ विख्यात, अलंकृत । १४ सूर्य, अग्नि । १५ किरण, सूर्य । १६ ब्रह्मा, शरीर । १७ मूर्ख, नीच ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रावाणौ[1] शैलपाषाणौ पत्त्रिणौ[2] शरपक्षिणौ ।
तरुशैलौ[3] शिखरिणौ[4] शिखिनौ वह्निबर्हिणौ ॥११३॥
[5]प्रतियत्नावुभौ लिप्सोपग्रहावथ [6]सादिनौ ।
द्वौ सारथिहयारोहौ [7]वाजिनोऽश्ववेषु पक्षिणः ॥११४॥
कुलेऽप्यभिजनो[8] जन्मभूम्यामप्यथ [9]हायनाः ।
वर्षार्चिर्व्रीहिभेदाश्च चन्द्राग्न्यर्का [10]विरोचनाः ॥११५॥
क्लेशेऽपि [11]वृजिनो [12]विश्वकर्मार्कसुरशिल्पिनोः ।
[13]आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च ॥११६॥
शक्रो घातुकमत्तेभो वर्षुकाब्दो [14]घनाघनः ।
[15]घनो मेघे मूर्तिगुणे त्रिषु मूर्ते निरन्तरे ॥११७॥
[16]अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ।
[17]इनः सूर्ये प्रभौ [18]राजा मृगाङ्के क्षत्रिये नृपे ॥११८॥

---

१ पर्वत, पत्थर । २ बाण, वृक्ष । ३ वृक्ष, पर्वत । ४ अग्नि, मयूर । ५ इच्छा, पराभव । ६ कोचवान, घुड़सवार । ७ घोड़ा, पक्षी । ८ कुल, जन्मभूमि । ९ वर्ष, किरण, अन्न-विशेष । १० चन्द्र अग्नि, सूर्य, प्रह्लाद । ११ दुःख, पाप । १२ सूर्य, देवताओंका बढ़ई । १३ उपाय, धैर्य आदि । १४ इन्द्र, खूनी, मस्त हाथी आदि । १५ मेघ, घेरा हुआ । १६ धन आदिका मद, ज्ञान, प्रेम, हिंसा । १७ सूर्य, स्वामी १८ चन्द्र ... राजा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाणिन्यौ[1] नर्तकीदूत्यौ स्रवन्त्यामपि वाहिनी[2]।
ह्लादिन्यौ[3] वज्रतडितौ वन्दायामपि कामिनी[4] ॥११९॥
त्वग्देहयोरपि तनुः[5] सूनाधोजिह्विकापि च[6]।
क्रतुविस्तारयोरस्त्री वितानं[7] त्रिषु तुच्छके ॥१२०॥
मन्देऽथ केतनं[8] कृत्ये केतावुपनिमन्त्रणे।
वेदस्तत्त्वं तपो ब्रह्म[9] ब्रह्मा विप्रः प्रजापतिः ॥१२१॥
उत्साहने च हिंसायां सूचने चापि गन्धनम्[10]।
आतञ्चनं[11] प्रतीवापजवनाप्यायनार्थकम् ॥१२२॥
व्यञ्जनं[12] लाञ्छनं श्मश्रुनिष्ठानावयवेष्वपि।
स्यात्कौलीनं[13] लोकवादे युद्धे पश्वहिपक्षिणाम् ॥१२३॥
स्यादुद्यानं[14] निःसरणे वनभेदे प्रयोजने।

---

१ नाचनेवाली, दूती, कुटनी। २ नदी, सेना। ३ वज्र, बिजली। ४ बाँदा, कामुकी स्त्री। ५ चमड़ी, देह। ६ गलेकी घंटी, वधस्थान। ७ यज्ञ, विस्तार, आलसी। ८ कार्य, ध्वजा, उपनिमंत्रण। ९ वेद, तत्त्व, तप आदि। १० प्रोत्साहन, हिंसा, आशय प्रकट करना। ११ दूधमें जावन डालना, वेग, मजुहार। १२ चिह्न, दाढ़ीमूछ। १३ लोकनिन्दा, पशु-सर्प तथा पक्षियोंका युद्ध। १४ निकलना, बगीचा, प्रयोजन।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवकाशे स्थितौ [1]स्थानं क्रीडादावपि [2]देवनम् ॥१२४॥
[3]उत्थानं पौरुषे तन्त्रे सन्निविष्टोद्गमेऽपि च ।
[4]व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च ॥१२५॥
मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने ।
निर्वर्तनोपकरणानुव्रज्यासु च [5]साधनम् ॥१२६॥
निर्यातनं[6] वैरशुद्धौ दाने न्यासार्पणेऽपि च ।
[7]व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ॥१२७॥
[8]पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि ।
तिथिभेदे क्षणे [9]पर्व [10]वर्त्म नेत्रच्छदेऽध्वनि ॥१२८॥
अकार्यगुह्ये [11]कौपीनं मैथुनं[12] सङ्गतौ रते ।
[13]प्रधानं परमात्मा धीः [14]प्रज्ञानं बुद्धिचिह्नयोः ॥१२९॥

---

१ अवकाश, घर । २ क्रीड़ा, जिगीषा । ३ उन्नति, पुरुषार्थ आदि । ४ तिरस्कार, विरुद्धाचार । ५ मारण, दाह-संस्कार, धन आदि । ६ प्रतिशोध, दान, धरोहर । ७ विपत्ति, विनाश, कामजनित दोष । ८ बरौनी, केसर, सूतका छोटा टुकड़ा । ९ अष्टमी-अमावस्यादि तिथि, उत्सव । १० पलक, राह । ११ अकार्य, लँगोट । १२ मैथुन, संगत । १३ श्रेष्ठ, परमात्मा, बुद्धि । १४ बुद्धि, चिह्न ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रसूनं पुष्पफलयो[2]र्निधनं कुलनाशयोः ।
[3]क्रन्दने रोदनाह्वाने [4]वर्ष्म देहप्रमाणयोः ॥१३०॥
[5]गृहदेहत्विट्प्रभावा धामा[6]न्यथ चतुष्पथे ।
सन्निवेशे च [6]संस्थानं [7]लक्ष्म चिह्नप्रधानयोः ॥१३१॥
[8]आच्छादने सम्पिधानमपवारणमित्युभे ।
[9]आराधनं साधने स्यादवाप्तौ तोषणेऽपि च ॥१३२॥
[10]अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ।
[11]रत्नं स्वजातिश्रेष्ठेऽपि [12]वने सलिलकानने ॥१३३॥
[13]तलिनं विरले स्तोके वाच्यलिङ्गं तथोत्तरे ।
[14]समानाः सत्समैके स्युः [15]पिशुनौ खलसूचकौ ॥१३४॥
[16]हीनन्यूनावूनगर्ह्यौ वेगिशूरौ [17]तरस्विनौ ।

---

१ फूल, फल । २ वंश, नाश । ३ रोदन, बुलाहट । ४ शरीर, नाप । ५ घर, शरीर, कान्ति, प्रभाव । ६ चौराहा, मृत्यु, आकृति । ७ चिन्ह, श्रेष्ठ । ८ छिपना, ढाँकना, वस्त्र । ९ कार्यकी पूर्णता, लाभ, प्रसन्न करना । १० पहिया, नगर, प्रभाव । ११ जातिमें उत्तम, जवाहर । १२ जल, वन । १३ विरला, थोड़ा । १४ अच्छा, सदृश, एक । १५ दुष्ट, चुगलखोर । १६ थोड़ा, निन्दनीय । १७ वेगवान्, बली ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापद्गतावपि ॥१३५॥
कलापो भूषणे बर्हे तूणीरे संहतावपि ।
परिच्छदे परीवापः पर्युप्तौ सलिलस्थितौ ॥१३६॥
गोधुग्गोष्ठपती गोपौ हरविष्णू वृषाकपी ।
बाष्पमूष्माश्रु कशिपु त्वन्नमाच्छादनं द्वयम् ॥१३७॥
तल्पं शय्याट्टदारेषु स्तम्बेऽपि विटपोऽस्त्रियाम् ।
प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ॥१३८॥
भेद्यलिङ्गा अमी कूर्मी वीणाभेदश्च कच्छपी ।
कुतपो मृगरोमोत्थपटे चाह्नोऽष्टमेंऽशके ॥१३९॥
(रवर्णे पुंसि रेफः स्यात्कुत्सिते वाच्यलिंगकः) ।
अन्तराभवसत्त्वेऽश्वे गन्धर्वो दिव्यगायने ॥१४०॥

---

१ अपराधी, शत्रुग्रस्त, विपद्ग्रस्त । २ अलंकार, मोर-पंख, समूह । ३ कनात, पानीकी टंकी, बीजवपन । ४ ग्वाला, गोशालाध्यक्ष, जमीन्दार । ५ शिव, विष्णु । ६ गर्मी, आँसू । ७ भोजन, वस्त्र । ८ सेज, अटारी, स्त्री । ९ डंठल, वृक्ष, डाली । १० पंडित, सुन्दर । ११ कछुई, सरस्वतीकी वीणा । १२ मृगके लोमका वस्त्र, दिनका अष्टमांश । १३ जन्म-मरणके बीचमें स्थित प्राणी, गायक, गन्धर्व ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]कम्बुर्ना वलये शंखे [2]द्विजिह्वौ सर्पसूचकौ ।
[3]पूर्वोऽन्यलिंगः प्रागाह पुंबहुत्वेऽपि पूर्वजान् ॥१४१॥
[4]कुम्भौ घटेभमूर्द्धांशौ [5]डिम्भौ तु शिशुबालिशौ ।
[6]स्तम्भौ स्थूणाजडीभावौ [7]शम्भू ब्रह्मत्रिलोचनौ ॥१४२॥
कुक्षिभ्रूणार्भका [8]गर्भा [9]विस्रम्भः प्रणयेऽपि च ।
स्याद्भेर्यां [10]दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ॥१४३
स्यान्महारजने क्लीबं [11]कुसुम्भं करके पुमान् ।
क्षत्रियेऽपि च [12]नाभिर्ना [13]सुरभिर्गवि च स्त्रियाम् ॥१४४॥
[14]सभा संसदि सभ्ये च त्रिष्वध्यक्षेऽपि [15]वल्लभः ।
किरणप्रग्रहौ [16]रश्मी कपिभेकौ [17]प्लवंगमौ ॥१४५॥

---

१ कंगन, शंख । २ सर्प, चुगलखोर । ३ पूर्वदिशा, पूर्वज, ब्रह्मा, पहला । ४ घड़ा, गजमस्तक । ५ बच्चा, मूर्ख । ६ खम्भा, जड़ता । ७ शिव, ब्रह्मा । ८ पेट, गर्भका बच्चा । ९ प्रेम, विश्वास । १० नगाड़ा, फिरकी । ११ कुसुमका फूल, कमण्डल । १२ ठोढ़ी, क्षत्रिय । १३ गौ, वसन्त, सुगन्धि । १४ सभाभवन, सभाके सदस्य, परिषद् । १५ प्रिय, मालिक । १६ किरण, रस्सी । १७ वायु, मेंढक ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इच्छामनोभवौ [1]कामौ [2]शौर्योद्योगौ [3]पराक्रमौ ।
[4]धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः ॥१४६॥
उपायपूर्व [5]आरम्भ उपधा चाप्युपक्रमः ।
वणिक्पथः पुरं वेदो [6]निगमो [7]नागरो वणिक् ॥१४७॥
नैगमौ द्वौ [8]बले [9]रामो नीलचारुसिते त्रिपु ।
शब्दादिपूर्वो वृन्देऽपि [10]ग्रामः क्रान्तौ च [11]विक्रमः ॥१४८॥
[12]स्तोमः स्तोत्रेऽध्वरे वृन्दे [13]जिह्मस्तु कुटिलेऽलसे ।
[14]उष्णोऽपि धर्मश्चेष्टालङ्कारे भ्रान्तौ च [15]विभ्रमः ॥१४९॥
[16]गुल्मा रुक्स्तम्बसेनाश्च [17]जामिः स्वसृकुलस्त्रियोः ।
क्षितिः[18]क्षान्त्योः क्षमा युक्ते [19]क्षमं शक्ते हिते त्रिपु ॥१५०॥

---

१ इच्छा, कामदेव । २ वीरता, उद्योग । ३ पुण्य, यम, न्याय आदि । ४. आरम्भ, इलाज, बल । ५ वाणिज्य, नगर, वेद । ६ शहरी, बनिया, उपनिषद् । ७ बलराम, परशुराम, राम आदि । ८ गाँव, समूह, स्वर । ६ आक्रमण, बल । १० स्तुति, यज्ञ, समूह । ११ कुटिल, आलसी । १२ पसीना, घाम । १३ भ्रम, शोभा । १४ पिलही रोग, गुच्छा, सरपत । १५ बहिन, कुलस्त्री । १६ पृथिवी, क्षमा । १७ योग्य, समर्थ, हितकारी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]त्रपुं श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा।
[3]ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ॥१५१॥
सूक्ष्ममध्यात्ममप्याद्ये प्रधाने [5]प्रथमस्त्रिषु।
[6]वामौ वल्गुप्रतीपौ [7]द्वावधमो न्यूनकुत्सितौ ॥१५२॥
जीर्णं च परिभुक्तं च [8]यातयाममिदं द्वयम्।
तुरङ्गगरुडा [9]तार्क्ष्यौ निलयापचयो [10]क्षयो ॥१५३॥
[11]श्वशुर्यौ देवरश्यालौ [12]भ्रातृव्यौ भ्रातृजद्विषौ।
[13]पर्जन्यौ रणदब्देन्द्रौ [14]स्यादर्यः स्वामिवैश्ययोः ॥१५४॥
[15]तिष्यः पुष्ये कलियुगे [16]पर्यायोऽवसरे क्रमे।
[17]प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ॥१५५॥

---

१ हरा, काला। २ सरिवन, रात्रि, हल्दी। ३ पूछ, तिलक, घोड़ा आदि। ४ आत्मा, बहुत छोटा। ५ आदि, प्रधान। ६ सुन्दर, प्रतिकूल, बायाँ। ७ क्रम, निंद्य। ८ पुराना, भोजनोच्छिष्ट। ९ घोड़ा, गरुड़। १० घर, ह्रास, रोग। ११ देवर, साला। १२ भतीजा, शत्रु। १३ गरजता मेघ, इन्द्र। १४ स्वामी, बनिया। १५ पुष्य नक्षत्र, कलि-युग। १६ अवसर, क्रम। १७ अधीन, शपथ आदि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रन्ध्रे शब्देऽथा[1]नुशयो दीर्घद्वेषानुतापयोः ।
[2]स्थूलोच्चयस्त्वसाकल्ये नागानां मध्यमे गते ॥१५६॥
[3]समयाः शपथाचारकालसिद्धान्तसंविदः ।
व्यसनान्यशुभं दैवं विपदित्य[4]नयास्त्रयः ॥१५७॥
[5]अत्ययोऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्यथापदि ।
युद्धायत्योः [6]सम्परायः [7]पूज्यस्तु श्वशुरेऽपि च ॥१५८॥
पश्चादवस्थायिबलं समवायश्च [8]संनयौ ।
संघाते सन्निवेशे च [9]संस्त्यायः [10]प्रणयास्त्वमी ॥१५९॥
विस्रम्भयाच्ञाप्रेमाणो विरोधेऽपि [11]समुच्छ्रयः ।
[12]विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि ॥१६०॥
निर्यासेऽपि [13]कषायोऽस्त्री सभायां च [14]प्रतिश्रयः ।

---

१ वैर, पछतावा । २ अपूर्ण, हाथीकी मध्यम चाल । ३ कसम, आचरण आदि । ४ बुरी आदत, अभाग्य, विपत्ति, अन्याय । ५ उल्लंघन, कष्ट आदि । ६ आगामी समय । ७ पूज्य । ८ पीछेकी सेना, समूह । ९ समूह, स्थान, विस्तार । १० विश्वास, याचना, प्रेम । ११ उन्नति, वैर । १२ ज्ञात विषय, शब्दरूपादि देश । १३ काढ़ा, कसैला, रस, गेरुआ रंग । १४ सभा, सहारा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायो[1]भूम्न्यन्तगमने मन्यु[2]र्दैन्ये क्रतौ क्रुधि ॥१६१॥
रहस्योपस्थयोर्गुह्यं[3] सत्यं[4] शपथतथ्ययोः ।
[5]वीर्यं बले प्रभावे च [6]द्रव्यं भव्ये गुणाश्रये ॥१६२॥
[7]धिष्ण्यं स्थाने गृहे भेऽग्नौ [8]भाग्यं कर्म शुभाशुभम् ।
[9]कशेरुहेम्नोर्गाङ्गेयं [10]विशल्या दन्तिकाऽपि च ॥१६३॥
[11]वृषाकपायी [12]श्रीगौर्योरभिख्या नामशोभयोः ।
आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ॥१६३॥
[13]उपायः कर्म चेष्टा च चिकित्सा च नव क्रियाः ।
[14]छायाः सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः ॥१६५॥
[15]कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।
[16]कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ॥१६६॥

---

१ अधिकता, अनशन, मृत्यु, ज्ञान। २ दैन्य, यज्ञ, क्रोध। ३ गोप्य, लिंग, योनि। ४ शपथ, सत्य। ५ बल, प्रभाव। ६ गुणोंका आश्रय, धन, दवा। ७ स्थान, घर, नक्षत्र, अग्नि। ८ शुभाशुभ कर्म, ऐश्वर्य। ९ कसेरू, सुवर्ण, भीष्म। १० दन्तिका, गुरुच। ११ लक्ष्मी, पार्वती। १२ नाम, शोभा। १३ आरम्भ, प्रायश्चित्त आदि। १४ कान्ति, परछाईं आदि। १५ ड्योढ़ीके भीतर, क्षुद्रघंटिका। १६ कार्य, भूत-प्रेत आदि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

जन्यं[1] स्याज्जनवादेऽपि जघन्योऽन्त्येऽधमेऽपि च[2] ।
गृह्याधीनौ[3] च वक्तव्यौ कल्यौ[4] सज्जनिरामयौ ॥१६७॥
आत्मवाननपेतोऽर्थादर्थ्यौ[5] पुण्यं[6] तु चार्वपि ।
रूप्यं[7] प्रशस्तरूपेऽपि वदान्यो[8] वल्गुवागपि ॥१६८॥
न्याय्येऽपि मध्यं[9] सौम्यं[10] तु सुन्दरे सोमदैवते ।
निवहावसरौ [11]वारौ संस्तरौ[12] प्रस्तराध्वरौ ॥१६९॥
[13]गुरू गीष्पतिपित्राद्यौ [14]द्वापरौ युगसंशयौ ।
[15]प्रकारौ भेदसादृश्ये [16]आकाराविङ्गिताकृती ॥१७०॥
[17]किंशारू सस्यशूकेषु मरू[18] धन्वधराधरौ ।
[19]अद्रयो द्रुमशैलार्काः स्त्रीस्तनाब्दौ [20]पयोधरौ ॥१७१॥

---

१ अफवाह, बाजार, युद्ध । २ अन्त्यज, अधम, लिंग । ३ निंद्य, अधीन, बयान । ४ नीरोग, प्रातःकाल । ५ बुद्धिमान्, धनी, याच्य वस्तु । ६ धर्म, पवित्र । ७ सुन्दर, सोना-चाँदी । ८ मृदुभाषी, दाता, उदार । ९ उचित, नीच । १० सुन्दर, सीधा, चन्द्रमाकी वस्तु । ११ समूह, पारी । १२ कुशशय्या, यज्ञ । १३ बृहस्पति, पिता, बड़े लोग । १४ युग, संशय । १५ विशेष, समता । १६ चेष्टा, इशारा, आकृति । १७ धान-जौका टूँड़, बाण । १८ रेगिस्तान, पर्वत । १९ वृक्ष, पर्वत, सूर्य । २० स्तन, मेघ, नारियल ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्वान्तारिदानवा [1]वृत्रा बलिहस्तांशवः [2]कराः ।
[3]प्रदरा भङ्गनारीरुग्बाणा [4]अस्राः कचा अपि ॥१७२॥
अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च [5]तूबरौ ।
स्वर्णेऽपि [6]राः [7]परिकरः पर्यङ्कपरिवारयोः ॥१७३॥
[8]मुक्ता शुद्धौ च तारः स्याच्छारो वायौ स तु त्रिपु ।
कर्बुरेऽथ प्रतिज्ञाजिसंविदापत्सु [10]संगरः ॥१७४॥
वेदभेदे गुप्तवादे [11]मन्त्रो [12]मित्रो रवावपि ।
मखेषु यूपखण्डेऽपि [13]स्वरुर्गुह्येऽप्यवस्क[14]रः ॥१७५॥
[15]आडम्बरस्तूर्यरवे गजेन्द्राणां च गर्जिते ।
[16]अभिहारोऽभियोगे च चौर्ये सन्नहनेऽपि च ॥१७६॥

---

१ अन्धकार, वृत्रासुर, शत्रु । २ टैक्स, हाथ, किरण । ३ स्त्रीरोग, बाण, भाँग । ४ केश, आँसू । ५ शृंगहीन बैल, खोफा । ६ धन, सुवर्ण । ७ बिछौना, परिवार । ८ मोतीकी सफाई, चाँदी, पार उतरना । ९ वायु, चितकबरा । १० प्रतिज्ञा, सभा, युद्ध । ११ वेदांश, गुप्त सलाह, देवसाधना । १२ सूर्य, मित्र । १३ यज्ञस्तम्भका छिलका, इन्द्रवज्र । १४ लिंग, योनि । १५ तुरहीका शब्द, गजगर्जन, तैयारी । १६ नालिश, चोरी आदि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

स्याज्जङ्गमे परीवारः खड्गकोषे परिच्छदे ।
विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् ॥१७७॥
द्वारि द्वाःस्थे प्रतीहारः प्रतीहार्यप्यनन्तरे ।
विपुले नकुले विष्णौ बभ्रुर्ना पिङ्गले त्रिषु ॥१७८॥
सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु ।
दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥१७९॥
महारण्ये दुर्गपथे कान्तारं पुन्नपुंसकम् ।
मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ।१८०॥
देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक्प्रिये ।
वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ॥१८१॥
ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम् ।
यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥१८२॥
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ।

---

१ परिजन, तलवारकी म्यान। २ आसन, वृक्ष, कुशमुष्टि। ३ द्वार, द्वारपाल। ४ बड़ा, नेवला, विष्णु। ५ पराक्रम, वृक्षका साल आदि। ६ जुआड़ी, जुआ, दावँ। ७ जंगल, बिल। ८ डाह, कृपण। ९ देवताका आशीर्वाद, श्रेष्ठ, किंचित् प्रिय वस्तु। १० बाँसका अंकुर, करीर वृक्ष, घट। ११ सेना, जाँघ, हस्तसूत्र। १२ यम, वायु, विष्णु आदि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

शर्करा कर्परांशेऽपि यात्रा स्याद्यापने गतौ ॥१८३॥
इरा भूवाक्सुराप्सु स्यात्तन्द्री निद्राप्रमीलयोः ।
धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ॥१८४॥
क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।
त्रिषु क्रूरेऽधमेऽल्पेऽपि क्षुद्रं मात्रा परिच्छदे ॥१८५॥
अल्पे च परिमाणे सा मात्रं कार्त्स्न्येऽवधारणे ।
आलेख्याश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः ॥१८६॥
योग्यभाजनयोः पात्रं पत्रं वाहनपक्षयोः ।
निदेशग्रन्थयोः शास्त्रं शस्त्रमायुधलोहयोः ॥१८७॥
स्याज्जटांशुकयोर्नेत्रं क्षेत्रं पत्नीशरीरयोः ।
मुखाग्रे क्रोडहलयोः पोत्रं गोत्रं तु नाम्नि च ॥१८८॥

---

१ खपड़ेके टुकड़े, कंकड़ी, चीनी । २ बिताना कहीं जाना । ३ पृथ्वी, वाणी, मेघ, जल । ४ नींद, खुमारी । ५ धाय, आँवला । ६ अंगहीन, वेश्या आदि । ७ ओहार, कम आदि । ८ तसबीर, विस्मय । ९ कमर, स्त्री । १० योग्य, बर्तन । ११ सवारी, पंख, पत्ती । १२ आज्ञा, ग्रंथ । १३ हथियार, लोहा । १४ जटादार वृक्ष, वस्त्र, आँख । १५ पत्नी, देह । १६ सुअर, हलका फाल । १७ नाम, कुल, पर्वत ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च ।
[2]अजिरं विषये कामेऽप्य[3]म्बरं व्योम्नि वाससि ॥१८९॥
[4]चक्रं राष्ट्रेऽप्य[5]क्षरं तु मोक्षेऽपि क्षीर[6]मप्सु च ।
स्वर्णेऽपि भू[7]रिचन्द्रौ द्वौ द्वारमात्रेऽपि [8]गोपुरम् ॥१९०॥
गुहादम्भौ ग[9]ह्वरे द्वे रहोऽन्तिकमु[10]पह्वरे ।
[11]पुरोऽधिकमुपर्यग्राण्यगारे नगरे [12]पुरम् ॥१९१॥
मन्दिरं चाथ [13]राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ।
[14]दरोऽस्त्रियां भये श्वभ्रे [15]वज्रोऽस्त्री हीरके पवौ ॥१९२॥
[16]तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे ।
[17]औशीरश्चामरे दण्डेऽप्यौशीरं शयनासने ॥१९३॥
[18]पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।

---

१ वस्त्र, यज्ञ, सदाबर्त । २ रूप-रस आदि विषय, शरीर, आँगन । ३ आकाश, वस्त्र, रूई । ४ राष्ट्र, पहिया, पाखण्ड । ५ मोक्ष, क-ख आदि वर्ण । ६ दूध, जल । ७ अधिक, सुवर्ण, विष्णु, चन्द्रमा । ८ द्वार, मोथा । ९ गुफा, दम्भ, घना । १० एकान्त, पास । ११ पहले, अधिक, ऊपर । १२ घर, नगर, मन्दिर । १३ देश, उपद्रव । १४ भय, गड्ढा । १५ हीरा, इन्द्रका वज्र । १६ प्रधान, सिद्धान्त, जुलाहा, वस्त्र । १७ चमरदण्ड, खसकी टट्टी, शयन । १८ हाथीकी सूँड़, नगाड़ेका मुख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः ॥१९४॥
[1]अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च ॥१९५॥
मुस्तेऽपि [2]पिठरं राजकशेरुण्यपि [3]नागरम् ।
[4]शार्वरं त्वन्धतमसे घातुके भेद्यलिङ्गकम् ॥१९६॥
[5]गौरोऽरुणे सिते पीते व्रणकार्यप्य[6]रुष्करः ।
[7]जठरः कठिनेऽपि स्यादधस्तादपि च[8]अधरः ॥१९७॥
अनाकुलेऽपि चैकाग्र्ये[9] व्यग्रो[10] व्यासक्तआकुले ।
उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः[11] स्यादनुत्तरः[12] ॥१९८॥
एषां विपर्यये श्रेष्ठे दूरानात्मोत्तमाः [13]पराः ।
स्वादुप्रियौ तु [14]मधुरौ [15]क्रूरौ कठिननिर्दयौ ॥१९९॥

---

१ दूरी, अवधि, अदृश्य आदि। २ मोथा, मथानी । ३ राजकसेरू, नागरमोथा। ४ घना अन्धकार, हिंसक। ५ लाल, पीला, सफेद। ६ घाव करनेवाला, भेलावा। ७ कठिन, पेट, बूढ़ा। ८ नीचे, निचला होंठ, हीन। ९ कर्मासक्त, अनाकुल। १० परेशान, घबड़ाया। ११ जवाब, ऊपर। १२ श्रेष्ठ, अश्रेष्ठ। १३ दूर, गैर, श्रेष्ठ, शत्रु। १४ स्वादिष्ट, प्रिय। १५ कठिन, निर्दयी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदारो दातृमहतोरितरस्त्वन्यनीचयोः ।
मन्दस्वच्छन्दयोः स्वैरः शुभ्रमुद्दीप्तशुक्लयोः ॥२००॥
चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ।
द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः ॥२०१॥
कृतान्तानेहसोः कालश्चतुर्थेऽपि युगे कलिः ।
स्यात्कुरङ्गेऽपि कमलः प्रचारेऽपि च कम्बलः ॥२०२॥
करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम् ।
स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ॥२०३॥
वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।
भेद्यलिंगः शठे व्यालः पुंसि श्वापदसर्पयोः ॥२०४॥

---

१ दाता, महान् । २ गैर, नीच । ३ स्वाधीन, धीरे काम करनेवाला । ४ तेजस्वी, सफेद । ५ चूडा, किरीट आदि । ६ वृक्षविशेष, बाण, हाथी आदि । ७ यम, समय, मृत्यु । ८ कलियुग, झगड़ा, फूलकी कली । ९ हिरन, जल, कमल-का फूल । १० ओढ़नेका कम्बल, गायके गलेका चमड़ा, वायु । ११ महसूल, सौगात, झुर्रियाँ, राजा बलि । १२ मोटाई, पराक्रम, सेना आदि । १३ आँधी, बकवादी, वात-व्याधि सहनेमें असमर्थ । १४ शठ, सर्प, दुष्ट हाथी, सर्प ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]मलोऽस्त्री पापविट्किट्टान्यस्त्री [2]शूलं रुगायुधम् ।
शङ्कावपि द्वयोः [3]कीलः [4]पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु ॥२०५॥
[5]कला शिल्पे कालभेदेऽप्याली [6]सख्यावली अपि ।
अब्ध्यम्बुविकृतौ [7]वेला कालमर्यादयोरपि ॥२०६॥
[8]बहुलाः कृत्तिका गावो बहुलोऽग्नौ शितौ त्रिषु ।
[9]लीला विलासक्रिययोरुपला[10] शर्करापि च ॥२०७॥
शोणितेऽम्भसि [11]कीलालं [12]मूलमाद्ये शिफाभयोः ।
[13]जालं समूह आनायगवाक्षक्षारकेष्वपि ॥२०८॥
[14]शीलं स्वभावे सद्वृत्ते सस्ये हेतुकृते [15]फलम् ।
छर्दिर्नेत्ररुजोः क्लीबं समूहे [16]पटलं न ना ॥२०९॥

---

१ पाप, विष्ठा, कीट । २ रोग, मृत्यु, ध्वजा, योग । ३ लौहशंकु लपट । ४ तलवारकी धार, गोद, चिह्न, पंक्ति । ५ कारीगरी, कालभेद, चन्द्रमाका सोलहवाँ भाग । ६ सहेली, श्रेणी । ७ ज्वार, समुद्रतट, समय । ८ कृत्तिका नक्षत्र, गौ, आग आदि । ९ विलास, कार्य । १० पत्थर, सिकता । ११ पानी, रक्त । १२ प्रथम, जड़, नक्षत्र । १३ समूह, जाल दंभ । १४ स्वभाव, सदाचार । १५ फल, परिणाम, त्रिफला । १६ समूह, नेत्ररोग आदि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधःस्वरूपयोरस्त्री तलं स्याच्चामिषे पलम् ।
और्वानलेऽपि पातालं चैलं वस्त्रेऽधमे त्रिषु ॥२१०॥
कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।
निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः ॥२११॥
पर्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ।
प्रवालमङ्कुरेऽप्यस्त्री त्रिषु स्थूलं जडेऽपि च ॥२१२॥
करालो दन्तुरे तुङ्गे चारौ दक्षे च पेशलः ।
मूर्खेऽर्भकेऽपि बालः स्याल्लोलश्चलसतृष्णयोः ॥२१३॥
दवदावौ वनारण्यवह्नी जन्महरौ भवौ ।
मन्त्री सहायः सचिवौ पतिशाखिनरा धवाः ॥२१४॥

---

१ निचला भाग, थप्पड़ । २ मांस, तौल । ३ बड़वानल, विवर, नागलोक । ४ कपड़ा, अधम । ५ कीलोंसे भरा गढ़ा, भूसीकी आग । ६ निश्चित, एक, सम्पूर्ण । ७ पूर्णता, कल्याण, पुण्य, शिक्षित । ८ मूँगा, नयी कोपल, वीणादण्ड । ९ मोटा, मूर्ख । १० बड़े दाँतवाला, ऊँचा । ११ सुन्दर, निपुण । १२ मूर्ख, बालक । १३ चंचल, लालची । १४ वन, वनकी आग । १५ जन्म, शिव । १६ राजाको सलाह देनेवाला, सहायक । १७ पति, वृक्ष, मनुष्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अंवयः शैलमेषार्का आज्ञाह्वानाध्वरा [2]हवाः ।
[3]भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु ॥२१५॥
स्यादुत्पादे फले पुष्पे [4]प्रसवो गर्भमोचने ।
अविश्वासेऽपह्नवेऽपि निकृतावपि [5]निह्नवः ॥२१६॥
उत्सेकामर्षयोरिच्छाप्रसरे मह [6]उत्सवः ।
[7]अनुभावः प्रभावे च सतां च मतिनिश्चये ॥२१७॥
स्याज्जन्महेतुः [8]प्रभवः स्थानं चाद्योपलब्धये ।
शूद्रायां विप्रतनये शस्त्रे [9]पारशवो मतः ॥२१८॥
[10]ध्रुवो भभेदे क्लीबे तु निश्चिते शाश्वते त्रिषु ।
[11]स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ।
स्त्रीकटीवस्त्रबन्धेऽपि [12]नीवी परिपणेऽपि च ।
[13]शिवा गौरीफेरवयोर्द्वन्द्वं[14] कलहयुग्मयोः ॥२२०॥

---

१ पर्वत, भेंड़, सूर्य । २ आज्ञा, बुलावा, यज्ञ । ३ सत्ता, स्वभाव आदि । ४ उत्पत्ति, फल आदि । ५ अविश्वास, भुठाई, दुष्टता । ६ उत्साह, कोप, इच्छाका वेग, उत्सव । ७ प्रभाव, विद्वानोंका मत । ८ ज्ञानोत्पत्तिका मूल स्थान, जन्म मूल । ९ शूद्र स्त्रीमें ब्राह्मणके संसर्गसे उत्पन्न पुत्र । १० नक्षत्र, निश्चित । ११ जात, आत्मा । १२ इजारबन्द, मूल-धन । १३ गौरी, सियार । १४ लड़ाई, दोकी संख्या ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु।
क्लीबं[2] नपुंसकं षण्डे वाच्यलिङ्गमविक्रमे ॥२२१॥
द्वौ [3]विशौ वैश्यमनुजौ द्वौ [4]चराभिमरौ स्पशौ।
द्वौ [5]राशी पुञ्जमेषाद्यौ द्वौ [6]वंशौ कुलमस्करौ ॥२२२॥
रहः [7]प्रकाशौ वीकाशौ [8]निर्वेशो भृतिभोगयोः।
कृतान्ते पुंसि [9]कीनाशः क्षुद्रकर्षकयोस्त्रिषु ॥२२३॥
पदे लक्ष्ये निमित्तेऽ[10]पदेशः [11]स्य रकुशमप्सु च।
[12]दशावस्थानेकविधाप्याशा[13] तृष्णापि चायता ॥२२४॥
[14]वशा स्त्री करिणी च स्याद्दृ[15]ग्ज्ञाने ज्ञातार त्रिषु।
[16]स्यात्कर्कशः साहसिकः कठोरामसृणावपि ॥२२५॥
[17]प्रकाशोऽतिप्रसिद्धेऽपि शिशावज्ञे च [18]बालिशः।

---

१ द्रव्य, प्राण आदि। २ नपुंसक, पौरुषहीन। ३ वैश्य मनुष्य। ४ गुप्तचर, युद्ध। ५ समूह भेष आदिका ढेर। ६ कुल, बाँस। ७ एकान्त, प्रकाश ८ वेतन भोग। ९ यम, क्षुद्र आदि। १० पद, लक्ष्य, बहाना। ११ कुशा, जल। १२ अवस्था, बत्ती, कपड़े का खूँट। १३ हवास, दिशा १४ स्त्री, हथिनी। १५ ज्ञान, ज्ञाता। १६ कठोर, साहसिक आदि। १७ प्रसिद्ध, धूप। १८ बालक, मूर्ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ॥२२६॥
सुरमत्स्यावनिमिषौ पुरुषावात्मभानवौ ।
काकमत्स्यात्खगौ ध्वाङ्क्षौ [5]कक्षौ तु तृणवीरुधौ ॥२२७॥
[6]अभीषुः प्रग्रहे रश्मौ [7]प्रैषः प्रेषणमर्दने ।
[8]पक्षः सहायेऽप्युष्णीषः[9] शिरोवेष्टकिरीटयोः ॥२२८॥
शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे [10]वृषः ।
द्यूतेऽक्षे शारिफलकेऽप्याक[11]र्षोऽथाक्ष[12]मिन्द्रिये ॥२२९॥
ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे ।
[13]कर्षूर्गर्ता करीषाग्निः कर्षूः कुल्याभिधायिनि ॥२३०॥
पुंभावे तत्क्रियायां च [14]पौरुषं [15]विषमप्सु च ।
उपादानेऽप्यामिषं[16] स्यादपराधेऽपि [17]किल्बिषम् ॥२३१॥

---

१ कलो, म्यान आदि । २ देवता मछली । ३ आत्मा, मनुष्य । ४ कौआ, मत्स्याहारी पक्षी । ५ तृण लता । ६ पगहा, किरण । ७ भेजना, मलना । ८ सहायक, पंख । ९ टोपी, पगड़ी, किरीट । १० अण्डकोष, चूहा श्रेष्ठ आदि । ११ जुआ पाँसा, बिसात । १२ इन्द्रिय, गोटी, पहिया आदि । १३ जीविका, नदी, कंडे की आग । १४ पुरुषत्व पौरुष का कार्य, सेवा । १५ जल, जहर । १६ घूस, मांस । १७ पाप, अपराध ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

स्याद्[1]वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।
[2]प्रेक्षा नृत्येक्षणं प्रज्ञा [3]भिक्षा सेवार्थना भृतिः ॥२३२॥
[4]त्विट् शोभापि त्रिषु परे [5]न्यक्षं कार्त्स्न्यनिकृष्टयोः ।
प्रत्यक्षेऽधिकृतेऽध्यक्षः[6] [7]रूक्षस्त्वप्रेम्ण्यचिक्कणे ॥२३३॥
रविश्वेतच्छदौ [8]हंसौ सूर्यवह्नी [9]विभावसू ।
[10]वत्सौ तर्णकवर्षौ द्वौ सारङ्गाश्च [11]दिवौकसः ॥२३४॥
शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे [12]रसः ।
[13]पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे ॥२३५॥
देवभेदेऽनले रश्मौ [14]वसू रत्ने धने वसु ।
विष्णौ च [15]वेधाः स्त्री [16]त्वाशीर्हिताशंसाहिदंष्ट्रयोः ॥२३६॥

---

१ वृष्टि, देशखण्ड, वर्ष । २ नृत्यदर्शन, बुद्धि । ३ सेवा, भिक्षा, नौकरी । ४ शोभा, कान्ति । ५ सम्पूर्ण, निकृष्ट । ६ प्रत्यक्ष, अधिकारी । ७ रूखा, प्रेमाभाव । ८ सूर्य, सफेद पंखका पक्षी । ९ सूर्य, अग्नि । १० बछड़ा, वर्ष । ११ चातक, देवता । १२ नौ रस, जहर, तेज । १३ कर्णफूल, चूडामणि । १४ अष्टवसु अग्नि, किरण । १५ विष्णु, ब्रह्मा । १६ कल्याणकी कामना, साँपका दाँत ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ल्लालसे प्रार्थनौत्सुक्ये [2]हिंसा चौर्यादिकर्म च ।
[3]प्रसूरश्वापि भूद्यावौ [4]रोदस्यौ रोदसी च ते ॥२३७॥
ज्वालाभासौ न पुंस्य[5]र्चिर्ज्यो[6]तिर्भद्योतदृष्टिषु ।
पापापराधयोरागः[7] खगबाल्यादिनोर्वयः[8] ॥२३८॥
तेजःपुरीषयोर्वर्चो[9] [10]महस्तूत्सवतेजसोः ।
[11]रजो गुणे च स्त्रीपुष्पे राहौ ध्वान्ते गुणे [12]तमः ॥२३९॥
[13]छन्दः पद्येऽभिलाषे च [14]तपः कृच्छ्रादिकर्म च ।
[15]सहो बलं सहा मार्गो [16]नभः खं श्रावणो नभाः ॥२४०॥
[17]ओकः सद्माश्रयश्चौकाः [18]पयः क्षीरं पयोऽम्बु च ।
[19]ओजो दीप्तौ बले [20]स्रोत इन्द्रिये निम्नगारये ॥२४१॥

---

१ प्रार्थना, उत्सुकता । २ चोरी आदि कुकर्म, वध । ३ घोड़ा, माता, लता । ४ पृथ्वी, आकाश । ५ लपट, दीप्ति । ६ नक्षत्र, प्रकाश । ७ पाप, अपराध । ८ अवस्था, पक्षी । ९ तेज, पुरीष. चन्द्रमाका पुत्र । १० उत्सव, तेज । ११ सत्त्वादि गुण, स्त्रीका रज । १२ राहु, अन्धकार, तमोगुण । १३ पद्य, अभिलाषा, स्वेच्छाचार । १४ कठिन व्रत, लोक-विशेष । १५ बल, अगहन । १६ आकाश, श्रावण । १७ घर, आश्रय । १८ दूध, जल । १९ तेज, बल, धातु । २० इन्द्रिय और नदीका वेग ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्यतस्त्रिषु ।
[2]विद्वान्विदंश्च [3]बीभत्सो हिंस्रोऽप्यतिशये त्वमी ॥२४२॥
वृद्धप्रशस्ययो[4]र्ज्यायान्[5]कनीयांस्तु युवाल्पयोः ।
[6]वरीयांस्तूरुवरयोः [7]साधीयान्साधुबाढयोः ॥२४३॥
दलेऽपि [8]बर्हं निर्बन्धोपरागार्कादयो [9]ग्रहाः ।
द्वार्यापीडे क्वाथरसे [10]निर्व्यूहो नागदन्तके ॥२४४॥
तुलासूत्रेऽश्वादिरश्मौ [11]प्रग्राहः प्रग्रहोऽपि च ।
पत्नीपरिजनादानमूलशापाः [12]परिग्रहाः ॥२४५॥
दारेषु च [13]गृहाः श्रोण्यामप्या[14]रोहो वरस्त्रियाः ।
[15]व्यूहो वृन्देऽप्य[16]हिर्वृत्रेऽप्यग्नीन्द्वर्कास्त[17]मोपहाः २४६
परिच्छदे नृपार्हेऽर्थे [18]परिबर्होऽव्ययाः परे ।

---

१ प्रभाव, बल, कान्ति, वीर्य । २ विद्वान्, जानकार । ३ हिंसक, अति । ४ वृद्ध, प्रशंसनीय । ५ युवा, बहुत छोटा । ६ बहुत बड़ा, बहुत अच्छा । ७ बहुत दृढ़, अच्छा । ८ पत्ता, मोरपंख । ९ आग्रह, ग्रहण, युद्धोद्योग । १० द्वार, चूड़ामणि, काढ़ा, खूँटी । ११ तुलामूल, पगहा, कैदी । १२ स्त्री, परिवार आदि । १३ पत्नी, घर । १४ स्त्रीकी कमर, चढ़ना, लम्बाई । १५ व्यूह, समूह । १६ सर्प, वृत्रासुर । १७ आग, चन्द्रमा, सूर्य । १८ राजाकी सामग्री, राजाके योग्य सामान ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥२४७॥
आ प्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात्कोपपीडयोः ।
[3]पापकुत्सेषदर्थे कु धिङ्[4] निर्भर्त्सननिन्दयोः ॥२४८॥
[5]चान्वाचयसमाहारेतरेतरसमुच्चये ।
स्व[6]स्त्याशीः क्षेमपुण्यादौ प्रकर्षे लङ्घनेऽप्यति ॥२४९॥
[8]स्वित्प्रश्ने च वितर्के च तु[9] स्याद्भेदेऽवधारणे ।
[10]सकृत्सहैकवारे [11]चाप्याराद्दूरसमीपयोः ॥२५०॥
प्रतीच्यां चरमे [12]पश्चादु[13]ताप्यर्थविकल्पयोः ।
पुनः सहार्थयोः[14] शश्वत्सा[15]क्षात्प्रत्यक्षतुल्ययोः ॥२५१॥
खेदानुकम्पासन्तोषविस्मयामन्त्रणे [16]बत ।
[17]हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥२५२॥

---

१ थोडा, समस्त आदि । २ कोप, पीडा । ३ पाप, निन्दा । ४ लानत, निन्दा । ५ अन्वाचय, समूह । ६ आशीष, कुशल, पुण्य । ७ प्रकर्ष, लंघन, स्तुति । ८ प्रश्न, तर्क । ९ भेद निश्चय । १० साथ, एक बार । ११ दूर, समीप । १२ पीछे, पश्चिम दिशा । १३ समुच्चय, विकल्प । १४ बार बार, सदा, साथ । १५ प्रत्यक्ष, समान । १६ खेद, कृपा आदि । १७ हर्ष दया आदि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]इति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः।
[2]इति हेतुप्रकरणप्रकाशादिसमाप्तिषु ॥२५३॥
[3]प्राच्यां पुरस्तात्प्रथमे पुरार्थेऽग्रत इत्यपि।
[4]यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ॥२५४॥
[5]मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ।
[6]वृथा निरर्थकाविध्योर्नाना[7]ऽनेकोभयार्थयोः ॥२५५॥
[8]नु पृच्छायां विकल्पे च [9]पश्चात्सादृश्ययोरनु।
प्रश्नावधारणानुज्ञानुनयामन्त्रणे [10]ननु ॥२५६॥
गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि[11]।
उपमायां विकल्पे [12]वा [13]सामि त्वर्धे जुगुप्सिते ॥२५७॥
[14]अमा सह समीपे च [15]कं वारिणि च मूर्धनि।
इवेत्थमर्थयोरेवं[16] नूनं[17] तर्केऽर्थनिश्चये ॥२५८॥

---

१ प्रतिनिधि, लक्षण आदि। २ हेतु, प्रकरण आदि। ३ प्रथम, पूर्व दिशा आदि। ४ सम्पूर्ण, सीमा आदि। ५ मंगल, आरंभ आदि। ६ वृथा, निरर्थक। ७ अनेक, उभय। ८ प्रश्न, विकल्प। ९ पश्चात्, सादृश्य। १० प्रश्न, निश्चय आदि। ११ निन्दा, समुच्चय आदि। १२ उपमा, विकल्प। १३ आधा, निन्दित। १४ साथ, समीप। १५ जल, मस्तक। १६ तुल्य, इस तरह। १७ तर्क, अर्थका निश्चय।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

तूष्णीमर्थे सुखे [1]जोषं किं[2] पृच्छायां जुगुप्सने ।
नाम[3] प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने ॥२५९॥
अलं[4] भूषणपर्याप्तिशक्तिवारणवाचकम् ।
[5]हुं वितर्के परिप्रश्ने समया[6]न्तिकमध्ययोः ॥२६०॥
पुनर[7]प्रथमे भेदे [8]निर्निश्चयनिषेधयोः ।
स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा[9] ॥२६१॥
[10]ऊर्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ।
स्वर्गे परे च लोके [11]स्वर्वार्तासम्भाव्ययोः किल[12] ॥२६२॥
[13]निषेधवाक्यालङ्कारजिज्ञासानुनये खलु ।
समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः[14] ॥२६३॥
नामप्राकाश्ययोः [15]प्रादुर्मिथो[16]ऽन्योन्यं रहस्यपि ।

---

१ सुख, चुपचाप । २ प्रश्न, निन्दा । ३ प्रसिद्धि, क्रोध आदि । ४ भूषण, पूर्ण आदि । ५ विकल्प, फिरसे पूछना । ६ समीप, मध्य । ७ प्रथमके बाद । ८ निश्चय, निषेध । ९ प्रबन्ध, पुरानी बात, निकट आदि । १० विस्तार, अंगीकार । ११ स्वर्ग, परलोक । १२ वार्ता, संभावना । १३ निषेध, वाक्यालंकार, जिज्ञासा, अनुनय । १४ समीप, दोनों तरफ आदि । १५ नाम, प्रकट । १६ परस्पर, एकान्त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]तिरोऽन्तर्धौ तिर्यगर्थे हा विषादशुगर्तिषु ॥२६४॥
[3]अहहेत्यद्भुते खेदे [4]हि हेतावत्रावधारणे ॥

इति नानार्थवर्गः ।

—❀—

४ अथ अव्ययवर्गः ।

[5]चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः ।
[6]मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः ॥ १ ॥
[7]स्राग्झटित्यञ्जसाह्नाय द्राङ् मङ्क्षु सपदि द्रुते ।
[8]बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २ ॥
[9]पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने ।
[10]यत्तद्यतस्ततो हेतावसाकल्ये तु [11]चिच्चन ॥ ३ ॥

---

१ अन्तर्धान, तिरछा । २ विषाद, शोक, पीड़ा । ३ अति अद्भुत, खेद । ४ कारण, निश्चय । ५ दीर्घकालवाचक ३ नाम । ६ बारम्बारवाचक ५ नाम । ७ शीघ्रतावाचक ८ नाम । ८ अतिशयवाचक ६ नाम । ६ पृथक्वाचक ६ नाम । १० हेतुवाचक ४ नाम । ११ न्यूनार्थवाचक २ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]कदाचिज्जातु [2]सार्धं तु साकं सत्रा समं सह ।
[3]आनुकूल्यार्थकं प्राध्वं [4]व्यर्थके तु वृथा मुधा ॥ ४ ॥
[5]आहो उताहो किमुत विकल्पे किं किमूत च ।
[6]तु हि च स्म ह वै पादपूरणे [7]पूजने स्वति ॥ ५ ॥
[8]दिवाह्नीत्यथ [9]दोषा च नक्तं च रजनाविति ।
[10]तिर्यगर्थे साचि तिरोऽप्यथ [11]सम्बोधनार्थकाः ॥ ६ ॥
स्युः प्याट् पाडङ्ग हे है भोः [12]समया निकषा हिरुक् ।
अतर्किते तु [13]सहसा [14]स्यात्पुरः पुरतोऽग्रतः ॥ ७ ॥
[15]स्वाहा देवहविर्दाने श्रौषट् वौषट् वषट् स्वधा ।
[16]किञ्चिदीषन्मनागल्पे [17]प्रेत्यामुत्र भवान्तरे ॥ ८ ॥

---

१ किसी समय वाचक २ नाम। २ साथवाचक ५ नाम। ३ अनुकूलतावाचक १ नाम। ४ व्यर्थवाचक २ नाम। ५ विकल्पवाचक ६ नाम। ६ पादपूरणार्थक ६ नाम। ७ पूजार्थक २ नाम। ८ दिवार्थक २ नाम। ९ रात्रिवाचक २ नाम। १० टेढ़ा अर्थवाचक २ नाम। ११ सम्बोधनवाचक ६ नाम। १२ समीपवाचक ३ नाम। १३ अकस्मात्का १ नाम। १४ आगेके ३ नाम। १५ देव-पितरको हवि देनेके अर्थमें ५ नाम। १६ थोड़ेके ३ नाम। १७ जन्मान्तरके २ नाम।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

वं वा यथा तथैवैवं साम्येऽहो ही च विस्मये ।
मौने तु तूष्णीं तूष्णीकां सद्यः सपदि तत्क्षणे ॥ ९ ॥
दिष्ट्या समुपजोषं चेत्यानन्देऽथान्तरेऽन्तरा ।
अन्तरेण च मध्ये स्युः प्रसह्य तु हठार्थकम् ॥१०॥
युक्ते द्वे साम्प्रतं स्थानेऽभीक्ष्णं शश्वदनारते ।
अभावे नह्य नो नापि मास्म मालं च वारणे ॥११॥
पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाञ्जसा द्वयम् ।
प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते ॥१२॥
समन्ततस्तु परितः सर्वतो विष्वगित्यपि ।
अकामानुमतौ काममसूयोपगमेऽस्तु च ॥१३॥

---

१ समानताके ६ नाम । २ विस्मयवाचक २ नाम । ३ मौनवाचक २ नाम । ४ तत्कालवाचक ३ नाम । ५ आनन्दवाचक २ नाम । ६ मध्यवाचक ३ नाम । ७ हठवाचक १ नाम । ८ न्यायवाचक २ नाम । ९ निरन्तरवाचक २ नाम । १० अभाववाचक ४ नाम । ११ निषेधवाचक ३ नाम । १२ पक्षान्तरवाचक २ नाम । १३ तत्त्वार्थवाचक २ नाम । १४ प्रकटवाचक २ नाम । १५ अंगीकारके ३ नाम । १६ सब ओर वाचक ४ नाम । १७ अनिच्छासे दी हुई सलाहका १ नाम । १८ ईर्ष्यापूर्वक स्वीकारवाचक १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]ननु च स्याद्विरोधोक्तौ [2]कच्चित्कामप्रवेदने ।
[3]निःषमं दुःसमं गर्ह्ये [4]यथास्वं तु यथायथम् ॥१४॥
[5]मृषा मिथ्या च वितथे [6]यथार्थं तु यथायथम् ।
[7]स्युरेवं तु पुनर्वै वेत्यवधारणवाचकाः ॥ १५ ॥
[8]प्रागतीतार्थकं नूनमवश्यं निश्चये द्वयम् ।
[9]संवद्वर्षेऽवरे त्वर्वागामेवं स्वयमात्मना ॥ १६ ॥
[10]अल्पे नीचैर्महत्युच्चैः प्रायो भूम्न्यद्रुते शनैः ।
[11]सना नित्ये बहिर्बाह्ये स्मातीतेऽस्तमदर्शने ॥ १७ ॥
[12]अस्ति सत्त्वे रुषोक्तावु ऊं प्रश्नेऽनुनये त्वयि ।

---

१ विरोधोक्तिवाचक १ नाम । २ अभिलषित प्रश्नवाचक १ नाम । ३ निन्दितवाचक २ नाम । ४ यथायोग्यवाचक २ नाम । ५ मिथ्यावाचक २ नाम । ६ असत्य २ तथा यथार्थ वाचक २ नाम । ७ निश्चयवाचक ५ नाम । ८ भूतकालका १ और निश्चितवाचक २ नाम । ९ वर्षका १ प्रथमका १, अंगीकारका २ और अपना वाचक १ नाम । १० अल्प १, उच्च १, बाहुल्यार्थका १ और मन्दार्थका १ नाम । ११ नित्यका १, बाहरका १, अतीतार्थका १ और आदर्शवाचक १ नाम । १२ विद्यमानार्थका १, कोपयुक्त वाक्यका १, प्रश्नार्थका १ और अनुनयवाचक १ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

[1]हुं तर्के स्यादुपा रात्र्यवसाने नमो नतौ ॥ १८ ॥
[2]पुनरर्थेऽङ्ग निन्दायां दुष्ठु सुष्ठु प्रशंसने ।
[3]सायं साये प्रगे प्रातः प्रभाते निकषान्तिके ॥ १९ ॥
[4]परुत्परार्यैषमोऽब्दे पूर्वे पूर्वतरे यति ।
[5]अद्यात्राह्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात् ॥ २० ॥
तथाधरान्यान्यतरतरात्पूर्वेद्युरादयः ।
[6]उभयद्युश्चोभयेद्युः परे त्वह्नि परेद्यवि ॥ २१ ॥
ह्यो गतेऽनागतेऽह्नि श्वः परश्वस्तु परेऽहनि ।
[7]तदा तदानीं युगपदेकदा सर्वदा सदा ॥ २२ ॥
[8]एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा ।
[9]दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः ॥ २३ ॥

इति अव्ययवर्गः ।

---

१ तर्कार्थमें १, रात्र्यन्तका १ और नमस्कारार्थमें १ नाम । २ पुनः वाचक १, निन्दावाचक १ तथा प्रशंसावाचक १ नाम । ३ सायं अर्थमें १, प्रातः अर्थमें २ और समीपवाचक १ नाम । ४ वर्षके ३ नाम । ५ आज दिनवाचक १ और अगले-पिछले दिनोंके ७ नाम । ६ दोनों दिनवाचक २, बीते दिनका १, आगामी कलका १ और परसोंका १ नाम । ७ उस समयका २, एक समयके २ और सब समयके २ नाम । ८ इस समय वाचक [illegible] ३ नाम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५ अथ लिङ्गादिसंग्रहवर्गः ।

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं संकीर्णवदिहोन्नयेत् ॥ १ ॥
लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।
स्त्रियामीदूद्विरामैकाच्सयोनिप्राणिनाम च ॥ २ ॥
नाम विद्युन्निशावल्लीवीणादिग्भूनदीह्रियाम् ।
अदन्तैर्द्विगुरेकार्थो न स पात्रयुगादिभिः ॥ ३ ॥

---

१ पाणिनि आदि मुनियोंने कृदन्त, तद्धित, समास आदिके सन् आदि प्रत्ययोंसे बने जिन शब्दोंका लिंगनिर्देश नहीं किया था, उनका यहां संकीर्णवत् लिंगादि संग्रह किया जा रहा है। २ पहलेके वर्गोंमें जिन शब्दोंका लिंगनिर्देश किया जा चुका है, उनके अतिरिक्त लिंग लिंगशेष कहलाते हैं। यदि यहाँ पूर्वोक्त विशेष इसमें बाधक न हों तो उस लिंगशेषका विधान व्यापक होगा और पूर्वोक्त तीनों काण्डोंमें उनकी पहुँच होगी। ३ ईकार, ऊकार तथा एकस्वरयुक्त शब्द स्त्रीलिंग माने जाते हैं। ४ विद्युत् आदि आठ नाम स्त्री लिंग हैं। ५ जहाँ अदन्त उत्तर पदमें एकार्थक द्विगु समास हुआ हो, वे शब्द भी स्त्रीलिंग होते हैं। ६ पात्र युग आदि उत्तर पदमें हों तो एकार्थक द्विगु होनेपर भी स्त्रीत्व नहीं होता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]तल्वृन्दे येनिकच्यत्रा वैरमैथुनिकाविवुन्।
स्त्रीभावादावनिक्तिण्वुल्णच्ण्वुच्क्यब्युजिञङ्निशाः ॥४॥
[2]उणादिषु निरूरीश्च ङ्याबूङन्तं चलं स्थिरम्।
[3]तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा णं दिक् ॥ ५ ॥
[4]घञो ञः सा क्रियाऽस्यां चेद्दाण्डपाता हि फाल्गुनी।
श्यैनम्पाता च मृगया तैलम्पाता स्वधेति दिक् ॥ ६ ॥
[5]स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षाऽपचये यदि।
लङ्का शेफालिका [6]टीका धातकी पञ्जिकाऽऽढकी ॥ ७ ॥

---

१ तल्प्रत्यान्त. समूह, इनिकच्यत्रप्रत्ययान्त, वैर-मैथुनके अर्थमें प्रयुक्त वुन्प्रत्ययान्त, 'स्त्रियाम्' इस अधिकारमें प्रयुक्त अनि, क्तिन्, ण्वुल्, णच्, ण्वुच्, क्यप्, युच्, इञ्, अङ् और शप्रत्ययान्त शब्द भी स्त्रीलिंग होते हैं। २ उणादिमें निः ऊः ईः प्रत्ययान्त शब्द स्त्रीलिंग होते हैं। ३ क्रीडा अर्थमें प्रयुक्त णप्रत्ययान्त शब्द भी स्त्रीलिंग होते हैं। ४ फाल्गु-न्यादि अर्थमें घञन्तसे विहित ञप्रत्ययान्त शब्द स्त्रीलिंग होते हैं। ५ अपचय अर्थमें विवक्षित मृणाली आदि शब्द स्त्रीलिंग होते हैं। पूर्वोक्त स्त्री. आ. ऊ आदि शब्दोंका संकेत किया गया है। यहाँ उनमेंसे कुछ शब्दोंका संग्रह किया जा रहा है। जैसे--लंका आदि। ६ विषम पदकी व्याख्या। ७ सब पदोंकी व्याख्या।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]सिध्रका सारिका हिक्का [2]प्राचिकोल्का पिपीलिका ।
तिन्दुकी [3]कणिका [4]भंगिः सुरङ्गासूचिमाढयः ॥ ८ ॥
[5]पिच्छावितण्डाकाकिण्यश्चूर्णिः [6]शाणी [7]द्रुगी [8]दरत् ।
सातिः [9]कन्था तथाऽऽसन्दी[10] नाभी राजसभाऽपि च ॥९॥
झल्लरी [11]चर्चरी [12]पारी [13]होरा [14]चटका च [15]सिध्मला ।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥ १० ॥

अथ पुँल्लिङ्गसंग्रहः ।

पुंस्त्वे[16] सभेदानुचराः सपर्यायाः सुरासुराः ।
[17]स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः ॥ ११ ॥

---

१ वृक्षविशेष । २ वनमक्षिका । ३ परमाणु । ४ कुटिलता । ५ सेमरकी गोंद । ६ टसर । ७ कछुई । ८ म्लेच्छ । ९ कथरी । १० खटोला । ११ ताली बजाना । १२ हाथीका पैर बाँधनेवाला रस्सा । १३ लग्नका आधा । १४ नर गौरैया । १५ सूखी मछली । १६ देवता या दैत्योंके पर्यायवाची सभी शब्द पुँल्लिङ्ग होते हैं । १७ स्वर्ग, याग, पर्वत, मेघ, समुद्र, वृक्ष, काल, असि, शर और अरिशब्दके पर्यायवाची सभी शब्द पुँल्लिङ्ग होते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

[1]करगण्डोष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।
अह्नाह्नान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः ॥१२॥
श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।
कशेरुजतुवस्तूनि हित्वा तुरुविरामकाः ॥ १३ ॥
[3]कषणभमरोपान्ता यद्यदन्ता अमी अथ ।
[4]पथनयसटोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥
[5]नाम्न्यकर्तरि भावे च घञजठनङणघाथुचः ।
ल्युः कर्तरीमनिज्भावे को घोः[6] किः प्रादितोऽन्यतः ॥१५॥

---

१ कर-गण्ड आदि, अह्नान्त, विषके पर्यायवाची और रात्रान्त सभी शब्द पुँल्लिङ्ग होते हैं। २ श्रीवेष्ट आदि गोंदके पर्यायवाची, असन्त, अन्नन्त एवं कसेरू और जतु शब्दको छोड़कर बाकी सभी रु और तु जिनके अन्तमें पड़े हों वे सभी शब्द पुँल्लिङ्ग होते हैं। ३ जिन अदन्त शब्दोंके अन्तमें क ष ण भ और र अक्षर पड़े हों वे पुँल्लिङ्ग होते हैं। ४ जिन शब्दोंके अन्तमें प थ न य स ट ये अक्षर पड़े हों, वे भी पुँल्लिङ्ग होते हैं। ५ कर्तासे भिन्न कारक, संज्ञा या भावमें विहित घञ् आदि सात प्रत्ययान्त शब्द पुँल्लिग होते हैं। ६ कर्तामें प्रयुक्त ल्यु भाव अर्थमें प्रयुक्त इमनिच्, भाव अर्थमें प्रयुक्त क-प्रत्ययान्त एवं प्र आदि उपसर्ग अथवा कोई भी शब्द आदिमें हो तो घुसंज्ञक धातुसे विहित कि प्रत्यय भी पुँल्लिग होता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[१]द्वन्द्वेऽश्ववडवावश्ववडवा न समाहृते ।
कान्तः [२]सूर्येन्दुपर्यायपूर्वो[३]ऽयःपूर्वकोऽपि च ॥ १६ ॥
[४]वटकश्चा[५]नुवाकश्च [६]रल्लकश्च [७]कुडङ्गकः ।
पुङ्खो [८]न्यूङ्खः [९]समुद्गश्च [१०]विटपट्टघटाः [११]खटाः ॥ १७ ॥
[१२]कोट्टारघट्टहट्टाश्च पिण्डगोण्डपिचण्डवत् ।
गडुः करण्डो लगुडो [१३]वरण्डश्च [१४]किणो घुणः ॥ १८ ॥
[१५]दृतिसीमन्तसरितो [१६]रोमन्थोद्गीथबुद्बुदाः ।
कासमर्दोऽर्बुदः[१७] कुन्दः फेनस्तूपौ सयूपकौ ॥ १९ ॥
आतपः क्षात्रिये नाभिः [१८]कुणपक्षुरकेदराः ।
पूरक्षुरप्रचुक्राश्च गोलहिञ्जुलपुद्गलाः ॥ २० ॥

---

१ समाहारके अतिरिक्त द्वन्द्व समासमें अश्ववडव शब्द पुंल्लिग होता है। २ सूर्य या चन्द्रके पर्यायवाची शब्दोंके अन्तमें कान्त शब्द पड़ा हो तो वह भी पुंलिंग होता है। ३ अयस् शब्दके अन्तमें कान्त शब्द पड़ा हो तो वह भी पुल्लिङ्ग हो जाता है। ४ वड़ा। ५ वेदांश। ६ कम्बल। ७ झाड़ी। ८ सामवेदका ओंकार। ९ पेटारा। १० तराजू। ११ अन्धकूप। १२ दुर्गपुर। १३ मुँहासा। १४ मांसग्रन्थि। १५ चमड़ेकी पेटी। १६ पागुर करना। १७ दस करोड़। १८ मुर्दा, अति दुर्गन्धि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

वेतालभल्लमल्लाश्च पुरोडाशोऽपि पट्टिशः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥

अथ नपुंसकलिंगसंग्रहः ।

[4]द्विहीनेऽन्यच्च खारण्यपर्णश्वभ्रहिमोदकम् ।
शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बलम् ॥ २२ ॥
फलहेमशुल्बलोहसुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥
[5]कोट्याः शतादिसंख्याऽन्या वा लक्षा नियुतं च तत् ।
द्व्यच्कमसिसुसन्नन्तं यदनान्तमकर्तरि ॥ २४ ॥

---

१ पटा बनेठी । २ काँजी । ३ पीकदान । ४ 'द्विहीने' इस वाक्यका आगामी बत्तीसवें श्लोकके 'वाह्लिकम्' तक अधिकार है । इस बीचमें खादि तथा इनके पर्यायवाची सभी शब्द नपुंसक लिंग होंगे । ५ कोटि (करोड़) शब्दको छोड़कर 'शतं सहस्रं' आदि सभी संख्यावाचक शब्द नपुंसक लिंग होते हैं । लक्षा शब्द विकल्पसे नपुंसक होता है, किन्तु इसीका पर्यायवाची नियुत शब्द नित्य नपुंसक लिंग होता है । इनके अतिरिक्त असन्त, इसन्त, उसन्त और अन्नन्त आदि दो अच्वाले सभी शब्द नपुंसक लिंग होते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC-0. In Public Domain, Digitization by eGangotri

त्रान्तं सलोपधं शिष्टं रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्यदन्तैरेकार्थो द्विगुर्लक्ष्यानुसारतः ॥ २५ ॥
द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात्परः ।
षष्ठ्यश्छाया बहूनां चेद्विच्छायं संहतौ सभा ॥ २६ ॥
शालार्थापि परा राजाऽमनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥

---

१ त्रान्त, सल उपधामें जिनके हों वे और संख्यायुक्त रात्रशब्द भी नपुंसक लिंग होता है। अदन्त पात्र आदि शब्दोंके साथ जहाँ एकार्थमें द्विगु समास हुआ हो, वे शब्द भी नपुंसक लिंग होते हैं। २ जहाँ द्वन्द्व समासकी एकता हो, जहाँ अव्ययीभाव समास हो, जहाँ संख्या और अव्यय शब्दसे परे पथिन् शब्द हो, समासमें षष्ठी विभक्तिसे परे छायाशब्द हो और समूह अर्थमें सभा शब्दका प्रयोग हुआ हो वे सब नपुंसक लिंग होते हैं। ३ राजशब्दके अतिरिक्त राजके पर्यायवाची शब्दोंके साथ यदि सभा शब्द घरके अर्थमें प्रयुक्त हो, यदि मनुष्यके अतिरिक्त राक्षस-पिशाचादि षष्ठीसे परे सभाशब्द हो तथा समुदायके अर्थमें जहाँ सभाशब्दका प्रयोग हुआ हो वह भी नपुंसक लिंग हो जाता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

[1]उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादि कन्थोशीनरनामसु ॥ २८ ॥
[2]भावे नणकचिद्भ्योऽन्ये समूहे भावकर्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वह्नः परः ॥ २९ ॥
[3]क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके ।
चोचं पिच्छं गृहस्थूणं तिरीटं मर्म योजनम् ॥ ३० ॥
राजसूयं वाजपेयं गद्यपद्ये कृतौ कवेः ।
माणिक्यभाष्यसिन्दूरचीरचीवरपिञ्जरम् ॥ ३१ ॥
लोकायतं हरितालं विदलस्थालबाह्लिकम् ।

अथ पुंनपुंसकलिंगसंग्रहः ।

[4]पुंनपुंसकयोः शेषोऽर्धर्चपिण्याककण्टकाः ॥ ३२ ॥

---

१ जहाँ उपज्ञा और उपक्रम शब्दका प्राथम्य प्रकाशित करना हो ऐसे उपज्ञान्त और उपक्रमान्त शब्द भी नपुंसकलिंग होते हैं। षष्ठ्यन्तसे परे कन्था और उससे परेका तत्पुरुष भी नपुंसकलिंग होता है। २ न ण क च ये वर्ण जिस प्रत्ययमें इत्संज्ञक हों, भावमें विहित अदन्त एवं समूह अर्थमें यान्तशब्द नपुंसक लिंग होते हैं। ३ क्रिया और अव्ययके पृथक् करनेवाले सभी विशेषण नपुंसक लिंग और एक वचन होते हैं। ४ यहाँसे लेकर ३५वें श्लोकके 'चमस-चिक्कसोः' तक 'पुंनपुंसकयोः' इस वाक्यका अधिकार है। अतएव इसके अन्तर्गत सभी शब्द पुँल्लिंग और नपुंसक दोनों होंगे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

मोदकस्तण्डकष्टङ्कः शाटकः कर्पटोऽर्बुदः ।
पातकोद्योगचरकतमाल्यामलका नडः ॥ ३३ ॥
कुष्ठ मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेमकुट्टिमम् ।
सङ्गमं शतमानाऽर्मशम्बलाव्ययताण्डवम् ॥ ३४ ॥
कवियं कन्दकार्पासं पारावारं युगन्धरम् ।
यूपं प्रग्रीवपात्रीवे यूपं चमसचिक्कसौ ॥ ३५ ॥
अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥

अथ स्त्रीपुंसशेषसंग्रहः ।

[२]स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥ ३७ ॥

---

१ पाणिनि आदि आचार्योंने जो घृतादि शब्दोंको पुँल्लिंगमें गिनाया है, वह वैदिक हैं। इसीसे उनकी गणना नहीं की गयी। यदि लौकिक व्यवहारमें भी वे शब्द देखे जायें तो शिष्टजनोंके प्रयोगानुसार उन्हें पुँल्लिंग या नपुंसक समझना चाहिए। २ सभी अपत्यप्रत्ययान्ति द्विपद, चतुष्पद, षट्पद जातिभेदवाची सर्पवाची एवं पुँल्लिंग शब्द भी स्त्रीसे युक्त होकर पुं और स्त्री दोनों लिंग हो जाते हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऊर्मिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः ।
मूषा सृपाटी कर्कन्धुर्यष्टिः शाटी कटी कुटी ॥ ३८ ॥

अथ स्त्रीनपुंसकसंग्रहः ।

[1]स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्री मैत्र्यं वुञ्प्रागुदाहृतः ॥ ३९ ॥
[3]षष्ठ्यन्तप्राक्पदाः सेनाछायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ॥ ४० ॥
[4]आबन्तोत्तरपदो द्विगुश्चापुंसि नश्च लुप् ।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्यपि ॥ ४१ ॥

---

१ घरिया । २ भाव और कर्ममें विहित ष्यञ् और वुञ्-प्रत्ययान्त शब्द कहीं स्त्री और कहीं नपुंसक होते हैं । ३ तत्पुरुष समासमें षष्ठ्यन्त प्राक्पदमें विद्यमान सेना, छाया, शाला, सुरा, निशा आदि शब्द स्त्री तथा नपुंसक दोनों होते हैं । ४ जहाँ आबन्त और अन्नन्त शब्द उत्तर पदमें हो, ऐसा द्विगु समास [illegible] स्त्री [illegible] नपुंसक लिङ्ग होता और

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ त्रिलिंगशेषसंग्रहः ।

[१]त्रिषु पात्री पुटी वाटी पेटी कुवलदाडिमौ ।
[२]परं लिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ॥ ४२ ॥
[३]अर्थान्ताः प्राद्यलम्प्राप्तापन्नपूर्वाः परोपगाः ।
तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ॥ ४३ ॥
[४]बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् ।

---

१ पात्र, पुटी, वाटी, पेटी, कुवल और दाडिम शब्द पुं-स्त्री-नपुंसक तीनों लिंग होते हैं। २ उभयपदप्रधान इतरेतर द्वन्द्व तथा तत्पुरुष समासमें अग्रिम पदका जो लिंग हो, वही उसका भी माना जायगा। ३ जिनके अर्थ शब्द हो, वे सभी शब्द परवर्ती शब्दके लिंगवाले हो जायँगे। प्रादि उपसर्ग, अलं, प्राप्त और आपन्न शब्द पूर्वमें हों, वे सभी शब्द परशब्दके लिंगवाले हो जाते हैं। इसी प्रकार तद्धितार्थ द्विगु, संख्यावाचक, सर्वनामसंज्ञक तथा जिनके अन्तमें सर्वनामसंज्ञक शब्द हों वे भी परवल्लिंग हो जाते हैं। ४ दिग्वाचक नामसे भिन्न बहुव्रीहि अन्य लिंगका हो जाता है। गुण, द्रव्य या क्रियायोगका विशेषण जहाँ जिस धर्मीमें प्रवृत्त होता है तो धर्मीका जो लिंग उस विशेषणका भी हो जाता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः ॥ ४४ ॥
कृतः कर्तर्यसंज्ञायां कृत्याः कर्तरि कर्मणि ।
अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥ ४५ ॥
षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥
इत्यमरसिंहकृतौ नामलिंगानुशासने ।
सामान्यकाण्डस्तृतीयः साङ्ग एव समर्थितः ॥ ४७ ॥

इति लिङ्गादिसंग्रहवर्गः ।

---

१ जहाँ असंज्ञा अर्थमें प्रत्यय हों वे और कर्म तथा कर्तामें विद्यमान कृत्प्रत्यय परवल्लिंग हो जाते हैं। 'तेन रक्तम्' इत्यादि अर्थमें विहित अणादि प्रत्यय, अणाद्यन्त नानार्थवाची विशेषण तथा विशेष्य शब्द वाच्यलिंग होते हैं। २ षट्संज्ञक, युष्मद्, अस्मद्, तिङन्त और अव्यय शब्द तीनों लिंगोंमें होते हैं। जहाँ लिंगविधायक वचनका विरोध उपस्थित हो वहाँ दूसरा लिंगानुशासन मान लिया जायगा। यहाँ जिन शब्दोंका लिंगनिर्देश नहीं किया जा सका है, उनका शिष्टजनों (महाकवियों) के प्रयोगानुसार लिंगनिर्देश समझना चाहिए।

समाप्तोऽयं ग्रन्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमरकोषकाण्डत्रये श्लोकसंख्या–

काण्डनामानि			श्लोकसंख्या
१ प्रथमकाण्डे	...	...	३०६॥
२ द्वितीयकाण्डे	...	...	७४६
३ तृतीयकाण्डे	...	...	४८६॥

एवं सङ्कलय्य १५४२ श्लोका अस्मिन् ग्रन्थे संकलिताः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमरकोषः

विद्वद्वरभानुजिदीक्षितकृतया सुधाख्यया
'रामाश्रमी'त्यपरनामधेयया व्याख्यया सहितः
संस्कर्त्ता—
म० म० पण्डित-शिवदत्तदाधिमतः

मूल्य २००–००

अमरकोपः

'रत्नाप्रभा' संस्कृत-हिन्दीव्याख्या सहित
व्याख्याकार—डॉ० ब्रह्मानन्द त्रिपाठी

मूल्य ४५–००

आदर्श हिन्दी-संस्कृत-कोशः

सम्पादक—डॉ० रामसरूप शास्त्री 'रसिकेश'

मूल्य १५०–००

'बाल' हिन्दी-संस्कृत-कोशः

सम्पादक—पं० रामजी लाल शर्मा

मूल्य १५–००

Dr. Urmila Sharma Collection, Varanasi